GL SANS 891.25
BHA
125625
LBSNAA
श्री राष्ट्रीय प्रशासन अकादमी
L.B.S. National Academy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY
अवाप्ति संख्या
Accession No. 125625
वर्ग संख्या
Class No. GL Sans 891.25
पुस्तक संख्या
Book No. भट्ट BHA

पं० रघुनन्दन प्रसाद शुक्ल
संस्कृत पुस्तकालय
कचौड़ीगली, बनारस सिटी।

THE
KASHI-SANSKRIT-SERIES
(*HARIDAS SANSKRIT GRANTHAMĀLĀ*)
55
(Chhanda Shāstra Section No. I.)

THE
VṚTTA RATNĀKARA

By

BHAṬṬA KEDĀRA

With a Commentary of Bhatta Nārāyana Bhatta
With S'rutabodha, Chhandomañjarī and Suvṛtta tilaka.

Edited with Introduction and Notes by Vaidyanātha S'āstrī Varakale, Sadholal Research Scholar, Sanskrit College, Benares.

PRINTED, PUBLISHED & SOLD BY
Jai Krishna Das Hari Das Gupta
The Chowkhamba Sanskrit Series Office,
Vidya Vilas Press, North of Gopal Mandir Benares City.

1927.

Registered According to Act XXV. of 1867. (All Rights Reserved.)

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला समाख्य-

काशीसंस्कृतसीरिज़पुस्तकमालायाः

५५

छन्दःशास्त्रविभागे (१) प्रथमपुष्पम् ।

भट्टकेदारप्रणीतः

वृत्तरत्नाकरः

भट्टनारायणभट्टीयव्याख्यासहितः ।

सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः ।

श्रुतबोधच्छन्दोमञ्जरीसुवृत्ततिलकैश्च समेतः ।

धर्मशास्त्रशास्त्रिणा 'साधोलालरिसर्च' वृत्तिभाजा

वरकलोपाख्य वैद्यनाथशास्त्रिणा

भूमिकादिभिः सम्भूय सुसम्पादितः ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरीज आफिस,

विद्याविलास प्रेस-गोपालमंदिर के उत्तर फाटक,

बनारस सिटी ।

१९८४

GYANOK
PK Jain
Collection
DEHRA DUN

राजशासनानुरोधेन सर्वेधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

अत्र पुस्तके सङ्कलितानां विषयाणां ग्रन्थानां च नामानि।

सं०	नाम।	पृ०
१	भूमिका।	१–४.
२	सटीकसटिप्पणवृत्तरत्नाकरविषयसूची।	५–१४.
३	वृत्तरत्नाकरः। (मूलम्)	१५–२६
४	सटीकसटिप्पणो वृत्तरत्नाकरः।	१–१६८.
५	वृत्तरत्नाकरकारिकासूची।	१६९–१७६.
६	वृत्तरत्नाकरे प्रमाणत्वेनोपन्यस्तानां ग्रन्थानां ग्रन्थकर्तृणां च नामानि।	१७७.
७	वृत्तरत्नाकरटीकायां प्रमाणत्वेनोपन्यस्तानां ग्रन्थानां ग्रन्थकर्तृणां च नामानि।	१७७–१७८.
८	वृत्तरत्नाकरटीकायां प्रमाणत्वेन उदाहरणत्वेन प्रत्युदाहरणत्वेन चोपन्यस्तानां पद्यानामकारादिवर्णाऽनुक्रमसूची।	१७९–१८६.
९	सटीकवृत्तरत्नाकरे समुपात्तानां छन्दसामकारादिवर्णाऽनुक्रमसूचीपत्रम्।	१८७–१९६.
१०	वृत्तरत्नाकरटिप्पणे समुपात्तानां ग्रन्थानां ग्रन्थकर्तृणां च नामानि।	१९७–१९८.
११	वृत्तरत्नाकरटिप्पणे समुपात्तानां पद्यानामकारादिवर्णाऽनुक्रमसूची।	१९९–२०६.
१२	श्रुतबोधः।	२०७–२१२.
१३	छन्दोमञ्जरी।	२१३–२४५.
१४	सुवृत्ततिलकम्।	२४६–२६६.

श्रीः

भूमिका ।

इह खलु दुःखबहुले संसारे निरन्तरं निरतिशयं सुखं परिमार्गमाणानां जनानां सुखोपलब्ध्युपायबोधनाय परादिरूपेण भगवती श्रुतिः प्रादुर्बभूव । सा च साङ्गोपाङ्गा सरहस्या साधधानं निषेविता कामधेनुरिव सर्वमभिलषितं पूरयतीति विदितमिदं विपश्चिदपश्चिमानाम् । अक्षरात्मिका सा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

इत्यादिलक्षणलक्षिता निखिलसंसारमूलरूपिणी निरन्तरमानन्दाभिलाषिभिः सेवनीया सेविता सेव्यते सेविष्यते च । सहृदयहृदयनिवासिनी ललितपदा नानाऽलङ्कारैरलङ्कृता तैस्तैः सहृदयहृदयसंवेदिनीभिर्भावभङ्गीभिरञ्चिता सुवृत्तशालिनी रुचिरवर्णवती नवरससम्भृता अमृताऽऽत्मकला कविवदनारविन्दावतीर्णा सा कं न खलु सचेतसमानन्दयति। अत एव सहृदयशिरोमणिभिर्मम्मटाचार्यैः—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

इत्यादोन्यस्याः प्रयोजनान्युक्तानि । गद्यपद्यभेदेन द्विविधा हि सा । तत्र पद्यशालिनी सा छन्दःशास्त्रज्ञानमन्तरा न निषेवितुं शक्यते इति तदवश्यं ज्ञेयम् । ऋगात्मिका सा च पद्यशालिन्येवेति तन्निषेवणाय छन्दःशास्त्रज्ञानमपेक्ष्यते इत्यपि विदितं विदुषाम् । अत एव छन्दसां भगवत्याः श्रुत्याः "छन्दः पादौ तु वेदस्य" इत्यादिभिस्तत्र तत्र पादत्वं प्रतिपादितम् । त्रैवर्णिकानामेव च वेदाऽध्ययनेऽधिकारः । स च वेदः साङ्ग एवाधीतः समुपकरोति । वेदाङ्गानि च षट् शिक्षादीनि । तथा च शिक्षायाम्—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

अत एव च्छन्दसामपरिज्ञाने प्रत्यवायः श्रूयते । तथा च श्रुतिः-

"यो ह वा अविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण या-

जयति वाऽध्यापयति वा स स्थाणुं वर्च्छति गर्तं वा पद्यते प्रमीयते वा पापीयान् भवति यातयामान्यस्य च्छन्दांसि भवन्ति" इति ।

एवं च त्रैवर्णिकानां छन्दोज्ञानं नितरामपेक्षितमिति सिद्धम् । तदितरेषामपि लौकिकव्यवहारोपयोगाय छन्दोज्ञानमपेक्ष्यते । यथा वेदवाणी पद्यात्मिका तथा लोकवाण्यपि पद्यवती भवति । तस्मात् सर्वेषां छन्दोज्ञानमपेक्षितमित्यपि सिद्धम् । अत एव छन्दःशास्त्रे लौकिकवैदिकभेदेन द्वैविध्यं पिङ्गलादिभिः प्रतिपादितम् । इदमेव मनसि विभाव्य अद्यावधि बहुभिश्छन्दःशास्त्रविद्भिः प्रणीताश्छन्दोग्रन्थास्तत्र तत्र विलसन्ति । छन्दःशास्त्रं शिवादिक्रमेणाऽत्र समायातमिति श्रूयते । तथा हि यादवप्रकाशाऽभिधायां छन्दःसूत्रटीकायाम्—

छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणां पति-
स्तस्मादुदुश्च्यवनस्ततः सुरगुरुर्माण्डव्यनामा ततः ॥
माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गल-
स्तस्येदं यशसा गुरोर्भुवि धृतं प्राप्याऽस्मदाद्यैः कृतम् ॥ इति ।

यत् किमपि वा भवतु परमिदानीं छन्दोग्रन्थेषु सर्वप्रथमतया पिङ्गलमुनिप्रणीतः सूत्रात्मा छन्दोग्रन्थः समुपादीयते । तन्मूलभूताश्चाऽन्ये सर्वेऽपि च्छन्दोग्रन्थाः । पिङ्गलमुनिना हि निजपूर्वजच्छन्दःशास्त्रप्रणेतॄणां काश्यपसैतवादीनां स्वग्रन्थे समुल्लिखितानि नामानि, परमिदानीं न तेषां केषामपि कोऽपि निबन्धः समुपलभ्यते । पिङ्गलसूत्रेषु च बह्व्यष्टीका अपि सन्ति । तत्र हलायुधभट्टप्रणीता मृतसञ्जीवन्यभिधा टीका सर्वतो लब्धप्रचारा साम्प्रतं बहुशो मुद्रिता सर्वजनसुलभैव । छन्दोग्रन्थेषु च केचित्केवललक्षणबोधका निबन्धाः सूत्रादयः । केचित् केवललक्ष्यबोधका वृत्त्यादय इति विचार्य तत्र भवता महनीयकीर्तिना महामहिमशालिना छन्दोमर्मज्ञेन केदारभट्टेन सहैव लक्ष्यलक्षणप्रतिपादकः अल्पायासेन च छन्दोज्ञानाय वृत्तरत्नाकरनामा निबन्धः प्राणायि । वैदिकच्छन्दःसु त्रैवर्णिकमात्राणामेवाऽधिकारात् लौकिकच्छन्दःसु च सर्वेषामधिकारात् वैदिकच्छन्दोनिरूपणं विहाय लौकिकच्छन्दसामेवात्र निरूपणं कृतम् । सोऽयं वृत्तरत्नाकरः सर्वेष्वपि छन्दोनिबन्धेषु सातिशयं लब्धप्रचारः सर्वत्रेदानीं सटीको निष्टीकश्च बहुवारं मुद्रितः पठनपाठनादिषु मुख्यतया समादियमाणस्तत्र तत्र परीक्षापाठ्यग्रन्थत्वेनाऽपि निर्धारितः सर्वत्रैव लभ्यते । अत एवाऽस्य पञ्चविंशत्यधिकाष्टीकाः श्रयन्ते । अनेनैवाऽस्य लोकोपकारित्वमनुमातुं शक्यते । समुपलभ्यमानटीकासु भट्टनारायणभट्टप्रणीता टीकैवाऽनतिविस्तृततयाऽनत्यल्पतया च ग्रन्थरहस्यं यथावत् सरलतयाऽवबोधयन्ती

विद्यार्थिनामतीवोपकारिणीति विदुषां विदितमेव । परमद्यावधि मुम्बय्यां निर्णयसागरयन्त्रालये एव साऽप्येकवारमेव मुद्रिता बहुभिर्वर्षैरनुपलभ्यमाना श्रीयुत बाबूजयकृष्णदासगुप्तमहाशयाऽनुरोधात्साम्प्रतं सम्मुद्रय प्रकाश्यते । टीकायां चास्यां सर्वाङ्गपरिपूर्णायामपि उदाहरणान्तरप्रतिपादनमात्ररहितायामुक्तमहाशयप्रार्थनया तत्त्रुटिपूर्त्यै उदाहरणान्तराणि निरूप्य तत्र तत्र विषमस्थलेषु सुविशदं टिप्पणं विलिख्य यथामति परिशोध्य च ग्रन्थोऽयं छन्दःशास्त्रजिज्ञासूनां तद्विदां च करकमलेषूपायनीक्रियते । तमेतं ग्रन्थं निरीक्ष्य स्वाभिलषितं प्राप्य सफलयिष्यन्ति मत्परिश्रमं तत्रभवन्तो भवन्त इति बाढं समाशासे । तथा च मुम्बय्यां मुद्रितपुस्तके ग्रन्थत्रयमासीत् । तदर्थमत्राऽपि श्रुतबोधच्छन्दोमञ्जर्यावपि संशोध्य सन्निवेशिते । किं च प्रसिद्धवृत्तानां कस्मिन् कस्मिन् रसे कुत्र कुत्र वा कस्य च्छन्दसो व्यवहारः समुचितो भवतीत्यादिनिरूपकं लघुतमं निबन्धं विद्यार्थिजनोपकारकं महाकविक्षेमेन्द्रकृतं 'सुवृत्ततिलकं' नाम छन्दोनिबन्धमत्रान्ते न्यवेशयम् । एतत्पुस्तके प्राचीनपुस्तके (निर्णयसागरमुद्रिते) च किं तारतम्यं, द्वयोरपि कतरदुत्तममित्यत्र न बहुलेखनाऽपेक्षा । भवतु । अत्र संशोध्य सम्मुद्रिते पुस्तके निवेशितानां ग्रन्थादीनां सूची मुखपृष्ठाऽनन्तरं सन्निवेशिताऽस्तीति तत्तत एवाऽवगन्तव्यम् ।

'वृत्तरत्नाकरः' भट्टकेदारप्रणीतः । सोऽयं केदारभट्टः काश्यपसगोत्रः शैवशास्त्रवेत्ता महाविद्वान् पद्मेकात्मजः इति वृत्तरत्नाकरप्रारम्भान्तिमपद्यादवसीयते । एतस्य देशकालादिविषये चाऽस्य पुस्तकस्य यथाऽवसरं प्रकाशयिष्यमाणे 'परिचये' विचारयिष्यते ।

टीकाकर्त्ता च श्रीनारायणभट्टः काशीवासी महाविद्वान् महातपस्वी नानानिबन्धप्रणेता जगद्गुरुपदभाक् काशीविश्वेश्वरसंस्थापकः प्रथमपूजासम्मानसम्मानितः कमलाकरभट्टनीलकण्ठभट्टादीनां पूर्वपुरुषो रामेश्वरभट्टात्मजो विश्वामित्रसगोत्रो महाराष्ट्रब्राह्मण इति सुप्रसिद्धम् । प्रकृतग्रन्थनिर्माणकालः स्वपूर्वपुरुषचतुष्टयनामानि स्वगोत्रं च ग्रन्थान्ते ग्रन्थकर्त्रैव प्रतिपादितं "भट्टश्रीनागनाथात्" इत्यादिना । एतद्विषयकमपि सविस्तरं यथाऽवसरं प्रकाशयिष्यत एतिह्यम् ।

श्रुतबोधकर्ता कालिदासः । कोऽयं कालिदासो रघुवंशादिप्रणेतैवायमाहोस्विदन्य इत्यपि यथाऽवसरं विचारयिष्यते ।

छन्दोमञ्जरीकर्त्ता च गङ्गादासः । वैद्यगोपालदाससन्तोषाम्बातनयः इति ग्रन्थत एवाऽवधार्यते । कालादिविषये यथाऽवसरं विचारयिष्यते ।

सुवृत्ततिलकप्रणेता क्षेमेन्द्रो महाकविरतिप्रसिद्धः काश्मीरदेशाऽभि-

जन इत्यादि सर्वं सुप्रसिद्धम् । विस्तरेण च प्रकाशयिष्यते यथाऽवसरम् ।

एवं सुपरिष्कृत्य संशोध्य सम्मुद्रय प्रकाशितोऽयं ग्रन्थः साधुरसाधुर्वेति परीक्षका गुणग्राहिण एव विचारयन्तु । अहं तु—'आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इत्येव मन्ये ।

अन्ते च निजबहुधनव्ययमूरीकृत्याऽपि विद्यार्थिजनोपकाराय प्राचीनग्रन्थरत्नप्रकाशनैकतत्पराय श्रीयुत बाबू जयकृष्णदासगुप्तमहाशयाय प्रकृतग्रन्थरत्नप्रकाशनविनिमये आशीर्वादमन्तरा किं प्रदेयमिति तमनेकाभिराशीर्भिः संयोज्य, ग्रन्थस्यैतस्यैतादृशरीत्या मुद्रणे प्रदत्तसमुत्साहान् माननीय पं० गोपीनाथ कविराज एम्० ए० (प्रिन्सिपल् गवर्नमेन्ट संस्कृतकॉलेज बनारस) महोदयान्, नूतननिर्मितोदाहरणप्रदानादिना समुत्साहवर्धनेन च सविशेषं साहाय्यमाचरतः साहित्याचार्यखिस्तेश्रीनारायणशास्त्रिमहोदयांश्चाऽभिनन्द्य तथैव प्रकृतग्रन्थमुद्रणे प्रदत्तसमुत्साहान् पूज्यवर—साहित्योपाध्याय एम्० ए० पं० बटुकनाथशर्ममहोदयानभिनन्द्य साञ्जलिबन्धं परमेशमभिवन्द्य विरमामि लेखादस्मादिति शम् ।

प्रार्थयिता—
वरकलोपाख्यः
वैद्यनाथशास्त्री

काशी
सं १९८४

सटीकसटिप्पणवृत्तरत्नाकरस्य विषयसूची ।

सं०	विषयाः ।	पृ०
	प्रथमाध्याये—	
१	मङ्गलाचरणम् । (टी०)	१
२	टीकाकर्तुः परिचयः । (टी०)	,,
३	मङ्गलाचरणम् । (मू०)	,,
४	अनुबन्धचतुष्टयनिरूपणम् ।	,,
५	ग्रन्थप्रतिपाद्यनिरूपणम् ।	२
६	ग्रन्थपरिमाणनिरूपणम् ।	३
७	छन्दःशास्त्रमूलभूतगणनिरूपणम् ।	३
८	मादिगणानां देवतादिनिरूपणम् ।	४
९	गणयुगफलादिनिरूपणम् । (टी०)	५
१०	वर्णशुद्धिकथनम् । (टी०)	६
११	मात्राच्छन्दःसूपयुक्तगणनिरूपणम् ।	७
१२	गुरुलघुनिरूपणम् ।	७
१३	पादान्तस्थविषये वृत्तिकारमतप्रदर्शनम् । (टी०)	८
१४	वृत्तिकारमतखण्डनपूर्वकमुदाहरणप्रदर्शनपूर्वकं स्वमतेन वर्णानां गौरवलाघवव्यवस्था । (टी०)	८
१५	गुरुलघुलेखनरीतिकथनम् । (टी०)	९
१६	मतान्तरे गुरुलघुलेखनप्रकारकथनम् । (टिप्पण)	२
१७	संयोगपरस्य गुरुत्वे क्वचिदपवादः ।	९
१८	तत्रैवोदाहरणप्रदर्शनम् ।	९
१९	आर्यासु पादव्यवस्थाऽभावं वदतां वृत्तिकृतां मतखण्डनम् । (टी०)	१०
२०	पादान्तवर्णविषये मतान्तरखण्डनपुरःसरं 'अप्रस्तुतस्याऽपि अर्थतो बुद्धिस्थस्य लघोरेव गुरुता विकल्प्यते' इति स्वमतस्थापनं तदुपोद्बलनाथ वृत्तिकारमतप्रदर्शनं च । (टी०)	१०
२१	लाघवगौरवविषयकसिद्धान्तप्रदर्शकस्वीयसङ्ग्रहश्लोकः । (टी०)	११

सं०	विषयाः ।	पृ०
२२	अपादान्तस्थस्य लघोः प्रहशब्दादौ दृश्यमानलघुत्व-निरूपणम् । (टी०)	११
२३	अत्रैव विषये सरस्वतीकण्ठाभरणमतप्रदर्शनम् । (टी०)	११
२४	तदनुकूलमहाकाव्यपरिदृश्यमानोदाहरणप्रदर्शनम् । (टी०)	११
२५	अतीव्रप्रयत्ने गुरुतैव भवतीत्युदाहरणप्रदर्शनपुरःसरं प्रतिपादनम् । (टी०)	१२
२६	प्राकृतादौ वर्णविशेषाणां स्थलविशेषेषु च विभाषागुरुत्व-निरूपणं तदुदाहरणप्रदर्शनं च । (टी०)	१२
२७	प्राकृतादौ त्वरितपाठेन दीर्घादीनां लघुत्वं द्वयोस्त्रयाणां वा वर्णानां त्वरितपाठेन एकवर्णत्वं भवतीति कथनम् । (टी०)	१२
२८	अब्ध्यादिशब्दानां तत्तत्सङ्ख्याबोधकत्वं, पद्यचतुर्थांश-स्य पादत्वं यतेर्विच्छेदसंज्ञत्वं च ।	१३
२९	यतिनियमस्थाननिरूपणम् । (टी०)	१३
३०	तदर्थं बहुविधोदाहरणप्रत्युदाहरणनिरूपणम् । (टी०)	१४—१७.
३१	अन्तादिवद्भावविषये वृत्तिकारवचःसु पूर्वापरकथनविरो-धप्रदर्शनेन तन्मतखण्डनम् । (टी०)	१७
३२	अनुक्तयतिकेऽपि श्रुतिसौख्याय यतिः कार्येति निरूपणं तत्र कविकल्पलतामतप्रदर्शनम् । (टी०)	१७
३३	शुक्लाम्बरादिमते पादान्त एव यतिरिति कथनम् । (टी०)	१७
३४	भरतादीनां मते यतेरभाव एवेति कथनं तदनुकूलोदाहरण-प्रदर्शनं च । (टी०)	१७
३५	मतद्वयेऽपि स्वस्याऽसम्मतिसूचनम् । (टी०)	८
३६	यतेर्वृत्तस्वरूपाभावत्वकथनं तदर्थं तदुपोद्बलनाय वामन-मतप्रदर्शनम् । (टी०)	१८
३७	युगादिसंज्ञाकथनम् ।	१८
३८	पद्यपदार्थनिरूपणम् । (टी०)	१८
३९	समार्धसमादिसंज्ञाकथनम् ।	१९
४०	तद्विवरणम् ।	१९
४१	षड्विंशतिजातिनिरूपणम् ।	१९
४२	दण्डकसंज्ञाकथनम् ।	१९
४३	शेषाणां गाथात्वकथनम् ।	२०
४४	षड्विंशतिजातीनां नामादिकथनम् ।	२०
४५	अग्रिमाध्यायनिरूपणीयविषयकथनम् ।	२३

सं०	विषयाः ।		पृ०
	द्वितीयाध्यायः—		
१	आर्यालक्षणम् ।		२४
२	आर्यासु यतिनिरूपणं तदर्थं छन्दोमाणिक्योक्तिप्रामाण्यप्रदर्शनम् ।	(टी०)	२४
३	स्वकृतव्याख्यानस्य सूत्राऽनुग्रहहेतुप्रदर्शनपुरःसरं सामञ्जस्यप्रदर्शनं तदर्थं क्षेत्रराजोक्तिप्रामाण्यप्रदर्शनं छन्दोमाणिक्योक्तिसङ्गतिप्रदर्शनं च ।	(टी०)	२५
४	आर्याभेदसङ्ख्याविवेचनम् ।	(टी०)	२५
५	आर्योद्विपृकथनम् ।	(टी०)	२७
६	आर्यानपृकथनम् ।	(टी०)	२८
७	आर्याभेदानां विपुलात्वादिकथनम् ।		२९
८	चपलालक्षणकथनं तद्भेदनिरूपणं ।		३०
९	मुखचपलालक्षणम् ।		३०
१०	जघनचपलालक्षणम् ।		३१
११	गीतिलक्षणम् ।		३२
१२	उपगीतिलक्षणम् ।		३३
१३	उद्गीतिलक्षणम् ।		३४
१४	आर्यागीतिलक्षणम् ।		३४
१५	व्याख्यान्तरकृतव्याख्याखण्डनम् ।	(टी०)	३५
१६	आर्याणामशीतिप्रकारत्वकथनम् ।	(टी०)	३६
१७	छन्दोविचित्र्युक्तैकादशभेदकथनं तदुदाहरणप्रदर्शनं च ।	(टी०)	३६
१८	वैतालीयलक्षणं तद्भेदकथनं च ।	(टी०)	३८
१९	औपच्छन्दसिकलक्षणम् ।		३८
२०	आपातलिकालक्षणम् ।		३९
२१	दक्षिणान्तिकालक्षणम् ।		३९
२२	उदीच्यवृत्तिलक्षणं तद्भेदाश्च ।	(टी०)	४०
२३	प्राच्यवृत्तिलक्षणं तद्भेदाश्च ।	(टी०)	४१
२४	प्रवृत्तकलक्षणम् ।		४१
२५	अपरान्तिकालक्षणम् ।		४१
२६	चारुहासिनीलक्षणम् ।		४२
२७	दक्षिणान्तिकान्तरोदाहरणम् ।	(टी०)	४२

सं०	विषयाः ।		पृ०
२८	उत्तरान्तिकोदाहरणम् ।	(टी०)	४२
२९	उपपातलिकोदाहरणम् ।	(टी०)	४३
३०	आपातलिकौपच्छन्दसिकनिरूपणम् ।		३
३१	वक्त्रलक्षणं तद्भेदाश्च ।	(टी०)	४३
३२	पथ्यावक्त्रलक्षणम् ।		४४
३३	विपरीतपथ्यावक्त्रलक्षणम् ।		४४
३४	चपलावक्त्रलक्षणम् ।		४५
३५	युग्मविपुलालक्षणम् ।		४५
३६	'एकस्यैव युग्मविपुला इति पथ्या इति च संज्ञाद्वयविकल्पः' इति स्वसिद्धान्तस्थापनं तदर्थं वृत्तिकृन्मतप्रदर्शनं तद्भेद-निरूपणं च ।	(टी०)	४५
३७	अखिलेष्वपि पादेषु सप्तमो लघुर्भवतीति सैतवमतकथनं तद्भेदाश्च ।		४६
३८	भविपुलाकथनम् ।		४६
३९	रविपुलाकथनम् ।		४६
४०	नविपुलाकथनम् ।		४६
४१	तविपुलाकथनम् ।		४६
४२	म-यविपुलाकथनम् ।	(टी०)	४६
४३	अत्र भविपुलादिषु पादचतुष्केऽपि तत्तद्गणयोगस्य सत्त्वं वदतां मतेन यत्रैकस्मिन्द्वयोर्वा तत्तद्गणयोगस्तत्रासां परस्पर-संसर्गेणाऽन्येऽपि भेदा भवन्तीति मतनिरूपणम् ।	(टी०)	४६
४४	अत्र विषये वृत्तिकृन्मतप्रदर्शनम् ।	(टी०)	४६
४५	भविपुलादीनां जातिव्यक्तिपक्षयोरुदाहरण-निरूपणम् ।	(टी०)	४७
४६	सविपुलायाः कविप्रयोगाभावादभावकथनम् ।		४८
४७	अन्येषां मतेन 'युयुत्सेनेव' इत्यादीनां चपलापथ्यावक्त्रादि-संज्ञा भवतीति कथनम् ।	(टी०)	४८
४८	वृत्तिकृन्मते तद्भेदसङ्ख्याकथनम् ।		४८
४९	अन्येषां मतकथनम् ।		४८
५०	सङ्कीर्णविपुलावक्त्रकथनं तदुदाहरणप्रदर्शनं च ।		४८
५१	सर्वेष्वपि भेदेषु चतुर्थवर्णस्य गुरुता भवतीति साम्प्रदायि-कमतकथनम् ।		४८

विषयसूची ।

सं०	विषयाः ।	पृ०
५२	अचलधृतिलक्षणम् ।	४९
५३	मात्रासमकलक्षणम् ।	४९
५४	सर्वेषु मात्रासमेषु सममात्रा परेण युक्ता न कार्येति साम्प्रदायिकमतकथनम् । (टी०)	४९
५५	तद्भेदकथनम् । (टी०)	५०
५६	विश्लोकलक्षणम् ।	५०
५७	'विश्लोकःपञ्चमा' इति सूत्राभिप्रायकथनम् । (टी०)	५०
५८	तदुदाहरणतद्भेदकथनम् । (टी०)	५०
५९	वानवासिकालक्षणम्	५१
६०	'द्वादशश्च' इति सूत्राभिप्रायकथनम् ।	५१
६१	तदुदाहरणतद्भेदकथनम् ।	५१
६२	चित्रालक्षणं तद्भेदसङ्ख्याकथनम् । (टी०)	५१
६३	उपचित्रालक्षणम् ।	५२
६४	अष्टकलानन्तरं गुरूलघुयगणा भवन्तीति जयदेवमतकथनम् । तद्भेदकसङ्ख्याकथनम् । (टी०)	५३
६५	पादाकुलकलक्षणम् ।	५२
६६	व्याख्यात्रन्तरकृतव्याख्याप्रदर्शनं तत्र च स्वसिद्धान्ततदुदाहरणतत्प्रमाणप्रदर्शनं च । (टी०)	५३
६७	पादाकुलकभेदकसङ्ख्याकथनम् ।	५३
६८	गुरुलघुमात्रावर्णादिज्ञानोपायकथनम् ।	५४
६९	तस्यैवोदाहरणप्रदर्शनपुरःसरं निरूपणम् । (टी०)	५४
७०	शिखालक्षणम् ।	५५
७१	खञ्जालक्षणम् ।	५६
७२	खञ्जाविषये वृत्तरत्नाकरकारसूत्रकारयोः परस्परं मतविरोधपरिहारः । (टी०)	५६
७३	अनङ्गक्रीडालक्षणम् ।	५६
७४	पिङ्गलमतेऽनङ्गक्रीडायाः सौम्येति नामाऽस्तीतिकथनम् । (टी०)	५७
७५	अनङ्गक्रीडाया एव व्यत्यस्तार्धतायां ज्योतिःसंज्ञा भवतीतिकथनं तदुदाहरणप्रदर्शनं द्वयोरनयोः सामान्यतः शिखासंज्ञा पैङ्गले कथितेति कथनं च । (टी०)	५७
७६	अतिरुचिरालक्षणम् ।	५७

सं०	विषयाः ।	पृ०
७७	अतिरुचिराया एव पैङ्गले चूलिकेतिसंज्ञा 'चूलिकैकोन' इतिसूत्रस्थपाठद्वयस्याप्यर्थकथनपूर्वकं पक्षाऽन्तरे मूलाऽनुक्तोदाहरणस्य प्रदर्शनं च । (टी०)	५८
	तृतीयाध्याये—	
१	उक्तानिरूपणम् ।	५८
२	सुप्रतिष्ठान्तानां पञ्चानां जातीनां सूत्रानुक्तत्वेन निर्मूलत्वमाशङ्क्य तत्परिहारकथनं तस्य समूलत्वस्थापनं च ।	५९
३	अत्युक्तानिरूपणम् ।	५९
४	मध्यानिरूपणम् ।	५९
५	प्रतिष्ठानिरूपणम् ।	६०
६	गायत्रीभेदलक्षणानि ।	६०-६१.
७	उष्णिग्भेदलक्षणानि ।	६१
८	उष्णिग्भेदेषु हंसमालादीनां छन्दोन्तराणां लक्षणानि ।	६२
९	अनुष्टुब्भेदलक्षणानि ।	६२-६४.
१०	समानिकाप्रमाणिकावितानेषु गुरुलघुनियमः केषांचिन्मतेस्ति तन्मतप्रदर्शनं तदनुकूलोदाहरणप्रदर्शनं तत्राऽरुचिमुत्पाद्य स्वमतप्रदर्शनं तत्स्थापनाय सूत्रकारवृत्तिकारमतप्रदर्शनं च ।	६५
११	अनुष्टुभि मूलाऽनुक्तच्छन्दोऽन्तरलक्षणकथनम् । (टी०)	६४
१२	बृहतीभेदलक्षणानि ।	६४-६५.
१३	पङ्क्तिभेदलक्षणानि ।	६५-६७.
१४	त्रिष्टुब्भेदलक्षणानि ।	६७
१५	उपजातित्वं कुत्र भवति ? तद्भेदनामानि तदुदाहरणानि तेषां पौर्वापर्यविचारश्च । (टिप्पण)	६८-७१.
१६	उपजातिलक्षणं सोदाहरणम् । (टी०)	७१-७३.
१७	स्वागतारथोद्धतोद्गवोपजातिनिरूपणं, तद्भेदास्तदुदाहरणं उपजातिपदार्थविवेचनं मतान्तरखण्डनं च । (टिप्पण)	७२-७३.
१८	त्रिष्टुब्भेदलक्षणानि ।	७३-७७.
१९	मूलाऽनुक्तत्रिष्टुब्भेदानां केषांचिल्लक्षणानि । (टी०)	७७
२०	जगतीभेदलक्षणानि ।	७८-८७.
२१	मूलानुक्तजगतीभेदानां केषांचिल्लक्षणानि । (टी०)	८७
२२	अतिजगतीभेदलक्षणानि ।	८७-८९.

सं०	विषयाः ।	पृ०
२३	मूलाऽनुक्तातिजगतीभेदानां केषांचिल्लक्षणानि । (टी०)	८९
२४	शक्वरीभेदलक्षणानि ।	९०-९२.
२५	मूलानुक्तशक्वरीभेदानां केषांचिल्लक्षणानि । (टी०)	९२
२६	अतिशक्वरीभेदलक्षणानि ।	९३-९४.
२७	मूलानुक्तातिशक्वरीभेदानां केषांचिल्लक्षणानि ।	९५
२८	अष्टिभेदानां लक्षणानि ।	९५
२९	मूलाऽनुक्ताऽष्टिभेदानां केषांचिल्लक्षणानि । (टी०)	९६
३०	अत्यष्टिभेदलक्षणानि ।	९६-९८.
३१	मूलानुक्तात्यऽष्टिभेदानां केषांचिल्लक्षणानि । (टी०)	९८
३२	धृतिभेदलक्षणम् ।	९९
३३	मूलाऽनुक्तधृतिभेदानां केषांचिल्लक्षणानि । (टी०)	९९
३४	अतिधृतिभेदलक्षणम् ।	९९-१००.
३५	मूलानुक्ताऽतिधृतिभेदानां केषांचिल्लक्षणानि । (टी०)	१००
३६	कृतिभेदलक्षणानि ।	१००
३७	मूलानुक्तकृतिभेदलक्षणम् । (टी०)	१०१
३८	प्रकृतिभेदलक्षणम् ।	१०१
३९	मूलानुक्तप्रकृतिभेदलक्षणम् । (टी०)	१०१
४०	आकृतिभेदलक्षणम् । (टी०)	१०१
४१	मूलानुक्ताकृतिभेदलक्षणम् ।	१०२
४२	विकृतिभेदलक्षणम् ।	१०२
४३	सङ्कृतिभेदलक्षणम् ।	१०३
४४	अतिकृतिभेदलक्षणम् ।	१०४
४५	उत्कृतिभेदलक्षणम् ।	१०४
४६	चण्डवृष्टिप्रपातदण्डककथनम् ।	१०५
४७	रातमाण्डव्यव्यतिरिक्तपिङ्गलादिमते 'चण्डवृष्टिप्रपात' इति संज्ञाऽस्य दण्डकस्येति कथनम् । (टी०)	१०५
४८	अर्णार्णवादिदण्डकलक्षणम् ।	१०५
४९	पञ्चदशदण्डकनामकथनं तत्र सोदाहरणं रीतिप्रदर्शनं च । (टी०)	१०६
५०	प्रचितकदण्डकलक्षणम् ।	१०६
५१	मूलानुक्तदण्डकान्तरलक्षणानि ।	१०७

सं०	विषयाः।		पृ०
चतुर्थाऽध्याये—			
१	अर्धसमवृत्तभेदलक्षणानि।		१०७–११२.
२	मूलानुक्तार्धसमवृत्तभेदलक्षणानि।	(टी०)	११३
३	अर्धसमपदार्थविचारः।	(टिप्पण)	११३–११४.
पञ्चमाऽध्याये—			
१	विषमवृत्तभेदलक्षणानि।		११४–११६.
२	अमृतधाराविषये वृत्तिकारमतेन विरोधमुद्भाव्य सूत्रकार-मतस्यानुकूल्यप्रदर्शनपुरःसरं वृत्तरत्नाकरकारोक्तिसङ्गति-प्रदर्शनम्।	(टी०)	११७
३	प्रत्यापीडोदाहरणप्रदर्शनम्।	(टी०)	११७
४	विषमवृत्तभेदलक्षणानि।		११८–११२.
५	अनुक्तच्छन्दसां विषमाक्षरपादादीनां च गाथात्वकथनम्।		१२३
६	वृत्त्यादिग्रन्थपर्यालोचनया कियतीनां गाथानामुदाहरण-प्रदर्शनपुरःसरं लक्षणनिरूपणम्।	(टी०)	१२३-१२६.
७	महाराष्ट्रादिभाषास्थपद्योदाहरणकथनम्।	(टी०)	१२६-१२७.
८	प्राकृतच्छन्दःसु गाथाप्रकरणम्।	(टी०)	१२७-१२९.
९	दोहानिरूपणम्।	(टी०)	१२९-१३०.
१०	उत्कपानिरूपणम्।	(टी०)	१२०
११	रोलाप्रकरणम्।	(टी०)	१३१
१२	गन्धाप्रकरणम्।	(टी०)	१३१
१३	चतुष्पदाप्रकरणम्।	(टी०)	१३२
१४	घत्ताप्रकरणम्।	(टी०)	१३२
१५	घत्तानन्दप्रकरणम्।	(टी०)	१३२
१६	षट्पदप्रकरणम्।	(टी०)	१३३-१३५.
१७	पज्झटिकाप्रकरणम्।	(टी०)	११५
१८	अलिल्लिहप्रकरणम्।	(टी०)	१३६
१९	नवपदप्रकरणम्।	(टी०)	१३६
२०	पद्मावतीप्रकरणम्।	(टी०)	१३६
२१	कुण्डलिकाप्रकरणम्।	(टी०)	१३७
२२	मदनान्तकप्रकरणम्।	(टी०)	१३८
२३	द्विपदीप्रकरणम्।	(टी०)	१३८

सं०	विषयाः।		पृ०
२४	खञ्जाप्रकरणम्।	(टी०)	१३९
२५	शिखाप्रकरणम्।	(टी०)	१३९
२६	मालाप्रकरणम्।	(टी०)	१३९
२७	चूलिकाप्रकरणम्।	(टी०)	१४०
२८	सौराष्ट्राप्रकरणम्।	(टी०)	१४०
२९	काहलिप्रकरणम्।	(टी०)	१४०
३०	मधुभारतप्रकरणम्।	(टी०)	१४०
३१	आभीरप्रकरणम्।	(टी०)	१४१
३२	दण्डकाहलप्रकरणम्।	(टी०)	१४१
३३	दीपकप्रकरणम्।	(टी०)	१४१
३४	सिंहावलोकप्रकरणम्।	(टी०)	१४१

षष्ठाऽध्यायः—

१	प्रस्तारादिषट्प्रत्ययकथनम्।		१४२
२	प्रस्ताररीतिकथनम्।		१४२
३	उदाहरणप्रदर्शनपुरःसरं समवृत्तप्रस्तारनिरूपणम्।	(टी०)	१४३
४	अर्धसमप्रस्तारः।	(टी०)	१४४
५	विषमप्रस्तारः।	(टी०)	१४५
६	मात्राप्रस्तारः।	(टी०)	१४५
७	नष्टनिरूपणम्।		१४६
८	सोदाहरणं समनष्टम्।	(टी०)	१४७
९	अर्धसमनष्टम्।	(टी०)	१४७
१०	विषमनष्टम्।	(टी०)	१४८
११	मात्रानष्टनिरूपणम्।	(टी०)	१४९
१२	उद्दिष्टप्रकरणम्।		१४९
१३	सोदाहरणं समोद्दिष्टम्।	(टी०)	१४९
१४	अर्धसमोद्दिष्टम्।	(टी०)	१५०
१५	विषमोद्दिष्टम्।	(टी०)	१५०
१६	सूत्रोक्तोद्दिष्टप्रकारकथनम्।	(टी०)	१५०
१७	मात्रोद्दिष्टम्।	(टी०)	१५१
१८	एकद्यादिलगक्रियाकथनम्।		१५१
१९	सोदाहरणं समलगक्रियाकथनम्।	(टी०)	१५२
२०	अर्धसमलगक्रियाकथनम्।	(टी०)	१५५


सं०	विषयाः ।		पृ०
२१	विषमलगक्रियाकथनम् ।	(टी०)	१५५
२२	सङ्ग्रहश्लोकः ।	(टी०)	१५५
२३	भास्कराचार्योक्तलगक्रियाप्रकारः ।	(टी०)	१५५
२४	सूत्रकारोक्तलगक्रियाप्रकारः । (मेरुप्रस्तारः)	(टी०)	१५७
२५	पताकाप्रस्तारः ।	(टी०)	१५७
२६	मात्रामेरुप्रस्तारः ।	(टी०)	१६१
२७	मात्राखण्डमेरुः ।	(टी०)	१६२
२८	सङ्ख्यानिरूपणम् ।		१६३
२९	मात्रामर्कटीकथनम् ।	(टिप्पण)	१६३
३०	वर्णमर्कटीकथनम् ।	(टिप्पण)	१६४
३१	सूत्रोक्तसङ्ख्यानप्रकारः ।	(टी०)	१६५
३२	अध्वयोगकथनम् ।		१६७
३३	वृत्तरत्नाकरसमाप्तिनिरूपणम् ।		१६७
३४	टीकाकर्तृपूर्वपुरुषपरिचयः ।	(टी०)	१६८
३५	टीकाकर्तृपरिचयः ।	(टी०)	१६८
३६	सज्जनप्रार्थना ।	(टी०)	१६८
३७	टीकानिर्माणकालनिरूपणम् ।	(टी०)	१६८
३८	टीकासमाप्तिः ।	(टी०)	१६८

॥ श्रीः ॥

केदारभट्टप्रणीतः

वृत्तरत्नाकरः

प्रथमोऽध्यायः ।



सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माऽच्युताऽर्चितम् ॥
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥ १ ॥
यदाऽर्थशेषशास्त्रज्ञः पद्यैकोऽभूद् द्विजोत्तमः ॥
तस्य पुत्रोऽस्ति केदारः शिवपादाऽर्चने रतः ॥२॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ॥
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥ ३ ॥
पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ॥
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ ४ ॥
षडध्यायनिबद्धस्य च्छन्दसाऽस्य परिस्फुटम् ॥
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥
म्यरस्तजभ्नगैर्लान्तैरभिर्दशभिरक्षरैः ॥
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥
सवर्गुमौ मुखान्तलौ यराव्यन्तगलौ सतौ ॥
म्मध्याद्यौ उमौ त्रिलो नाऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥ ७ ॥
ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ॥
गणाश्चतुर्लघूयुताः पञ्चार्यादिषु संस्थिताः ॥ ८ ॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तरश्च यः ॥
वा पादान्ते त्वसौ ग्वका ज्ञेयाऽन्या मात्रिको लघुः ॥ ९ ॥
पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ॥
पुरःस्थितेन तेन स्याल्लघुताऽपि क्वचिद् गुरोः ॥ १० ॥
तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ॥
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥ ११ ॥
अङ्घ्रिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः ॥
ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञितः ॥ १२ ॥

युक्समं विषमं चायुक्स्थानं ऋद्धिर्निगद्यते ॥
सममर्धसमं वृत्तं विषमं च तथापरम् ॥ १३ ॥
अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ॥
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥
प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५ ॥
यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ॥
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १६ ॥
आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः ॥
पृथक्छन्दो भवेत्पादैर्यावत्षड्विंशतिं गतम् ॥ १७ ॥
तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ॥
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥ १८ ॥
उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ १९ ॥
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता ॥
शक्वरी साऽतिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥ २० ॥
धृतिश्चाऽतिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥
विकृतिः सङ्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः ॥ २१ ॥
इत्युक्ताश्छन्दसां संज्ञाः क्रमतो वच्मि साम्प्रतम् ॥
लक्षणं सर्ववृत्तानां मात्रावृत्ताऽनुपूर्वकम् ॥ २२ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे संज्ञाभिधानो नाम प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ।



लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः ॥
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥
षष्ठे द्वितीयलात्परके न्ले मुखलाद्य सयतिपदनियमः ॥
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥
त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः ॥
पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ३ ॥

सँलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ॥
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥ ४ ॥
उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ॥
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥
आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ॥
शेषे पूर्वजलक्ष्मा मुखचपला सोद्गिता मुनिना ॥ ६ ॥
प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे च चपलायाः ॥
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥
आर्याप्रथमोदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥
दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजङ्गेशः ॥ ८ ॥
आर्याद्वितीयकेऽर्धे यद् गदितं लक्षणं तत्स्यात् ॥
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ९ ॥
आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ॥
सोद्गीतिः किल गदिता तद्व्यत्यंशभेदससंयुक्ता ॥ १० ॥
आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधनं युक्तम् ॥
इतरत्तद्वन्निखिलं भवति यदीयमर्द्धमुदितार्यागीतिः ॥ ११ ॥
षड् विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ॥
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥ १२ ॥
पर्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ॥ १३ ॥
आपातलिका कथितेयं भाद् गुरुकावथ पूर्ववदन्यत् ॥ १४ ॥
तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः ॥ १५ ॥
उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः ॥ १६ ॥
पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥ १७ ॥
यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ॥ १८ ॥
अस्य युग्मरचिताऽपरान्तिका ॥ १९ ॥
अयुग्भवा चारुहासिनी ॥ २० ॥
वक्त्रं नाद्यान्नसौ स्यातामध्येर्योऽनुष्टुभि ख्यातम् ॥ २१ ॥
युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥ २२ ॥
ओजयोर्जेन वारिधेस्तदेव विपरीतादि ॥ २३ ॥
चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ २४ ॥
यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥ २५ ॥
सैतवस्याऽखिलेष्वपि ॥ २६ ॥
भेनाऽब्धितो भाद्विपुला ॥ २७ ॥

इत्थमन्या रश्वनुर्यात् ॥ २८ ॥
नोऽम्बुधेश्चेन्नविपुला ॥ २९ ॥
नोऽब्धेस्तपूर्वान्या भवेत् ॥ ३० ॥
द्विगुणितवसुलघुरचलधृतिरिति ॥ ३१ ॥
मात्रासमकं नवमो लगान्तम् ॥ ३२ ॥
जो न्लावथाम्बुधेर्विश्लोकः ॥ ३३ ॥
तद्युगलाद्दानवासिका स्यात् ॥ ३४ ॥
बाणाष्टनवसु यदि लक्ष्मित्रा ॥ ३५ ॥
उपजित्रा नवमे परयुक्ते ॥ ३६ ॥
यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् ॥
अनियतवृत्तपरिमाणयुतं प्रथितं जगत्सु पादाकुलकम् ॥ ३७ ॥
वृत्तस्य लो विना वर्णैर्गा वर्णा गुरुभिस्तथा ॥
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥ ३८ ॥
शिखिगुणितदशलघुरचितमगगतलघुयुगलमपरमिदमखिलम् ॥
सगुरु शकलयुगलकमपि सुपरिघटितललितपदवितति भवति शिखा ॥ ३९ ॥

विनिमयविनिहितशकल-
कलितपदवितिविरचितगुणनिचया ॥
श्रुतिसुखकृदियमपि जगति त्रि
जशिर उपगतवति सति भवति खजा ॥ ४० ॥

अग्रावर्धे गा द्यभ्यस्ता यस्याः साऽनङ्गक्रीडोक्ता ॥
दलमपरपि वसुगुणितसलिलनिधिलघु कविरचितं
पदवितति भवति ॥ ४१ ॥
त्रिगुणनवलघुरवसितिगुरुरिति
दलयुगकृततनुरतिरुचिरा ॥ ४२ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

गुः श्रीः ॥ १ ॥
गौ स्त्री ॥ २ ॥
मो नारी ॥ ३ ॥
रो मृगी ॥ ४ ॥

म्गौ केत्कन्या ॥ ५ ॥
भ्गौ गिति पङ्क्तिः ॥ ६ ॥
त्यौ स्तस्तनुमध्या ॥ ७ ॥
शशिवदना न्यौ ॥ ८ ॥
विद्युल्लेखा मो मः ॥ ९ ॥
त्सौ चेद्वसुमती ॥ १० ॥
म्सौ गः स्यान्मदलेखा ॥ ११ ॥
भौ गिति चित्रपदा गः ॥ १२ ॥
मो मो गो गो विद्युन्माला ॥ १३ ॥
माणवकं भात्तलगाः ॥ १४ ॥
म्नौ गौ हंसरुतमेतत् ॥ १५ ॥
जौ समानिका गलौ च ॥ १६ ॥
प्रमाणिका जरौ लगौ ॥ १७ ॥
वितानमाभ्यां यदन्यत् ॥ १८ ॥
रान्नसाविह हलमुखी ॥ १९ ॥
भुजगशिशुभृता नौ मः ॥ २० ॥
म्सौ ज्गौ शुद्धविराडिदं मतम् ॥ २१ ॥
म्नौ ज्गौ चेति पणवनामकम् ॥ २२ ॥
जौ रगौ मयूरसारिणी स्यात् ॥ ३३ ॥
भ्मौ सगयुक्तौ रुक्मवतीयम् ॥ २४ ॥
मत्ता ज्ञेया मभसगयुक्ता ॥ २५ ॥
नरजगैर्भवेन्मनोरमा ॥ २६ ॥
त्जौ जो गुरुणेयमुपस्थिता ॥ २७ ॥
स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ २८ ॥
उपेन्द्रवज्रा जतजास्ततो गौ ॥ २९ ॥
अनन्तरोदीरितलक्ष्मभाजौ ॥
पादौ यदीयावुपजातयस्ताः ॥ ३० ॥
इत्थं किलान्यास्वपि मिश्रितासु ॥
स्मरन्ति जातिष्विदमेव नाम ॥ ३१ ॥
नजजलगैर्गदिता सुमुखी ॥ ३२ ॥
दोधकवृत्तमिदं भभभाद् गौ ॥ ३३ ॥
शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥ ३४ ॥
वातोर्मीयं कथिता म्भौ तगौ गः ॥ ३५ ॥


बाणरसैः स्याद्भतनगगैः श्रीः ॥ ३६ ॥
म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ॥ ३७ ॥
राज्ञराविह रथोद्धता लगौ ॥ ३८ ॥
स्वागतेति रनभाद् गुरुयुग्मम् ॥ ३९ ॥
ननसग्गुरुरत्रिता वृत्ता ॥ ४० ॥
ननरलगुरुभिश्च भद्रिका ॥ ४१ ॥
श्येनिका रजौ रलौ गुरुर्यदा ॥ ४२ ॥
मौक्तिकमाला यदि भतनाद् गौ ॥ ४३ ॥
उपस्थितमिदं जसौ तादू गकारौ ॥ ४४ ॥
चन्द्रवर्त्म निगदन्ति रनभर्सैः ॥ ४५ ॥
जतौ तु वंशस्थमुदीरितं जरौ ॥ ४६ ॥
स्यादिन्द्रवंशा ततजैस्तसंयुतैः ॥ ४७ ॥
इह तोटकमम्बुधिसैः प्रथितम् ॥ ४८ ॥
द्रुतविलम्बितमाह नभौ भरौ ॥ ४९ ॥
मुनिशरविरतिर्नौ म्यौ पुटोऽयम् ॥ ५० ॥
प्रमुदितवदना भवेन्नौ च रौ ॥ ५१ ॥
नयसहितौ न्यौ कुसुमविचित्रा ॥ ५२ ॥
रसैर्जसजसा जलोद्धतगतिः ॥ ५३ ॥
चतुर्जगणं वद मौक्तिकदाम ॥ ५४ ॥
भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ ५५ ॥
रैश्चतुर्भिर्युता स्रग्विणी सम्मता ॥ ५६ ॥
भुवि भवेन्नभजरैः प्रियम्वदा ॥ ५७ ॥
त्यौ त्यौ मणिमाला च्छिन्ना गुहवक्त्रैः ॥ ५८
धीरैरभाणि ललिता नभौ जरौ ॥ ५९ ॥
प्रमिताक्षरा सजससैरुदिता ॥ ६० ॥
ननभरसहिता महितोज्ज्वला ॥ ६१ ॥
पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ ६२ ॥
अब्ध्यष्टाभिर्जलधरमाला म्भौ म्भौ ॥ ६३ ॥
इह नवमालिका नजभयैः स्यात् ॥ ६४ ॥
स्वरशरविरतिर्ननौ रौ प्रभा ॥ ६५ ॥
भवति नजावथ मालती जरौ ॥ ६६ ॥
जभौ जरौ वदति पञ्चचामरम् ॥ ६७ ॥
अभिनवतामरसं नजजाद्यः ॥ ६८ ॥

तुरगरसयतिनौ ततौ गः क्षमा ॥ ६९ ॥
म्नौ जौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ७० ॥
चतुर्ग्रहैरतिरुचिरा जभस्जगाः ॥ ७१ ॥
वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरम् ॥ ७२ ॥
(उपस्थितमिदं ज्सौ म्सौ सगुरुकं चेत्) ॥ ७३ ॥
सजसा जगौ भवति मञ्जुभाषिणी ॥ ७४ ॥
ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥ ७५ ॥
म्तौ न्सौ गावक्षग्रहांवरतिरसम्बाधा ॥ ७६ ॥
ननरसलघुगैः स्वरैरपराजिता ॥ ७७ ॥
ननभनलघुगैः प्रहरणकलिता ॥ ७८ ॥
उक्ता वसन्ततिलका तभजा जगौ गः ॥ ७९ ॥
सिंहोन्नतेयमुदिता मुनिकाश्यपेन ॥ ८० ॥
उद्धर्षिणीयमुदिता मुनिसेतवेन ॥ ८१ ॥
इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ ८२ ॥
द्विःसप्तच्छिदलोला म्सौ म्सौ गौ चरणे चेत् ॥ ८३ ॥
द्विहतहयलघुरथ गिति शशिकला ॥ ८४ ॥
स्रगिति भवति रसनवकयतिरियम् ॥ ८५ ॥
वसुहययतिरिह मणिगुणनिकरः ॥ ८६ ॥
ननमयययुतेयं मालिनी भोगिलोकैः ॥ ८७ ॥
भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ ८८ ॥
सजना नयौ शरदशयतिरियमेला ॥ ८९ ॥
भ्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा ॥ ९० ॥
भ्रत्रिनगैः स्वरात्खमृषभगजविलसितम् ॥ ९१ ॥
नजभजरैः सदा भवति वाणिनी गयुक्तैः ॥ ९२ ॥
रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ ९३ ॥
जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ९४ ॥
दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ ९५ ॥
रसयुगहयैर्न्सौ भ्रौ स्लौ गो यदा हरिणी तदा ॥ ९६ ॥
मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ॥ ९७ ॥
हयदशभिर्नजौ भजजला गुरु नर्कुटकम् ॥ ९८ ॥
मुनिगुहकार्णवैः कृतयति वद कोकिलकम् ॥ ९९ ॥
स्याद् भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ १०० ॥
सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥ १०१ ॥

ज्ञेया सप्ताश्वषड्भिर्मरभनय-
युता म्लौ गः सुवदना ॥ १०२ ॥
त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥ १०३ ॥
म्रभ्नैर्यानां त्रयेण त्रिमुनि-
यतियुता स्रग्धरा कीर्तितेयम् ॥ १०४ ॥
भ्रौ नरना रनावथ गुरुर्दिगर्क-
विरमं हि भद्रकमिति ॥ १०५ ॥
यदिह नजौ भजौ भजभलगा-
स्तदश्वललितं हरार्कयतिमत् ॥ १०६ ॥
मत्ताक्रीडा मौ तौ नौ नलिगति
भवति वसुशरदशयतियुता ॥ १०७ ॥
भूतमुनीनैर्यतिरिह भतनाः स्मौ
भनयाश्च यदि भवति तन्वी १०८ ॥
क्रौञ्चपदा भमौ स्मौ ननना ग्गा-
विषुशरवसुमुनिविरतिरिह भवेत् ॥ १०९ ॥
वस्वीशाश्वच्छेदोपेतं ममतनयुगनर-
सलगैर्भुगङ्गविजृम्भितम् ॥ ११० ॥
मो नाः षट् सगगिति यदि
नवरसरसशरयतियुतमपवाहाख्यम् ॥ १११ ॥
यदि ह नयुगलं ततः सप्तरेफा-
स्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥ ११२ ॥
प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव-
व्यालज्ञामूतलीलाकरोद्दामशङ्खादयः ॥ ११३ ॥
प्रचितकसमभिधो धीरधीभिः स्मृतो
दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥ ११४ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः ।



विषमे यदि सौ सलगा दले
भौ युजि भाद् गुरुकावुपचित्रम् ॥ १ ॥
भत्रयमोजगतं गुरुणी चे-
द्युजि च नजौ ज्ययुतौ द्रुतमध्या ॥ २ ॥
सयुगात्सगुरू विषमे चे-
द्भाविह वेगवती युजि भाद्यौ ॥ ३ ॥
आजे तपरौ जरौ गुरुश्चे-
न्मसौ ज्गौग्भद्रविराड् भवेदनोजे ॥ ४ ॥
असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद् गः ॥ ५ ॥
आख्यानकी तौ जगुरू ग ओजे
जतावनोजे जगुरू गुरुश्चेत् ॥ ६ ॥
जतौ जगौ गो विषमे समे चे-
त्तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ७ ॥
सयुगात्सलघू विषमे गुरु-
र्युजि नभौ भरकौ हरिणप्लुता ॥ ८ ॥
अयुजि ननरला गुरुः समे-
न्जमपरवक्त्रमिदं ततो जरौ ॥ ९ ॥
अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ १० ॥
वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः ॥
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा ॥ ११ ॥
स्यादयुग्मके रजौ रयौ समे चे-
ज्जरौ जरौ गुरुर्यवात्परा मतीयम् ॥ १२ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे चतुर्थोऽध्यायः ।



पञ्चमोऽध्यायः ।



मुखपादोऽष्टभिर्वर्णैः
परे स्युर्मकरालयैः क्रमाद् वृद्धैः ॥
सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यं
तदुदितममलमतिभिः पद्मचतुरूर्ध्वाभिधं वृत्तम् ॥ १ ॥
प्रथममुदितवृत्ते
विरचितविषमचरणभाजि ॥
गुरुकयुगलनिधन इह सहित आङा
लघुविरचितपदवितितियतिरिति भवति पीडः ॥ २ ॥
प्रथममितरचरणसमुत्थं
श्रयति स यदि लक्ष्म ॥
इरतदितरगदितमपि यदि च तुर्यं
चरणयुगलकमविकृतमपरमिति कलिका सा ॥ ३ ।
द्विगुरुयुतसकलचरणान्ता
मुखचरणगतमनुभवति च तृतीयः ॥
अपरमिह हि लक्ष्म
प्रकृतमखिलमपि यदिदमनुभवति लवली सा ॥ ४ ॥
प्रथममधिवसति यदि तुर्यं, चरमचरणपदमवसितगुरुयुग्मम् ॥
निखिलमपरमुपरिगतमिति ललितपदयुक्ता, तदिदममृधारा ॥ ५ ।
सजसादिमे सलघुकौ च
नसजगुरुकैरथोद्गता ॥
त्र्यङ्घ्रिगतभनजला गयुताः
सजसा जगौ चरणमेकतः पठेत् ॥ ६ ॥
चरणत्रयं व्रजति लक्ष्म
यदि सकलमुद्गतागतम् ॥
नौ भगौ भवति सौरभकं
चरणे यदीह भवतस्तृतीयके ॥ ७ ॥
नयुगं सकार्युगलं च
भवति चरणे तृतीयके ॥
तदुदितमुरुमतिभिर्ललित
यदि शेषमस्य खलु पूर्वतुल्यकम् ॥

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्य-
त्त्रितयं सनजरगास्ततो नलौ सः ॥
त्रिनपरिकलितजयौ
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ २ ॥
नौ पादेऽथ तृतीयके सनौ नसयुक्तौ
प्रथमाङ्घ्रिकृतयतिस्तु वर्धमानम् ॥
त्रितयमपरमपि पूर्वसदृशमिह भवति
प्रततमतिभिरिति गदितं लघु वृत्तम ॥ १० ॥
अस्मिन्नेव तृतीयके यदा तजराः स्युः
प्रथमे च विरतिरार्षभं ब्रुवन्ति ॥
तच्छुद्धविराट् पुरः स्थितं
त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥ ११ ॥
विषमाक्षरपादं वा पादैरसमं दशधर्मवत् ॥
यच्छन्दो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥ १२ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

प्रस्तारो नष्टमुद्दिष्टमेकद्यादिलगक्रिया ॥
सङ्ख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १ ॥
पादे सर्वगुरावाद्यात्लघुं न्यस्य गुरोरधः ॥
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ॥
ऊने दद्याद् गुरूनेव यावत्सर्वलघुर्भवेत् ॥
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥ ३ ॥
नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धं समे च लः ॥
विषमे चैकमाधाय स्यादर्धेऽर्धे गुरुर्भवेत् ॥ ४ ॥
उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान्समालिखेत् ॥
लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ५ ॥
वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितान् ॥
एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत् ॥ ६ ॥

उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ॥
उपर्याद्याद् गुरारेकमेकद्व्यादिलगक्रिया ॥ ७ ॥
लगक्रियाङ्कसन्दोहे भवेत्सङ्ख्या विभिश्रिते ॥
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥ ८ ॥
सङ्ख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ॥
वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम् ॥ ९ ॥
वंशेऽभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वार्थबोधे ॥
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्त-
श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥ १० ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे षष्ठोऽध्यायः ।

समाप्तश्चायं ग्रन्थः



श्रीः

श्रीनारायणभट्टरचितया व्याख्यया सहितः ।

वृत्तरत्नाकरः

प्रथमोऽध्यायः

नत्वा गणेशं वाग्देवीं पिङ्गलं मातरं गुरुम् ॥
अन्यानपि च भाष्यादिकर्नॄंश्छन्दोविशारदान् ॥
श्रीभट्टरामेश्वरसूरिसूनुर्नारायणः स्वामनुरुध्य बुद्धिम् ॥
सङ्क्षेपवृत्त्या विवृतिं सुवृत्तरत्नाकरे व्यक्ततया तनोति ॥

विशिष्टशिष्टाऽऽचारमूलभूत "स्वस्ति न इन्द्रो वृद्धश्रवाः" इत्यादिवैदिकलिङ्गकल्पितश्रुतिप्रमाणकविशिष्टेष्टदेवतानमस्कारजनितनिर्विघ्नतादिः स्वनामकीर्तनपूर्वकं स्वग्रन्थस्य ग्रन्थान्तरैरगतार्थतां च सूचयन् सप्रयोजनं कर्तव्यं सामान्यज्ञानपूर्वकविशेषजिज्ञासुप्रवृत्तिसिद्धयर्थं सामान्यतः प्रतिजानीते सुखेत्यादिश्लोकत्रयेण—

सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माऽच्युताऽर्चितम् ॥
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥ १ ॥
वेदा(१)ऽर्थशैवशास्त्रज्ञः पव्येकोऽभूद्द्विजोत्तमः ॥
तस्य पुत्रोऽस्ति केदारः शिवपादाऽर्चने रतः ॥ २ ॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ॥
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥ ३ ॥

ब्रह्माऽच्युताभ्यां = विधातृविष्णुभ्याम् । अर्चितं = पूजितम् । गौर्या पार्वत्या, विनायकेन = गणाधिपेन चोपेतम् । लोकानां = चतुर्दशभुवनानां, भूरादीनां सप्तानां वा । शङ्करं = सुखकर्तारम् । एवंविधं शङ्करं महादेवम् । सुखसन्तानसिद्ध्यर्थं प्रणामजनिताऽविघ्नतादिसम्भूताऽव्याकुलीभावबुद्धि-

(१) अत्र पञ्जिकाकारमते 'वेदान्तशैवशास्त्रज्ञः' इति पाठः ।

वैभवाद्विजनितसुखपरम्पराप्राप्त्यर्थम्। नत्वा, तेन केदारेणेदं छन्दः क्रियते इति तृतीयश्लोकेनाऽन्वयः। वेदानामृगादीनाम् । अर्थम्, शैवशास्त्राणि च रुद्रयामलादीनि जानातीत्येवंविधः पव्ये(२)कसंज्ञो द्विजोत्तमो ब्राह्मणोत्तमोऽभूत् । तस्य पुत्रः केदारनामा शिवचरणारविन्दपूजनतत्परोऽस्ति । लक्ष्येणोदाहरणेन मात्रावर्णान्यतरनियतात्मकेन छन्दसा, लक्षणेन च तन्नियमकथनात्मकेन छन्दसा तदभिन्नेन युक्तम् । लक्ष्यमेव लक्षणमिति विग्रहः। वृत्तरत्नानामाकरः खनिर्यत्र तत्। यद्वा तेषामाकरः समूहो यत्र ।

आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते ।

इति विश्वप्रकाशोक्तेः । एतयैवाऽन्वर्थसंज्ञया नाम प्रसिद्धम् । छन्दः=तत्प्रतिपादकत्वाल्लक्षितं तच्छास्त्रम् । बालानां=छन्दःशास्त्राऽज्ञानाम् । सुखेनाऽल्पोपायेन सिद्धये छन्दोज्ञानार्थं क्रियते इत्यर्थः। सुखपदस्य प्रथमप्रयोगादेतच्छ्रावयितॄणां श्रोतॄणां च सुखाऽतिशयः सूचितः। यद्वा बालप्रतिपत्तेः प्रयोजनत्वेऽपि स्वप्रयोजनत्वाऽभावादेतद्ग्रन्थजनितबालव्युत्पत्तिजनितोपकाराऽदृष्टेन जनिष्यमाणस्वर्गादिसुखपरम्परैव स्वेष्टा स्वग्रन्थप्रयोजनत्वेनाऽनेन निर्दिश्यते। ब्रह्मविष्णुगौरीविनायककीर्तनेन च मङ्गलाऽन्तरं तदनु स्मृतिरूपं सचितम् । शङ्करमित्यत्र शंशब्दस्याऽव्ययत्वाद्विभक्त्यन्तत्वाऽभावात् "सुपो धातुप्रातिपदिकयोः" (पा० सू० २-४-७१) इति न भवति। द्विजोत्तमग्रहणेन च ब्राह्मणकर्तृत्वादेतस्य ग्रन्थस्य श्रवणे दोषाऽभावः सूचितः। लक्ष्येत्यादिना लक्ष्येभ्यः काव्यादिभ्यः केवललक्षणेभ्यश्च सूत्रादिभ्यो भिन्नलक्ष्यलक्षणेभ्यश्च वृत्त्यादिभ्योऽतिशयः सूचितः ॥ १ ॥ २ ॥ ३ ॥

एवं सामान्यतो ग्रन्थकरणं प्रतिज्ञाय पूर्वाऽऽचार्योक्तिमूलकतया स्वकल्पितताशङ्काजनितश्रोत्रनादरं निराकर्तुं प्रतिपाद्यमर्थं विशेषतः प्रतिजानीते—

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ॥
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ ४ ॥

पिङ्गलेन=सूत्रकर्त्रा आदिपदाद्भाष्यकारादिभिश्च । आचार्यैरवधेयवचनैः। यल्लौकिकं छन्दो मात्रावर्णविभेदेन=इदं मात्राच्छन्दः आर्यादि, इदं वर्णछन्दः समान्यादि, इतिभेदेन। द्विधा=द्विप्रकारमुक्तं तच्छन्दः। इह ग्रन्थे। कथ्यते इत्यर्थः । लौकिकशब्देन वेदवेदाङ्गाऽनधिकारिणा-

(१) 'पट्यैक' इति पाठः पञ्जिकायाम्।

मत्रैवर्णिकानामप्यस्मिन् ग्रन्थेऽधिकार इति दर्शयति । वर्णग्रहणेन च "मात्राच्छन्दो, गणच्छन्दः" इति कैश्चिदुक्तो द्वेधा विभागः पराकृतः । तादृशविभागे ह्येकाक्षराणां श्र्यादीनामसङ्ग्रहाऽऽपत्तेः । वर्णच्छन्दस्त्वेन विभागे च गणच्छन्दसामपि सङ्ग्रहादिति भावः । अन्ये तु गणमात्राऽक्षरच्छन्दस्त्वेन त्रैविध्यमाहुः । यदुक्तम्—

आदौ तावद्गणच्छन्दो मात्राच्छन्दस्ततः परम् ।
तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम् ॥ इति ।

गणच्छन्द आर्यादि, मात्राच्छन्दो वैतालीयादि, अक्षरच्छन्दः समान्यादीति । तदप्यनेन पराकृतम् । गणच्छन्दसामपि मात्राच्छन्दःसु सङ्ग्रहात् ॥ ४ ॥

अन्यकर्तृकसम्भावितच्छन्दोऽन्तरप्रक्षेपनिक्षेपनिराकरणाय ग्रन्थं परिमाणतः परिच्छिनत्ति—

षड्भ्यायनिबद्धस्य च्छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥

परि समन्तात्साकल्येन स्फुटं प्रकटं यथा स्यात्तथा षड्भिरध्यायैर्निबद्धस्य घटितस्याऽस्य च्छन्दसश्छन्दोग्रन्थस्य वृत्तरत्नाकराख्यस्य षट्त्रिंशदधिकं षट्त्रिंशत्सङ्ख्याधिकं द्वात्रिंशदक्षराणामनुष्टुप्छन्दसांश्लोकानां शतं १३६ परिमाणं ज्ञेयम् । अनुष्टुप्श्लोकपरिमाणमेवात्र गृह्यते । ग्रन्थगणनायां लोके तस्यैव प्रसिद्धत्वात् । एतेनाल्पतरग्रन्थपाठे प्रयासाभावाद्विस्तीर्णभाष्यवृत्त्यादिग्रन्थप्रयासनैरपेक्ष्येणैव प्रसिद्धसकलच्छन्दोज्ञानसिद्धेर्युत्पित्सुभिरयमेव ग्रन्थोऽभ्यसनीय इति सूचितम् ॥५

इदानीं सकलवाग्व्यापित्वेन मादीन्गणान्स्तुवँल्लक्षणकथनार्थमुद्दिशति—

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥

मगण-यगण-रगण-सगण-तगण-जगण-भगण-नगण-गुरुभिर्लान्तैर्लघुयुक्तैरेभिर्दशभिर्गणाष्टकगुरुलघुरूपैरक्षरैः समस्तं वाङ्मयं वाग्जालं व्याप्तम् । अस्तीति शेषः । अत्रोपमा विष्णुना त्रैलोक्यं यथा व्याप्तं तद्वत् । अत्र स्वरोच्चारणं सौकर्यार्थम् । एवमुत्तरत्रापि ।

वक्ष्यमाणव्यक्षरप्रस्तारक्रमोपपन्नक्रमनिर्देशकसूत्रानुरोधेनाऽयं गणक्रम उक्तः सूत्राणि तु "धी श्री स्त्री म्" (पिं. सू. २-१) वरा "सा यू",

(पिं. सू.२-२) "का गुहा र्", (पिं. सू.२-३) "वसुधा स्", (पिं. सू.२-४) "सा ते क्व त्", (पिं. स. २-५) "कदा स ज्", (पिं. सू.२-६) "किं वद भू",(पिं. सू.२-७) "न हसन्", (पिं. सू.२-८) "गृ ल्" (पिं. सू.२-९) "गन्ते" (पिं. सू.२-१०) इति ॥ ६ ॥

क्रमेण गणांल्लक्षयति—

सर्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ ।
ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥ ७ ॥

अत्र छन्दःशास्त्रेऽष्टौ त्रिकास्त्र्यक्षरा गणा भवन्ति । चतुरक्षरा गणा मा भूवन्निति त्रिका इत्युक्तम् । परिमाणे कन् । तानाह—सर्वेति । सर्वे गवो गुरवो यस्मिन्नसौ सर्वगुः । 'नामैकदेशे नामग्रहणम्' इति न्यायेन गुशब्दो गुरुवाची । एवं लशब्दो लघुवाची । एवं सर्वत्र । मो=मगणः । मुखे आदावन्तर्मध्ये लो लघुर्ययोस्तौ य-रौ=यगण-रगणौ । अन्ते गलौ गुरुलघू ययोस्तौ क्रमेण स-तौ सगण-तगणौ । ग्=गुरुर्मध्य आद्यश्च ययोस्तौ ज्-भौ जगण-भगणौ । त्रिलस्त्रिलघुर्नो नगणः । एतेषां प्रस्तारो यथा—

मः	यः	रः	सः	तः	जः	भः	नः
SSS,	।SS,	SIS,	॥S,	SSI,	।SI,	SII,	।।।,

एतेषां क्रमनियमश्च प्रस्तारे प्रकटीभविष्यति । अन्यत्रापि मादीनां स्वरूपमुक्तम्—

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥ इति ।

अन्यैस्तु देवताफलस्वरूपाण्येषामुक्तानि—

मो भूमिस्त्रिगुरुः श्रियं दिशति, यो वृद्धिं जलं चादिलो,
रोऽग्निर्मध्यलघुर्विनाशमनिलो देशाटनं सोऽन्त्यगः ॥
तो व्योमान्तलघुर्धनापहरणं, जोऽर्को रुजं मध्यगो,
भश्चन्द्रो यश उज्ज्वलं मुखगुरु,र्नो नाक आयुस्त्रिलः ॥ इति ।

इदं च फलं काव्यनायकस्य तत्कर्तुः पठितुर्वा यथायोग्यं व्यस्तं समुच्चितं वा ज्ञेयम् । यत्र नायकादिभिः प्राचीनो देवतादिः स्वकल्पितो वा तत्र कर्तुः श्रोतृणां चेत्यादि । क्वचित्तु देवतामात्रमवादि—

पृथ्वीजलशिखिवाता गगनं सूर्यश्च चन्द्रमा नाकः ।
प्रस्तारक्रमवशतो देवा ज्ञेया यथासङ्ख्यम् ॥ इति ।

गणदेवतादिकोष्ठकम्

गणनाम	मगण	यगण	रगण	सगण	तगण	जगण	भगण	नगण
स्वरूपम्	ऽऽऽ	।ऽऽ	ऽ।ऽ	॥ऽ	ऽऽ।	।ऽ।	ऽ॥	।।।
देवता	पृथ्वी	जलम्	अग्निः	वायुः	गगनम्	सूर्यः	चन्द्रः	नाकः
फलम्	श्रीः	वृद्धिः	विनाशः	भ्रमणम्	धननाशः	रोगः	सुयशः	आयुः
मित्राभित्रादिसंज्ञा	मित्रम्	भृत्यः	शत्रुः	शत्रुः	उदासीनः	उदासीनः	भृत्यः	मित्रम्

अथ यदि दैवाद् दुष्टफलो गणः काव्यादौ कृतः, तदा तद्रक्षणार्थं द्वितीयो गणः शोध्यः। तत्र मगण-नगणौ मित्रसंज्ञौ, भगण-य-गणौ भृत्यौ, ज-तावुदासीनौ, र-सावरी नीचौ च। तदुक्तम्—

म-नौ मित्रे भ-यौ भृत्यावुदासीनौ ज-तौ स्मृतौ।
र-सावरी नीचसंज्ञौ द्वौद्वावेतौ मनीषिभिः॥ इति।

तथा च यदि मित्रगणान्मित्रगणस्तदा समृद्ध्यादि फलम्, मित्रगणाद् भृत्यगणे जयादिशुभम्, मित्रादुदासीने शून्यकम्, मित्राच्छत्रौ बन्धुपीडा, भृत्यान्मित्रे तु सर्वकार्यसिद्धिः, भृत्याद् भृत्ये सर्वो लाभः, भृत्यादुदासीने धननाशः, भृत्याद्वैरिणि शोकः, उदासीनान्मित्रे किंचिदेव कार्यसिद्धिः, उदासीनाद् भृत्ये सर्वे वशाः, उदासीनादुदासीने न शुभं न चाशुभम्, उदासीनाच्छत्रौ स्वजनवैरम्, शत्रोर्मित्रे शून्यम्, शत्रोर्भृत्ये गृहिणीनाशः, शत्रोरुदासीने स्वकुलक्षयः, शत्रोः शत्रौ काव्यनायकनाशो भवति। इति गणयुगफलम्। तदुक्तम्—

मित्रान्मित्रादयः स्युर्यदि धनमुदयं शून्यकं बन्धुपीडां
भृत्यान्मित्रादयश्चेद् धृतिमधिकगुणं हानिशोकौ च कुर्युः॥
औदास्यार्थाच्च मित्रादय इह कुसुखं धैर्यमीर्ष्यां स्ववैरं
शत्रोर्मित्रादयश्चेद् भ्रममथ गृहिणीनाशमार्धिं विनाशम्॥ इति।

तथा—

मित्रान्मित्रं विधत्ते प्रचुरधनमथो मित्रतो भृत्यसंज्ञः
स्थैर्यं मित्रादुदासो न किमपि च फलं मित्रतः शत्रुसंज्ञः।
बन्धोः पीडामथो स्याद्यदि खलु नियतं भृत्यतो मित्रसंज्ञः
सर्वं कार्यं च भृत्याद् भृतगण इह चेदायतिः सर्वलोके॥

भृत्याच्चेत्स्यादुदासो धनविगममथो भृत्यतः शत्रुसंज्ञः
शोकं कुर्यादुदासाद्यदि भवति तदा मित्रसंज्ञोऽल्पकार्यम् ॥
तस्माद् भृत्यः प्रभुत्वं तत इह सततं स्यादुदासो विनाशं
तस्माच्छत्रुः स्ववैरं विविधगुणहरं सर्वसत्कार्यनाशम् ॥
शत्रोर्मित्रं च शून्यं यदि भवति ततो भृत्यसंज्ञो गृहिण्या
नाशं तस्मादुदासो धनहरमधिकं दुःखदारिद्र्यशोकम् ॥
शत्रोः शत्रुर्भवेच्चेद्द्विगणसुसहितो नायकस्यैव नाशं ।
देशोद्वासं विधत्ते कथयति च फलं पिङ्गलो नागराजः ॥ इति ।

अत एव किरात-माघ-नैषधीयेषु दुष्टफलादप्युदासीनाज्जगणादुदासीनस्य तगणस्य सत्त्वान्न शुभं न चाशुभमिति दोषाभावः ।

अथ गणशुद्धिप्रसङ्गाद्वर्णशुद्धिरुच्यते । तच्छुद्धौ हि नायकादीनां सुखं भवति तदुक्तम्—

अक्षरे परिशुद्धे तु नायको भूतिमृच्छति । इति ।

अत्र ऋ-ङ-ञ-ऋ-ट-ठ-ड-ढ-ण-प-फ-ब-भ-म-र-ल-व-ष-ह-लान्संयुक्ताक्षराणि च विहाय शेषाक्षराणि शुभफलानीति सङ्क्षेपः । तदुक्तं भामहेन—

अवर्णात्सम्पत्तिर्भवति मुदिवर्णाद्धनशता-
न्युवर्णाद्ख्यातिः सरभसमृवर्णाद्धरहितात् ॥
तथा ह्येचः सौख्यं ङ-ञ-ण-रहितादक्षरगणात्
पदादौ विन्यासाद् भ-र-ब-ह-ल-हाहाविरहितात् ॥

तथा—

कः खो गो घश्च लक्ष्मीं वितरति, वियशो ङस्तथा चः सुखं, छः
प्रीतिं, जो मित्रलाभं, भयमरणकरौ झ्-ञौ, ट-ठौ खेददुःखे ॥
डः शोभां, ढो विशोभां, भ्रमणमथ च णस्तः सुखं, थश्च युद्धं
दो धः सौख्यं, मुदं नः, सुखभयमरणक्लेशदुखं पवर्गः ॥
यो लक्ष्मीं, रश्च दाहं, व्यसनमथ ल-वौ, शः, सुखं षश्च खेदं,
सः सौख्यं, हश्च खेदं, विलयमपि च लः, क्षः समृद्धिं करोति ॥
संयुक्तं चेह न स्यात्सुखमरणपटुर्वर्णविन्यासयोगः
पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम् ॥ इति ।

तथा दुःखदारिद्र्यवाचका दुष्टाः शब्दाः काव्यादौ न प्रयोज्याः । अयं च प्रयोगनिषेधः काव्यादौ मुक्तकश्लोके चादौ ज्ञेयः । देवतादिवाचके शब्दे तु गणविचारेऽक्षरविचारे वा दोषाऽभावः ।

तदुक्तं भामहेनैव—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ इति ।

तथा च माघ-किरातयोर्जगणसंयोगयोः प्रयोगेऽपि श्रीशब्दप्रयोगादोषाभाव इत्यलं भूयसा प्रसक्तेन । प्रकृतमनुसरामः ॥ ७ ॥

इदानीं मात्राच्छन्दःसूपयोगिनो गणानाह—

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ ८ ॥

अत्र शास्त्रे आर्यादिषु छन्दःसु स्थिताश्चतुष्कलाश्चतुर्मात्राः पञ्च गणा ज्ञेयाः । प्राकट्याय स्वरूपतस्तानाह—सर्वेति । सर्वश्चान्ते मध्ये आदौ च गुरुर्येषां ते तथा । कथम्भूताः चतुर्लघुना गणेनोपेता युक्ताः । तत्र चतुर्मात्रिकत्वात्सर्वगुरुर्द्विगुरुर्लभ्यते । यथा—

सर्वगुरुः	अन्त्यगुरुः	मध्यगुरुः	आदिगुरुः	चतुर्लघुः
ऽऽ	।ऽ	।ऽ।	ऽ।	।।।
१	२	३	४	५

अयं गणक्रम आर्यानष्टोद्दिष्टयोरुपयोगीति तत्रैव वक्ष्यते । पञ्चकलादयस्तु प्राकृतप्रक्रमे वक्ष्यन्ते, संस्कृतेऽनुपयोगात् ॥ ८ ॥

गणाँल्लक्षयित्वा गुरुं लक्षयति—

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लघुः ॥९॥

असौ वर्णो गू गुरुर्ज्ञेयः । कोऽसावित्यपेक्षायामाह—सानुस्वार इति । अनुस्वारेण युक्तः अं-कं-इत्यादिः, विसर्गान्तः अः-कः-इत्यादिः, दीर्घः आ-का इत्यादिः । इदं प्लुतस्याप्युपलक्षणम् । युक्तपरो युक्तः संयुक्तः परो यस्य सः । संयोगे परभूते यः पूर्वः सोऽपि गुरुरित्यर्थः । यथा विष्णुरित्यादौ विशब्दादिः । पादान्ते श्लोकचरणान्ते वर्तमानो लघुर्गुरुर्वा भवति । लघुत्वेऽपेक्षिते लघुकार्यं, गुरावपेक्षिते गुरुकार्यं करोतीत्यर्थः । अयं च व्यवस्थितविकल्पः । तेन "अथ वासवस्य वचनेन"(कि० १२-१) (१)इत्यादावुद्गतादिपाठान्तस्य लघुतैव ।

(१) सम्पूर्णः श्लोकस्त्वित्थम्—

अथ वासवस्य वचनेन
रुचिरवदनस्त्रिलोचनम् ॥
क्लान्तिरहितमभिराधयितुं
विधिवत्तपांसि विदधे धनञ्जयः ॥ (कि० १२-१)

'तस्याः खुरन्यासपवित्रपांसुम्' (रघु० २-२)(१)इत्यादौ च गुरुतैव। युक्तपरश्चेति व्यञ्जनोपध्मानीयजिह्वामूलीयपराणामुपलक्षणम् । तथा च—'तनुवाग्विभवोऽपि सन्' (रघु.१-९)(२)'मन्दः कवियशःप्रार्थी' (रघु.१-३)(३)इत्येवमादिषु सकारस्य, जिह्वामूलीयोपध्मानीयपक्षे च दकार-शकारयोर्गुरुत्वं सिद्धं भवति। इतरथा नकारस्य पादान्तत्वात्सकारस्य न प्राप्नोति, जिह्वामूलीयोपध्मानीययोश्च संयोगत्वाभावाद्दकार-शकारयोर्न प्राप्नोति। तदुक्तम्—

दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमूष्मान्तम्।
सानुस्वारं च गुरुं क्वचिदवसानेऽपि लघ्वन्यम्॥ (पिं०सू०१-४) इति।

व्यञ्जनपरस्य गुरुत्वाल्लघ्वन्तपादेषु समान्यादिषु व्यञ्जनान्तः पादो न कार्यः। ननु "संयोगे गुरु" (पा.सू.१-४-११) "दीर्घं च" (पा.सू.१-४-१२) इति वदता पाणिन्याचार्येण पादान्तस्थादीनां गुरुसंज्ञायामनुक्तत्वात्तद्विरोध इति चेत्, मैवम्। 'कुण्डा' 'हुण्डा' इत्यादिषु "गुरोश्च हलः" (पा.सू.३-३-१०३) इत्यकारप्रत्ययस्य, 'ईहाञ्चक्रे', 'ऊहाञ्चक्रे', इत्यादिषु च "इजादेश्च गुरुमतोऽनृच्छः (पा.सू.३-१-३६)इत्याम्प्रत्ययस्य सिद्ध्यर्थं स्वशास्त्रे संयोगपरदीर्घयोर्गुरुत्वं पाणिनिः प्रत्यज्ञासीत्। अन्येषु तु स्वशास्त्रे प्रयोजनाभावान्नोचे न त्वभावादिति न किं चिदेतत्। वृत्तिकारस्तु 'गन्ते'(पि.सू.२-१०)इतिसूत्रे वाशब्दाऽश्रवणात्सर्वत्र पादान्तस्थस्य लोगुर्भवतीति व्याचख्यौ तदयुक्तम्। गुरुलघुभ्यां लघुभिरेव च समाप्तयोः समानीगीत्यार्ययोर्व्यभिचारात्। अथ तत्र लघुसमाप्तिविधायकशास्त्रेण विशेषशास्त्रेण सामान्यस्याऽस्य बाध इति मतम्, तदपि

---

(१) सम्पूर्णः लोकस्त्वित्थम्—
तस्याः खुरन्यासपवित्रपांसु-
मपांसुलानां धुरि कीर्तनीया॥
मार्गं मनुष्येश्वरधर्मपत्नी
श्रुतेरिवाऽर्थं स्मृतिरन्वगच्छत्॥ (रघु.२-२)

(२) सम्पूर्णः श्लोक एवम्—
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्॥
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥ (रघु.१-९)

(३) पूर्णः श्लोक एवम्—
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्॥
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥ (रघु.१-३)

न । सिद्धेन हि लघुना समाप्तिर्विधीयते न तु समाप्तिस्थस्य लघुत्वं येन बाधः स्यात् । "गन्ते" (पि.सू.२–१०) इति सूत्रं त्वन्ते पदान्ते स्थितो लघुः क्वचिद् गुरुरिति क्वाचित्कत्वाभिप्रायं व्याख्येयम् । तेन न तद्विरोध इत्यलं प्रपञ्चेन । प्रकृतमनुसरामः । स च प्रस्तारे वक्रः नागराक्षरेऽकारप्रश्लेष(ऽ)चिह्नवज्ज्ञेयो लेख्यः । पूर्वोक्तेभ्यः सानुस्वाराद्भ्योऽन्यः लु लघुः । कोऽसावन्यः मात्रिको मात्रारूपः । एतेन गुरोर्द्विमात्रत्वमुक्तं भवति । स प्रस्तारे कर्तव्ये ऋजु रेखाकारः (।) कार्यः ॥९॥ (१)

संयोगपरस्य गुरुत्वे क्वचिदपवादमाह—

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुताऽपि क्वचिद्गुरोः ॥ १० ॥

इह च्छन्दःशास्त्रे पादादौ चरणादौ वर्णस्य वर्णान्तरेण संयोगः क्रमसंज्ञकः । पूर्वाचार्यैरुक्त इति शेषः । तेन पादादिसंयोगेन पुरःस्थितेन क्वचिदपेक्षितविषये संयोगपरत्वाद् गुरोरपि लघुता स्यात् । 'वा पादान्ते' (वृ.र.१ ९) इत्यत्र पादान्ते लघोर्गुरुत्वं विकल्पितम् । इह तु गुरोर्लघुत्वमिति न पौनरुक्त्यमिति भावो वक्ष्यते ॥ १० ॥

गुरोर्लघुतायामुदाहरणं सप्रतिज्ञमाह इदमस्योदाहरणम्—

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥ ११ ॥

अस्य पूर्वश्लोकार्थस्य । अत्र ग्राम्यनागरिकवरागमे ग्राम्यवरे साभिलाषां चतुरवधूं निन्दागर्भस्तुत्या निवारयन्ती सख्याह—हे सुन्दरि ! ग्राम्यजनो ग्रामीणो जनोऽल्पव्ययेन मिष्टं रसवदशनमश्नाति भुङ्क्ते किं तत् तरुणं कोमलं सर्षपानां शाकम्, नवानां तण्डुलानामोदनं वाऽपर्युषितौदनं वा, पिच्छिलानि बद्धानि दधीनीति अल्पद्रव्यो मिष्टाभासभोजी ग्राम्यजनोऽचतुरोऽयम् । त्वं च सुन्दरी अतोऽमुं परित्यज्य नागरिके साभिलाषा भवेत्यत्र ध्वन्यम् । अत्र सुन्दरीत्यत्र संयोगपरत्वाद्गुरुत्वे सति तृतीये पादे त्रयोदश मात्रता माभूदिति लघुत्वं प्रतिज्ञायते । तथा च द्वादशमात्रतैवेति भावः । क्वचिदिति व्यवस्थितविकल्पार्थम् । तेन सुन्दरीत्यत्र लघुतैव ।

---

(१) अन्ये तु (⌣) गुरुरेवं (-) लघुरेवं लेख्यः । तथा च वाणीभूषणे—
गुरुस्तु द्विकलो ज्ञेयो गजदन्तसमाऽऽकृतिः ॥
लघुस्तदन्यः शुद्धोऽसावेकमात्रः प्रकीर्तितः ॥ इति

गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति ।
स्वमहिमदर्शनमक्षणोर्मुकुरतले जायते यस्मात् ॥ (वास०)
दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य(१) ।

इत्यादौ गुरुतैव । आर्यामुदाहरन्त आर्यासु पादव्यवस्थाभावं वदन्तो वृत्तिकृतः पराकृताः । अत एव

त्रिभिस्त्रिभिर्गणैः पादावार्यादेर्विषमौ स्मृतौ । इति,

"यस्याः पादे प्रथमे" (श्रु० ४) (२) इत्यादि चाभियुक्तैरुक्तं, पथ्याभिप्रायं वा, तत्र पादव्यवस्थाया वक्ष्यमाणत्वात् ।

ननु 'वा पादान्ते' (वृ० र० १-९) इत्यत्र वर्णमात्रस्य वा पादान्तस्थस्य गुरुता विकल्प्यते, गुरोरेव वा नित्यप्राप्ता सा विकल्प्यते, लघोरेव वा ? नाद्यः, पादान्तवर्णमात्रस्य तेनैव गुरुताविकल्पे पक्षे लघुत्वस्यापि सिद्धत्वात्पादादावित्यस्य वैयर्थ्यप्रसङ्गात्, लघ्वंशेऽप्राप्तविकल्पः, गुर्वंशे प्राप्तविकल्प इति विरुद्धार्थद्वयकृतवाक्यभेदप्रसङ्गाच्च । न द्वितीयः, तेनैव पाक्षिकलघुतायाः सिद्धौ पुनर्विधानवैयर्थ्यात्, 'तरुणम्' (वृ० र० १-११) इत्युदाहरण एव द्वितीयचतुर्थपादान्तयोर्लध्वोर्गुरुत्वाभावे च्छन्दोभङ्गप्रसङ्गाच्च । न तृतीयः, लघोस्तत्राप्रस्तुतत्वात्, असंयोगपरस्यापादान्तगुरोरक्रमपरत्वात्पाक्षिकलघुत्वाभावप्रसङ्गाच्चेति चेत्, अत्र पादान्तवर्णमात्रमुद्दिश्य विकल्पितं गुरुत्वं तेन विधीयत इति विधेयोद्देश्ययोरेकैकावच्छेदादर्थद्वयस्यार्थसिद्धत्वाद्वाक्यभेदाभावः पौरुषेयत्वाद्वा स न दोषः । पादादाविति च तस्यैव विषयं प्रदर्शयद्विवरणम् । तरुणमित्यादिषु गुरोर्लघुतायां तृतीयपाद उदाहरणम्, लघोर्गुरुतायां च द्वितीयचतुर्थपादयोरुदाहरणमित्यापातत उत्तरं भवति॥ वस्तुतस्त्वप्रस्तुतस्याप्यर्थतो बुद्धिस्थस्य लघोरेव गुरुता तेन विकल्प्यते । पादान्तगुरोस्तु लघुता संयोगपरस्यैवेत्यनेनैवोच्यते । अक्रमपरस्य तु पादान्तगुरोर्लघुता नेष्टैव । अत एव "गन्ते" (पि. स. २-१०) इति सूत्रे "गृ लू" (पि. सू. २-९) इति पूर्वसूत्राद् गृग्रहणमनुवर्त्य गृशब्दोपलक्षितस्य ह्रस्वाक्षरस्य पादान्ते वर्तमानस्य गुरुसंज्ञाऽतिदिश्यते इति वृत्तिकारेणोक्तम् । इदं च गु-

(१) अस्योत्तरार्धं यथा—
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ इति ।
(२) पूर्णं पद्यं यथा—
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ इति ।

रोर्लघुत्वं संयोगनिमित्तकगुरोरेव, न दीर्घादेः । अत्र सोदाहरणो मामकः सङ्ग्रहश्लोकः

युक्तपरत्वनिमित्तकप्रान्तगुरोरेव वेष्यते लघुता ।
पादान्तस्थलघोरिह गुरुता वेष्टस्य जानीहि ॥ इत्यलं प्रपञ्चेन ।

इदं चोपलक्षणं प्रशब्दे ह्रशब्दे च परतोऽपादान्तस्थस्यापि लघुतायाः कविप्रयोगे दर्शनात् । तथा च कुमारसम्भवे-"गृहीतप्रत्युद्गमनीयवस्त्रा" (कु. ७-११) (१)इति प्रशब्दे परतस्तस्य लघुता दृष्टा । माघे च--"प्राप्य नाभिह्रदमज्जनमाशु" (शि. व. १०-६०) (२) इति । अन्यत्रापि-"तव ह्रियापह्रियो मम ह्रीरभूत्" इति ह्रशब्दे परतो लघुता दृष्टा । अन्ये तु संयोगमात्रे परभूते लघुत्वमतीवतीव्रप्रयत्नतयेत्याहुः । अत एव सरस्वतीकण्ठाभरणे उक्तम्—

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ॥ (सर. १-१२३)

तथा च कविप्रयोगाः । रामायणे—

कृतार्थाश्च कृतार्थानां मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ इति ।

एवं तदार्या नृपवीरसिंह !
सीता वचः प्राह विषादयुक्तम् ॥
एतच्च श्रुत्वा गदितो मया त्वं
सीतोपलम्भे प्रकुरुष्व बुद्धिम् ॥ इति च ।

तव ह्रियाऽपह्रियो मम ह्रीरभू-
च्छशिगृहेऽपि हृतं न धृता ततः ।
बहुलभ्रामरमेचकतामसं

---

(१) तथा च सम्पूर्णः श्लोकः—

सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा ॥
निर्वृत्तपर्जन्यजलाऽभिषेका
प्रफुल्लकाशा वसुधेव रेजे ॥ (कु० ७-११)

(२) पूर्णः श्लोकस्त्वित्थम्—

प्राप्य नाभिह्रदमज्जनमाशु
प्रस्थितं निवसनग्रहणाय ॥
औपनीविकमरुन्ध किल स्त्री
वल्लभस्य करमात्मकराभ्याम् ॥ (शि० १०-६०)

मम प्रिये ! क्व समेष्यति नो पुनः ॥ इति च ।

अन्यत्र च-"धनं प्रदानेन श्रुतेन कर्णौ" इत्यादि च । प्राकृतेऽपि—

जह एहाउं ओइण्णे अब्भन्त(?)मुल्हासिअमंसुअद्धन्तम् ।
तह अ एहाआसि तुमं सच्छं गोलाणईतूहे ॥
यथा स्नातुमवतीर्णे आर्द्रीभूतमुल्लसितमंशुकार्धान्तम् ।
तथा च स्नातासि त्वं स्वच्छे गोदानदीतीर्थे ॥ इति ।

अत्र द्वितीयैकादशत्रयोविंशतिवर्णानां संयोगपरत्वाद् गुरुत्वेऽपि एहल्हादिसंयोगस्यातीवतीव्रप्रयत्नोच्चारणेन पूर्वस्य लघुतायां न च्छन्दोभङ्गो भवति । इदं च महाकविप्रयोगदर्शने भवति, न तु स्वेच्छया । अत एवाहुः—

क्वचिदपि संयुक्तपरो वर्णो लघुरत्र दर्शनेन यथा ।
परिहसति चित्तधैर्यं दारकटाक्षेषु निर्वृत्तम् ॥ इति ।

तीव्रप्रयत्ने तु गुरुरेव । "अथ प्रजानामधिपः प्रभाते" (रघु. २-२) (१) इत्यादौ । तथा इं-हिं-उं-हुं-काराणामेकारौकारयोश्च केवलयोः सव्यञ्जनयोर्वा प्राकृतादिभाषासु विभाषा गुरुता भवति । तदुक्तम्—

इ-हि-कारौ बिन्दुयुतौ ए-ओ शुद्धौ च वर्णमिलितौ च ।
रहयोर्व्यञ्जनयोगे सविभाषं सर्वमेव लघु ॥ इति ।

अत्र इ-हि-कारावित्युपलक्षणम् । इं-हिं-ए-ओ एतेषूदाहरणम्—

माणिण ' माणाह काइं फलमेओ जे चरणमिलु कन्त ।
सहजे भुअङ्गमु जइ णमइ तह किं करिअ मणिमन्त ॥
मानिनि ! मानैः किं फलमेष यच्चरणमिलितः कान्तः ।
सहजेन भुजङ्गमो यदि नमति तत्र किं क्रियते मणिमन्त्रैः ॥

अत्र इं-हिं-ए-ओ इत्येतेषां गुरुतायां दोहाच्छन्दसोऽधिकमात्रताऽऽपद्येत । रहव्यञ्जनसंयोगे तूदाहृतम् । तथा प्राकृतादिषु दीर्घस्यापि त्वरितपाठे लघुता । तथा द्वयोस्त्रयाणां वा वर्णानां त्वरितपाठे एकवर्णता भवति । तदुक्तम्—

दीर्घाक्षरमपि जिह्वा ह्रस्वं चेत्पठति तदपि भवति लघु ।
द्वौ वा त्रीनथ वर्णानेकं जानीहि शीघ्रपठनाच्च ॥ इति ।

(१) पूर्णः श्लोकस्त्वित्थम्—

अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
बनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥ (रघु० २-१)

अत्रोदाहरणमूह्यम् । अयं प्राकृतविचारः पञ्चमाध्यायान्तवक्ष्यमाण-प्राकृतच्छन्दःसूपयोगात्कृत इत्यलं बहुना ॥ ११ ॥

परिभाषान्तराण्याह—

अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः ।
ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञितः ॥ १२ ॥

लोकतो लोकव्यवहारादब्ध्यादीनां संज्ञाः सङ्केतेन संज्ञया ज्ञायन्ते इति संज्ञाः संज्ञीभूताः । चतुरादिसङ्ख्या इति यावत् । ज्ञेया यतिनियमेषु। तद्यथा—अब्धयश्चत्वारः, भूतानि पञ्च, रसाः षट् । आदिपदादृश्वा मुनयश्च सप्त, वसवो नागाश्चाष्टौ, ग्रहा नव, दिशो दश, रुद्रा एकादश, आदित्या द्वादश, इत्येवमादि ज्ञेयम् । अब्ध्यादिशब्दाः स्वपर्यायाणां स्वार्थसङ्ख्यासमानसङ्ख्यार्थानां चाप्युपलक्षकाः । तेन समुद्रवेदादयोऽपि लोकतो ज्ञेयाः । तथा छन्दःशास्त्रत्वाच्छन्दसश्चतुर्थो भागः पादो ज्ञेयः पादादिव्यवहारेषु । अंशः समचतुर्थांशोऽत्र न ग्राह्यः । किं तु यावान्यत्रोक्तः । तथा च समानां विषमाणां चोद्गतादीनां पादाः सङ्गृहीता भवन्ति । पादशब्दः स्वपर्यायाणामङ्घ्रिचरणादिशब्दानामुपलक्षकः । तथा यतिर्यतिशब्दो विच्छेदे विरामे संज्ञितः परिभाषितः संज्ञाकृतो ज्ञेयः । 'संज्ञिता' इति पाठे यतिशब्दसामानाधिकरण्यात्स्त्रीलिङ्गता ज्ञेयेति च विपरिणतानुषङ्गः । इयं च यतिस्तृतीयान्तेष्वब्ध्यादिनिर्देशेषूपतिष्ठते । साकाङ्क्षत्वात् । अब्ध्यादिसङ्ख्येयवत्तरेषु यतिः स्यादित्यर्थः । इयं च यतिः श्रुतिसौकर्यार्थं नियतस्थानेषु कार्या । यतिनियमस्थानानि च वृद्धैः सङ्गृहीतानि—

यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ॥
क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥
पूर्वान्तवत्स्वरः सन्धौ क्वचिदेव परादिवत् ।
एष्टव्यो यतिचिन्तायां यणादेशः परादिवत् ॥
नित्यं प्राक्पदसम्बद्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसम्बद्धाः प्रादयश्च परादिवत् ॥ इति ।

एषामर्थ उदाहरणेन स्पष्टीक्रियते । "यतिः सर्वत्र पादान्ते" इत्यस्योदाहरणम्—

अत्र मे सखि ! शिखण्डमण्डने
पुण्डरीककमनीयलोचने ।

श्यामतामरसदामकोमले
रामनामनि मनो मनोरमे ॥ (प्र० रा० २-२३) इत्यादि ।

प्रत्युदाहरणं तु—

नमस्तस्मै महादेवाय शशङ्कार्धधारिणे । इत्यादि ।

"श्लोकार्धे तु विशेषतः" इत्यस्योदाहरणं पूर्वोदाहरणे "दधीनि । अलप्ययेन" (वृ० र० १-११) इत्यत्र । सन्धिर्न भवति स्पष्टविभक्तिकता च भवतीति विशेषः । सन्धौ प्रत्युदाहरणम्—

श्यामा कामाकुला रामा वामा भोगाय चाप्यतेऽ—।
नेकजन्मसु पुण्यानां निचयो न चितो यदि ॥

अत्र पूर्वरूपकरणम् । स्पष्टविभक्तिकतायां प्रत्युदाहरणम्—

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी—।
पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम् ।

अत्र समासकरणम् । "समुद्रादौ" इत्यत्रोदाहरणम्—"तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी" (मे० १-२)(१) इति । अत्र मन्दाक्रान्तायां चतुर्षु स्पष्टविभक्तिकता । ततः षट्स्वव्यक्तविभक्तिकता । 'पादान्ते' इत्यस्यापि विशेषणं "व्यक्ताव्यक्तविभक्तिके" इति । तत्रोभयोदाहरणम् —

स्यन्दने गरुडकेतुलाञ्छने
कुण्डिनेशतनयाधिरोपिता ।
केन चिन्नवतमालकोमल-
श्यामलेन पुरुषेण नीयते ॥

क्वचिदिति । समुद्रादौ या यतिः सा पदमध्येऽपि क्वचिद्भवति । यदि पदस्य यत्यपेक्षया पूर्वपरभागावेकवर्णौ न भवत इत्यर्थः । अत्रोदाहरणम्—"पर्याप्तं तमचामीकरकटकतटे श्लिष्टशीतेतरांशौ" इति । समुद्रादावित्युक्तेः पादान्तयतिः पदमध्ये न भवति । प्रत्युदाहरणम्—

"प्रणमत भवबन्धक्लेशनाशाय नारा-
यणचरणसरोजद्वन्द्वमानन्दहेतुम्" ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु यतिर्दोषाय । सा च धातुनामप्रत्ययाऽव्ययभागभेदेन चतुर्धा । तत्र क्रमेणोदाहरणानि—"एतासां राजति

---

(१) सम्पूर्णः श्लोकस्त्वित्थम्—

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ॥
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ (मे० १-२)

सुमनसां दाम कण्ठावलम्बि", "स्वीकुर्वन्ति हि सुधियः प्रकुर्वते च", "दुःसोढो दाशरथिमहिमा राक्षसानां बभूव", "सुरासुरशिरोनिघृष्टचरणारविन्दः शिवः", "स्खलति सुरवधूकल्पासु रामासु को न", "भुवि सुरगुरुदेशीयाः कियन्तो न सन्ति", "कलिवशविवशः सम्प्रत्ययं जीवलोकः" "रामेशं वा प्रतिदिनमुताहो रमेशं भजामः" । एवमन्यान्यपि सङ्कीर्णान्युदाहरणानि ज्ञेयानि । "पूर्वान्तवत्स्वरः सन्धौ" इत्यस्यार्थः योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ सवर्णदीर्घादिः, स प्रायः पूर्वान्तवत्क्वचिदेव परादिवच्च द्रष्टव्य इति । अत एव "अन्तादिवच्च" (पा० सू० ६-१-८५) इति पाणिनिः सस्मार । पूर्वान्तवद्भावे यथा—"कस्ते दारिद्र्यदावानल ! वदतु यशो वावदूकोऽपि दाने" "स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा" (मे. १-५१)(१)

परादिवद्भावे यथा—"अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना" (वेणी० ३-९) (२) अत्र स्वरस्य परादिवद्भावे व्यञ्जनमपि परादिवद्भवति । तद्भक्तत्वात् ।

यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ । इति ।

पूर्वान्तवत्स्वरः सन्धावित्यादेरपि शेषः । तेन—"अस्या वक्त्राब्जमवजितपूर्णेन्दुशोभं विभाति" इत्यादौ यतिर्दुष्यति । तत्रापि पूर्वभागस्यैवैकवर्णतायां दोषः न तूत्तरस्य। तदर्थमेव स्वरसन्धावनेनापवादकरणात्। यणादेशः परादिवदित्यत्रोदाहरणम्—"समाकूपारपारप्रथितपृथुयशस्यर्थिसार्थे कृतार्थे" । व्यञ्जनस्यापि परादिवद्भाव इष्यते ।यथा--"इत्यौत्सुक्या-

(१) सम्पूर्णः श्लोकस्त्वित्थम्—

तस्याः पातुं सुरगज इव व्योम्नि पश्चाऽर्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ॥
संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया ऽसौ
स्यादस्थानोपगतयमुनासङ्गमेवाऽभिरामा ॥ (मे० १-५१)

(२) सम्पूर्णः श्लोक एवम्—

किं भीमाद् गुरुक्षिणां गुरुगदां भीमप्रियः प्राप्तवान्
अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना ॥
गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापितः
शङ्के नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम् ॥(वेणी० ३-९)

दपरिगणयन्गुह्यकस्तं ययाचे"(मे०१-५)(१) इति । "नित्यं प्राक् पदसम्बद्धा" इति । तेभ्यः पूर्वा यतिर्न कार्येत्यर्थः । यथा—"बाले भूपतिमौलिलालितपदद्वन्द्वत्ववृद्धेऽपि च" । आदिपदात् "रत्नोभिः सुरमनुजैर्दितेः सुतैर्वा" । प्रत्युदाहरणं तु—

नमः शिवाय कृष्णाय च दानवविनाशिने ।

"नित्यं प्राक्पदसम्बद्धा" इति किम् ? "तथाऽऽद्रियन्ते न बुधाः सुधामपि" (नै० १-१)(२) । चादय इति किम् ?

सम्पत्तिः सैव रमणीसखैर्या भुज्यते भुवि ।

अत्र समासन्तटच्प्रत्ययान्तसखिशब्दस्य नित्यं प्राक्पदसम्बद्धत्वेऽपि यतिर्न दुष्यति । "परेण नित्यसम्बद्धा" इति । परादिति तेभ्यः परा यतिर्न भवतीत्यर्थः । "प्रस्मृतः किमथवा पठितो नु" (नै० ५-१२१) (३) आदिपदात् "निजगृहे जयिनं तिसृणां पुराम्" परेण नित्यसम्बद्धा इति किम् ? कर्मप्रवचनीयेभ्यः पराऽपि यतिर्भवन्विति । यथा—

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।

प्रादय इति किम् ?

"रात्तसाधिपबलं प्रणाशया-
श्चक्रतू रघुवरौ वरौ रणे" ।

अयं त्वनेकात्तराणां चादीनां प्रादीनां चादिवद्भावः पादान्तयतावे-

---

(१) पूर्णः श्लोक एवम्—

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ॥
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥ (मे० १--५)

(२) पूर्णः श्लोक एवम्—

निपीय यस्य क्षितिरक्षिणः कथा--
स्तथाऽऽद्रियन्ते न बुधाः सुधामपि ॥
नलः सितच्छत्रितकीर्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥ (नै० १-१)

(३) पूर्णः श्लोक एवम्—

नात्तराणि पठता किमपाठि
प्रस्मृतः किमथवा पठितोऽपि ॥
इत्थमर्थिजनसंशयदोला-
खेलनं खलु चकार नकारः ॥ (न० ५-१२१)

वेष्यते । एकाक्षराणां तु पादान्तयतौ पादमध्ये समुद्रादियतौ च । तदुक्तं कविकल्पलतायाम्—

एकस्वरोपसर्गेण विच्छेदः श्रुतिसौख्यकृत् । इति ।

पादान्ते यतौ प्रत्युदाहरणं तत्रैवोक्तम्—

यथा—पिनाकपाणिं प्रणमामि स्मरशासनम् । इति ।

पादमध्ययतौ प्रत्युदाहरणम्—"विष्णुं रुद्रं च खलु भजतां नैव संसारबन्धः" अनेकाक्षराणां तु पादमध्ये चामीकरादिष्विव पूर्वापरभागयोरेकवर्णत्वाद्यतिरिष्टैव । तत्र चादीनां यथा—"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्" (मे० २-३२) (१)इत्यादि । प्रादीनां यथा—"दूरारूढप्रमोदं हसितमिव परिस्पृष्टमाशासखीभिः"। अत्र "नित्यं प्राक्पदसम्बद्धा" इत्यत्र च"स्वादु स्वच्छं च सलिलमिदं प्रीतये कस्य न स्यात्" इति । "नित्यं प्राक्पदसम्बद्धा इति किम् ? "मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः" (मे० १-३८) (२) इति । "परेण नित्यसम्बद्धा" इत्यत्र च "दुःखं मे प्रक्षिपति हृदये दुःसहस्तद्वियोगः" इत्यादि वृत्तिकारैः समुद्रादियतिरुदाहृता । अन्ते च अयं तु पादान्तयतावन्तादिवद्भाव इष्यते, न तु पादमध्ययतौ" इत्यादि स्वयमेवोक्तं तद्विचारणीयम् । तथा—

अनुक्तयतिकेऽप्येवं कार्या श्रुतिसखा यतिः ।

तदुक्तं कविकल्पलतायाम्—

एवं यथा यथोद्वेगः सुधियां नोपजायते ।
तथा तथा मधुरतानिमित्तं यतिरिष्यते ॥

शुक्लाम्बरादयस्तु पादान्त एव यतिमाहुः । भरतादयस्तु यतिमेव नेच्छन्ति । अत एव कविप्रयोगाः । तत्र भर्तृहरेः—

लभेत सिकतासु तैलमपि यत्नतः पीडयन्

---

(१) पूर्णः श्लोक इत्थम्—

रुद्धाऽपाङ्गप्रसरमलकैरञ्जनस्नेहशून्य
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ (मे० २-३२)

(२) पूर्णः श्लोक एवम्—

तां कस्यां चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ॥
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥ (मे० १-३८)

पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ (नी०श०५) इति ।

जयदेवस्यापि—"भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि" (गी०गो०१२-१२)(१) इति । तदुभयं बहुविरोधाच्चिन्त्यम् । इयं च यतिर्वृत्तस्वरूपाद्भिन्नाऽपि गुणालङ्काराद्यपेक्षयान्तरङ्गाङ्गत्वात्सूत्रकारादिभिर्लक्षणमध्ये निबद्धा, न तु वृत्तस्वरूपतया । मात्रागुरुलघुनियमनं हि वृत्तलक्षणं, विरामात्मकत्वं च यतेः । अत एव वामनेन काव्यालङ्कारसूत्रेषु "न वृत्तदोषान्पृथग्यतिदोषो वृत्तस्य यत्यात्मकत्वात्" (वा०सू० २-२-५) इत्याशङ्क्य "न लक्ष्मणः पृथक्त्वात्" (वा०सू०२-२-६) इति परिहृतमित्यलम् ॥ १२ ॥

परिभाषान्तरमाह—

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते ॥

समं द्वितीयचतुर्थादिस्थानं युगिति सद्भिर्निगद्यते कथ्यते । विषमं चैक आदि स्थानं सद्भिरयुक् निगद्यते । चकारात्समस्य युग्मानोजसंज्ञे विषमस्य युग्मौजसंज्ञे इत्यादि ज्ञेयम् ।

पदैः पादाख्यैर्घटितं पद्यम् । तद् द्विविधम्-जातिर्वृत्तं चेति । जातिर्नियतमात्रिका । वृत्तं नियतगुरुलघुविन्यासम् । तत्र जातिरार्यादि । वृत्तमुक्तादि समार्धसमविषमात्मकम् । तदुक्तम्—

पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ इति ।

इत्येतत्सर्वं मनसि निधाय वृत्तस्य भेदानाह—

समर्धसमं वृत्तं विषमं च तथापरम् ॥ १३ ॥

समाख्यमर्धसमाख्यं विषमाख्यं चेति त्रिधा वृत्तमित्यर्थः ॥ १३ ॥

त्रिविधस्यापि वृत्तस्याऽन्वर्थसंज्ञामाश्रित्य क्रमेण स्वरूपमाह श्लोक-

(१) पूर्णः श्लोक एवम्—
साध्वी माध्वीक ! चिन्ता न भवति भवतः शर्करे ! कर्कशासि
द्राक्षे ! द्रक्ष्यन्ति के त्वाममृत ! मृतमसि क्षीर ! नीरं रसस्ते ॥
माकन्द ! क्रन्द कान्ताऽधर ! धर न तुलां गच्छ यच्छन्ति यावत्
भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि॥ (गी०१२-१२)

त्रयेण—

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ॥
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥
प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५ ॥
यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ॥
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १६ ॥

यस्याङ्घ्रयः पादाश्चत्वारोऽपि तुल्येन लक्षणेन लक्षिता युक्ताः, तच्छन्दःशास्त्रविशारदाश्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं वदन्ति । द्वितीयश्चरणस्तुर्यवच्चतुर्थवत् । तथा चार्धं समं यस्य तदर्धसममित्यन्वर्थसंज्ञा । यस्य पादचतुष्टयेऽपि परस्परं लक्ष्म लक्षणं भिद्यते तद्विषममाहुः, विगतं समं यस्मादिति व्युत्पत्तेः । तत्र समं पथ्यादि, अर्धसमं द्रुतमध्यादि, विषमं पदचतुरूर्ध्वादि ॥ १४ । १५ । १६ ॥

तत्र समवृत्तभेदानाह—

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः ॥
पृथक्छन्दो भवेत्पादैर्यावत्षड्विंशतिं गतम् ॥ १७ ॥

एकाक्षरं पादमारभ्यैकेनाक्षरेण कविना वर्धितैः पादैः कृत्वा पृथग्भिन्नं भिन्नं छन्द उक्तादि भवेत् । वृद्ध्यवधिमाह—यावदिति । यावत्षड्विंशतिं २६ षड्विंशतिसङ्ख्याकं पादं प्रति गतं गमनं भवति । षड्विंशत्यक्षरपादपर्यन्तं वृद्धिर्भवतीत्यर्थः ॥ १७ ॥

अधिकाक्षरपादस्य छन्दसः संज्ञामाह—

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ।

षड्विंशत्यक्षरपादाच्छन्दस ऊर्ध्वं सप्तविंशत्याद्यक्षरपादं छन्दश्चण्डवृष्ट्यादिदण्डकसंज्ञं भवति । सप्तविंशत्यक्षरादेकैकेन रगणादिना वृद्धिः, न त्वेकैकाक्षरेण । आदिपदादर्णवादिः ॥

इह शास्त्रे विशेषलक्षणेनाऽलक्षितस्य छन्दसः कविभिश्च ग्रथ्यमानस्य

सामान्यसंज्ञामाह—

शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥ १८ ॥

शेषं विशेषनिरूपितादन्यत् । तदेवाह—त्रिभिरिति । क्वचित्त्रिभिः, क्वचित्षड्भिः, चकारादृशभिर्विलक्षणगुरुलघुक्रमवद्भिर्न्यूनाधिकाक्षरैश्च चरणैर्युक्ता यास्ता गाथा ज्ञेया इत्यर्थः ॥ १८ ॥

पूर्वोक्तानामेकाक्षरपादमारभ्य षड्विंशत्यक्षरपादावधिकानां छन्दसां सामान्यतो जातिसंज्ञा आह—

उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ १९ ॥
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता ॥
शक्वरी साऽतिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥२०॥
धृतिश्चाऽतिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥
विकृतिः सङ्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः ॥२१॥

एकाक्षरपादा 'उक्ता' नाम । इयं च जातिसंज्ञा । अवान्तरसंज्ञास्तु वक्ष्यन्ते । एवमितरत्रापि द्व्यक्षरपादा 'अत्युक्ता' । एवं शेषा अपि ज्ञेयाः। अन्या सुपूर्विका, अनन्तरोक्ता प्रतिष्ठैव, सुपूर्वा सती सुप्रतिष्ठा नामाऽन्या जातिरित्यर्थः । साऽतिपूर्वेति । सा शक्वर्यतिपूर्वा । अतिशक्वरीत्यर्थः । ननु सूत्रकारेण समच्छन्दसां गायत्र्यादीनामेवोक्तत्वादुक्ताद्युक्तेरुत्सूत्रत्वमिति चेन्न । "ढिकाग्लो" (पि०सू०) इत्यादिसूत्रोक्तैकाक्षरादिप्रस्तारस्य तत्संज्ञायां ज्ञापकत्वात् । कविभिः प्रायेऽणाप्रयुक्तत्वात्तेषां लक्षणावसरेऽनुक्तिरिति भावः । ताः—१ उक्ता, २ अत्युक्ता, ३ मध्या, ४ प्रतिष्ठा, ५ सुप्रतिष्ठा, ६ गायत्री, ७ उष्णिक्, ८ अनुष्टुप्, ९ बृहती, १० पङ्क्तिः, ११ त्रिष्टुप्, १२ जगती, १३ अतिजगती, १४ शक्करी, १५ अतिशक्करी, १६ अष्टिः, १७ अत्यष्टिः, १८ धृतिः, १९ अतिधृतिः २० कृतिः, २१ प्रकृतिः, २२ आकृतिः, २३ विकृतिः, २४ सङ्कृतिः, २५ अतिकृतिः, २६ उत्कृतिः । अत्र प्रतिपादमेकैकाक्षरवृद्धौ सकले छन्दसि चतुरक्षरा वृद्धिर्भवति । तत्रोक्ता चतुरक्षरा । अत्युक्ताऽष्टाक्षरा । एवमुत्तरत्रापि । उत्कृतिश्चतुरधिकशताक्षरा ॥ १९ । २० । २१ ॥

उक्तादिभेदज्ञानोपयोगि कोष्ठकम् ।

क्रमाङ्कः	१	२	३	४	५	६	७	८	९
जाति-नाम	उक्ता	अत्युक्ता	मध्या	प्रति-ष्ठा	सुप्र-तिष्ठा	गाय-त्री	उष्णि-क्	अनु-ष्टुप्	बृहती
अक्षरस-ङ्ख्या	१	२	३	४	५	६	७	८	९
जातिभेद सङ्ख्या	२	४	८	१६	३२	६४	१२८	२५६	५१२
सम्पूर्णा अक्षर-सङ्ख्या	४	८	१२	१६	२०	२४	२८	३२	३६

तदग्रिमम् ।

क्रमाङ्कः	१०	११	१२	१३	१४	१५	१६	१७
जाति-नाम	पङ्क्तिः	त्रिष्टुप्	जगती	अति-जगती	शक्करी	अतिश-क्करी	अष्टिः	अत्यष्टिः
अक्षरस-ङ्ख्या	१०	११	१२	१३	१४	१५	१६	१७
जा.भे.सं.	१०२४	२०४८	४०९६	८१९२	१६३८४	३२७६८	६५५३६	१३१०७२
सम्पूर्णा अक्षरस-ङ्ख्या	४०	४४	४८	५२	५६	६०	६४	६८

तदग्रिमम् ।

क्रमाङ्कः	१८	१९	२०	२१	२२	२३
जाति-नाम	धृतिः	अतिधृतिः	कृतिः	प्रकृतिः	आकृतिः	विकृतिः
अ०सं०	१८	१९	२०	२१	२२	२३
जा.भे.सं.	२६२१४४	५२४२८८	१०४८५७६	२०९७१५२	४१९४३०४	८३८८६०८
सं.अ.सं.	७२	७६	८०	८४	८८	९२

तदग्रिमम् ।

क्रमाङ्कः	२४	२५	२६
जातिनाम	सङ्कृतिः	अतिकृतिः	उत्कृतिः
अ० सं०	२४	२५	२६
जा.भे.सं.	१६७७७२१६	३३५५४४३२	६७१०८८६४
सं.अ. सं.	९६	१००	१०४

उक्तानुवादपूर्वकं वक्तव्यमाह—

इत्युक्ताश्छन्दसां संज्ञाः क्रमतो वच्मि साम्प्रतम् ॥
लक्षणं सर्ववृत्तानां मात्रावृत्ताऽनुपूर्वकम् ॥ २२ ॥

इति श्रीकेदारभट्टविरचिते वृत्तरत्नाकरे संज्ञाभिधानो नाम प्रथमोऽध्यायः ॥

छन्दसामित्यमुना प्रकारेण जातिसंज्ञा उक्ताः । साम्प्रतमिदानीं मात्रावृत्ताऽनुपूर्वकं मात्रावृत्तमादितः कृत्वा सर्वेषां वृत्तादीनामुक्तानां क्रमशः क्रमेण लक्षणं वच्मि वदामीति योजना । प्रथमं मात्रावृत्तमुच्यते । तत उद्देशक्रमेण वर्णवृत्तमुच्यत इत्यर्थः ॥ २२ ॥

इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्भट्टरामेश्वरसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां परिभाषाऽध्यायः प्रथमः ।

द्वितीयोऽध्यायः ।

अथ मात्रावृत्तानि विवक्षुः प्रथममार्यां लक्षयति-लक्ष्मतदिति-द्वयेन ।

लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः ॥
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥(१)

---

(१) षष्ठजगणवत्या आर्याया उदाहरणान्तरं यथा मम (वरकलवैद्यनाथस्य)—

अं.गु. १ नलघू २ स.गु. ३ नलघ ४ स.गु. ५ ज. ६ स.गु. ७ गु. ८

अरुणा-रुणकिर-णाली—ललितत—मं सा—मरस्य—माप—ञम् ॥
।।ऽ, ।।।।, ऽऽ, ।।।।, ऽऽ, ।ऽ।, ऽऽ, ऽ,

स.गु. १ स.गु. २ अं.गु. ३ स.गु. ४ स.गु. ५ ल. ६ स.गु. ७ गु. ८

तत्त्वाऽ- तीतं किमपि स्थानं शैवं स—दा पा—तु ॥
ऽऽ, ऽऽ, ।।ऽ, ऽऽ, ऽऽ, ।, ऽऽ, ।,

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदानियमः ॥
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥ (१)

आर्यायाः प्रथमेऽर्धे एतन्नियतं सार्वत्रिकं लक्ष्म लक्षणं ज्ञेयम् । किं तत् । सप्तसङ्ख्याका गोपेता गुरुणा युक्ता गणाश्चतुर्मात्राः पूर्वोक्ताः । गुरूपेतत्वोक्तया यद्यपि "स्वरा अर्धं चार्यार्धम्" (पिं०सू०) इति सूत्रे अर्धं चेति ग्रहणात्सार्धाः सप्त गणा भवन्तीति सामान्यत उक्तम्, तथाप्यर्धगणस्थाने एको गुरुरेवान्ते कार्यः, न तु लघ्वयमिति सचितम् । इहार्यार्धे । विषमे प्रथमतृतीयादौ । स्थाने जो जगणो मध्यगुरुर्गणो न कार्यः । षष्ठस्त्वयं जगणः कार्यः । नलघू वा कार्यौ । नश्च लघुश्चेति नलघू । चतुर्लघुर्वा गणः कार्य इत्यर्थः । अन्ये तु स्वेच्छया ज्ञेयाः । षष्ठे इति । द्वितीयलादित्यतः परं पूर्वमिति शेषः । षष्ठे न्ले षष्ठस्थाने चतुर्लघौ गणे कृते सति द्वितीयलात्तस्यैव षष्ठस्य चतुर्लघोर्गणस्य द्वितीयलघोः पूर्वं प्रथमलघ्वनन्तरं सयतिपदनियमो यतिसहितं पदं नियमेन समाप्यत इत्यर्थः । 'न्ले' इति प्रथमाद्विवचनं वा । ततश्च षष्ठे स्थाने यदि न्ले नलघू स्याताम्, तदा द्वितीयलात्पूर्वं यतिरित्यर्थः । परके न्ल, न-ले षष्ठापेक्षया परस्मिन्सप्तमे चतुर्लघौ कृते सति, मुखलात्सप्तमस्य प्रथमलघोः पूर्वं षष्ठगणान्ते सयति पदं नियम्यते । चरमे द्वितीये पुनरर्धे पञ्चमके न्ले चतुर्लघौ तस्मान्मुखलघोः पूर्वम्, अर्थाच्चतुर्थान्ते, पदं समाप्यत इत्यनुषङ्गेण पूर्वपदाध्याहारेण च योज्यम् । इहेति । इहार्याचरमार्धे षष्ठो गणो लो लघुरेव भवति । न चतुर्मात्रिक इति पूर्वार्धाद्विशेषः । उत्तरार्धे एतावन्मात्रं विशेषं वदताऽन्यत्पूर्वार्धलक्षणमेव भवतीति द्योतितम् । यतिनियमं छन्दोमाणिक्यकारोऽप्याह—

पूर्वार्धे षष्ठो जः खो वा खे चास्य लघुनि भवति यतिः ।
षष्ठः खपरोऽत्र यतिस्तुर्योऽप्यथ भवति चरमदले ॥ इति ।

(१) षष्ठनलघुपक्षे आर्योदाहरणं यथा छन्दोमञ्जर्याम्—

स.गु. १ ज. २ स.गु. ३ स.गु. ४ अं.गु. ५ नलघू.६ अं.गु.७ गु. ८

वृन्दा—वने स—लीलं वल्गु—द्रुमका—एडनिहित—तनुय—ष्टिः ॥
ऽऽ, ।ऽ।, ऽऽ, ऽऽ, ।।ऽ, ।।।।, ।।ऽ, ऽ,

आ.गु.१ आ.गु.२ स.गु. ३ स.गु. ४ नलघू५ ल. ६ स.गु. ७ गु. ८

स्मेरमु—खार्पित—वेणुः कृष्णो यदि मन—सि कः स्व——र्गः ॥
ऽ।।, ऽ।।, ऽऽ, ऽऽ, ।।।।, ।, ऽ ऽ, ऽ,

अस्यार्थः-ख इति चतुर्लघोर्गणस्य संज्ञा । पूर्वार्धे षष्ठो गणो जगणः खो वा कार्यः । खे तु षष्ठे गणे, अस्य लघुनि तदीयप्रथमलघ्वन्ते यतिर्भवति । यदि षष्ठः खपरः = खश्चतुर्लघुः परो यस्य स तथा सप्तमश्चतुर्लघुः स्यादित्यर्थः । तदात्र षष्ठान्ते वा यतिः । चरमदले = द्वितीयार्धे यदि तुर्यश्चतुर्थः खपरस्तत्रापि चतुर्थान्ते यतिरिति । यद्वा मूले पञ्चम्यो ल्यब्लोपे । तेन द्वितीयलमादाय सयतिपदनियमः, सयतिकपदप्रारम्भनियम इत्यादिरर्थः । उभयथापि लक्ष्येऽविसंवाद एव । किं त्वेतस्मिन्व्याख्याने "न्लौ चेत्पदं द्वितीयादि" (पिं.सू. ४-१८) "सप्तमः प्रथमादि" (पिं.सू. ४-१९) इति सूत्रानुग्रहो भवति । पूर्वपदाध्याहारश्च कर्तव्यो न भवति । अत एव क्षेत्रराज आह—

षष्ठे द्वितीयमादाय लमेवारभ्यते पदम् ।
सप्तमे न्ले पुनर्मुख्यं पूर्वार्धेऽसौ यतिः स्मृता ॥
पदमारभ्यते नित्यं गृहीत्वा प्रथमं लघु ।
पञ्चमे न्ले बुधैरेवं चरमार्धे स्मृता यतिः ॥ इति ।

छन्दोमाणिक्यं त्वार्थसूत्रार्थकथनेनापि सङ्कुच्यते । अत्र यतिमात्रे नियते सति चामीकरान्वितपूर्वापरभागयोरनेकाक्षरत्वे पदमध्ये यतिर्मा भूदिति पदस्यापि नियम उक्तः । तत्र स्पष्टास्पष्टविभक्तिकत्वयोर्न विशेषः । अत्र प्रथमाऽऽर्या षष्ठजगणपक्षे सामान्यलक्षणोदाहरणम् । षष्ठस्य चतुर्लघुत्वे पूर्वार्धद्विविधयतौ च द्वितीयाऽऽर्यापूर्वार्धमुदाहरणम् । उत्तरार्धयतेस्तल्लक्षणस्य तदुत्तरार्धमिति विवेकः । अत्र विषमे जगणनिषेधात्प्रत्येकं चत्वारो विकल्पाः । यथा—

१ २ ३ ४
ऽऽऽ, ॥ऽ, ऽ॥, ॥॥ इति । समस्थाने तु जगणस्याऽनिषेधात्प्रत्येकं पञ्च।
१ २ ३ ४ ५
यथा-ऽऽऽ, ॥ऽ, ।ऽ।, ऽ॥, ॥॥, इति । ततश्च पूर्वार्धे प्रथमे भेदाः ४, द्वितीये ५, तृतीये ४, चतुर्थे ५, पञ्चमे ४, षष्ठे २ जन्लयोरेव विकल्पमात् । सप्तमे ४, अष्टमे गुरुरेकः । एतेषामन्योन्यगुणने द्वादश सहस्राणि, अष्टौ शतानि पूर्वार्धभेदाः । उत्तरार्धे तु षष्ठे लघुनियमनात्तदतिरिक्तं सर्वं पूर्ववदेव । (१) तथा चान्योन्यगुणने षट्सहस्राणि चत्वारिंशतानि भेदा उत्तरार्धे । उभयविकल्पानां परस्परगुणनेऽष्टौ कोटय एकोनविंशतिर्लक्षाणि

(१) तथा हि—प्रथमे भेदाः ४ द्वितीये ५ तृतीये ४ चतुर्थे ५ पञ्चमे ४ षष्ठे लघुरेकः सप्तमे ४ अष्टमे गुरुरेकः । एवं च ४×५×४×५×४×४ परस्परगुणने षट् सहस्राणि चत्वारि शतानि उत्तरार्धभेदाः ।

विंशतिः सहस्राणि । इयमार्याणां भेदसङ्ख्या । अङ्कतोऽपि ८१९२०००० । तदुक्तम्—

जगणविहीना विषमे चत्वारः, पञ्च युजि, चतुर्मात्राः ।
षष्ठे द्वाविति च गणास्तथाऽङ्कतः प्रथमदलसङ्ख्या ॥
एवमपरार्धसङ्ख्या षष्ठे स्याल्लघुनि चैकस्मिन् ।
आर्यासङ्ख्योभयदलसङ्ख्याघाताद्विनिर्दिष्टा ॥ इति ॥ २ ॥

अत्रैव प्रसङ्गादार्यासु नष्टोद्दिष्टे उच्येते—

लोके प्रसिद्धनामा सीमा विद्याविनोदविभवानाम् ।
जयतोह शुद्धचरितो रामेशाख्यो गुरुः काश्याम् ॥

यदा कश्चिज्जिज्ञासेतेयमार्या कतिथेति, तदास्या गणान्स्थापयेत् । गणाधश्चतुः पञ्चादिकं सङ्ख्याविकल्पं यथासङ्ख्यं स्थापयेत् । तत उपान्त्यमन्त्येन हत्वेष्टाद्धिकल्पादधस्तनाञ्शेषान्विकल्पसङ्ख्यापूरकान्विकल्पानपनीय शेषया सङ्ख्यया तदाद्यं गणविकल्पाङ्कं हत्वा इष्टविकल्पाधस्तनविकल्पान्राशेरपनीय शेषाङ्कं पूर्वपूर्वेण गुणयित्वेष्टविकल्पाधस्तनविकल्पाङ्कं पातयेत् । एवं यावदाद्यगणं कुर्यात् । शेषसङ्ख्ययाऽऽर्यासङ्ख्यां जानीयात् । अत्र सर्वगुर्वन्तगुरुमध्यगुर्वादिगुरुसर्वलघुक्रमेणावस्थानेऽधस्तनत्वं ज्ञेयम् । अत्र न्यासः—

१	२	३	४	५	६	७	८ गु.
लोके	प्रसिद्ध-	नामा	सीमा	विद्या-	विनोद-	विभवा-	नाम् ॥
ऽ ऽ,	। ऽ ।,	ऽ ऽ,	ऽ ऽ,	ऽ ऽ,	। ऽ ।,	ऽ । ।,	ऽ,
४	५	४	५	४	२	४	१

१	२	३	४	५	६	७	८ गु.
जयती-	ह शुद्ध-	चरितो	रामे-	शाख्यो	गु-	रुः का-	श्याम्॥
। । ऽ,	। ऽ ।,	। । ऽ,	ऽ ऽ,	ऽ ऽ,	। ,	ऽ ऽ,	ऽ,
४	५	४	५	४	१	४	१

अत्रान्ते न्यस्तस्याऽर्धगणस्य विकलपाभावादधस्तनकाङ्कस्य द्वितीयाऽर्धे सप्तमाधस्तनैश्चतुर्भिर्गुणने जाताश्चत्वारः । सप्तमस्येष्टस्य सर्वगुरुत्वात्तस्याधस्तनान् ज (।ऽ।) गणव्यतिरिक्तानन्तगुर्वादिगुरुसर्वलघूंस्त्रींश्चतुर्षु पातयेत् । शेष एकः । षष्ठस्य लघुमात्ररूपत्वाद्विकलपाऽभावः । पञ्चमाधस्थचतुर्भिरेकगुणने तत्राऽपि पूर्ववत्त्रयाणां त्यागे शेषस्यैकस्य चतुर्थाधस्थपञ्चभिर्हतौ चतुर्षु पातितेषु शेषस्यैकस्य तृतीयाधस्थैश्चतुर्भिर्हतौ शेषयोर्द्वयोस्त्यागे शेषद्वयस्य द्वितीयस्थैः पञ्चभिर्हतौ द्वये त्यक्ते शेषा अष्टौ । तेषां प्रथमस्थैश्चतुर्भिर्हतौ जगणातिरिक्ते द्वये त्यक्ते त्रिंशत् । एवमुत्तरार्धम् । पूर्वार्धान्त्यगणार्धं त्वविकलपम् । सप्तमस्थैश्चतुर्भिस्त्रिंशतो द्वये पातिते शतमष्टादशाधिकम् । तस्य षष्ठस्थाभ्यां द्वाभ्यां हतौ एकस्य त्यागे पञ्चत्रिंशदधिकं शतद्वयं शिष्टम् । तस्य पञ्चमस्थैश्चतुर्भिर्हतौ त्रिषु पातितेषु शिष्टा सप्तत्रिंशदधिका नवशती । तस्यां चतुर्थस्थैः पञ्चभिर्हतायां चतुर्णां त्यागे एकाशीत्यधिकानि षट्चत्वारिंशच्छतानि । तेषु तृतीयस्थैश्चतुर्भिर्हतेषु त्रिषु पातितेषु अष्टादशसहस्राणि एकविंशत्यधिकानि सप्तशतानि च । तेषां द्वितीयस्थैः पञ्चभिर्हतौ द्वयोरपाये सहस्राणां त्रिनवतिस्त्र्यधिका षट्शती च । तस्यां प्रथमस्थैश्चतुर्भिर्हतायां त्रयत्यागे सिद्धोऽङ्को लक्षत्रयं चतुःसप्ततिः सहस्राणां नवाधिकानि चत्वारि शतानि च । अङ्कतोऽपि ३७४४०९ । एतावत्सङ्ख्येयं पूर्वोक्ताऽऽर्या भवति । तदुक्तम्—

गणानुद्दिष्टगाथायाः संस्थाप्य तदधो लिखेत् ।
चतुःपञ्चादिकां सङ्ख्यां स्थानस्थानोचितां ततः ॥
हत्वा हत्वाद्यमन्त्येन चोपरिस्थगणादधः ।
पृथग्घातगणेभ्योऽथ गणसङ्ख्यां विकलपयेत् ॥
हताद्यार्योचिता तावद्यावदाद्याङ्कसम्भवः ।
तत्सङ्ख्यामुद्दिशेद्गाथामुद्दिष्टप्रत्यये बुधः ॥ इति ।

इत्यार्योद्दिष्टविधिः ॥

अथ तन्नष्टम् । यदा लक्षत्रयं चतुःसप्ततिसहस्राणि चत्वारि शतानि नव चेत्येतत्सङ्ख्याऽऽर्या कीदृगिति जिज्ञासा, तदा नष्टाङ्कं लिखित्वा आदिभूतगणविकलपैर्भागं हरेत् । भागे हृते योऽङ्कः शिष्टस्तत्सम्मितं तद्गणविकलपेषु गणं लिखेत् । भागहारे यल्लब्धं तत्सैकं कृत्वा पुनः पुनरुत्तरगणविकलपैर्भागे हृते भाज्यशेषसङ्ख्याको गणस्तत्तद्गणविकलपेषु पूर्वस्थापितगणानन्तरं स्थाप्यः । इत्येवं यावत्पूर्ति कार्यम् । यत्र तु गणविकलप एव शिष्यते, तत्र तत्सङ्ख्य एव गणो ग्राह्यः । परं लब्धं सकं न कार्यम् । शिष्टं पूर्ववत् । तद्यथा–प्रथमगणस्य चतुर्विकलपत्वाच्चतुर्भिः

पूर्वोक्ते नष्टाङ्के हृते लब्धं त्रिनवतिसहस्राणि द्व्यधिकानि षट्शतानि च शेष एकाङ्क इति। प्रथमगणविकल्पेषु प्रथमः सर्वगुरुः स्थाप्यः। लब्धे सैके कृते द्वितीयगणस्य पञ्चविकल्पत्वात्तैर्भक्ते लब्धं सहस्राण्यष्टादश विंशत्यधिकसप्तशती च शेषास्त्रय इति। तद्विकल्पेषु तृतीयो मध्यगुरुः स्थाप्यः। लब्धे सैके तृतीयस्य चतुर्विकल्पत्वात्तैर्भक्ते लब्धमशीत्यधिकषट्चत्वारिंशच्छती शेष एक इति। तद्विकल्पेष्वाद्यः सर्वगुरुः कार्यः। लब्धे सैके चतुर्थः पञ्चविकल्प इति पञ्चभिर्भागे लब्धं नवशती षट्त्रिंशदधिका शेष एक इति। तद्विकल्पेष्वाद्यः सर्वगुरुः स्थाप्यः। लब्धे सके पञ्चमस्य चत्वारो विकल्पा इति तैर्भक्ते लब्धं चतुस्त्रिंशदधिकं शतद्वयं शेष एक इति। तद्विकल्पेषु सर्वगुरुः स्थाप्यः। लब्धे सैके षष्ठस्य जगणन्लयोरेव विकल्पाद् द्वाभ्यां भक्ते लब्धं सप्ताधिकं शतं शेष एक इति। तद्विकल्पयोराद्यो मध्यगुरुः स्थाप्यः। लब्धे सैके सप्तमस्य चत्वारो विकल्पा इति, तैर्भक्ते लब्धं एकोनत्रिंशत् शेषं द्वयमिति। तद्विकल्पेषु द्वितीयोऽन्तगुरुः। ततः सर्वार्यानियतं गुरुं न्यसेत्। एवं पूर्वार्धं स्थितम्। ततो लब्धे सैके आर्योत्तरार्धादिगणश्चतुर्विकल्प इति चतुर्भिर्भक्ते लब्धं सप्त शेषं द्वयमिति। द्वितीयविकल्पोऽन्तगुरुः। लब्धे सैके द्वितीयस्य पञ्च विकल्पा इति तैर्भक्ते लब्धमेकः शेषं त्रय इति। तृतीयविकल्पो मध्यगुरुः। लब्धे सैके तृतीयश्चतुर्विकल्प इति चतुर्भिर्भक्ते लब्धं शून्यं शेषं द्वे इति। द्वितीयविकल्पोऽन्तगुरुः। लब्धे शून्ये सैके चतुर्थः पञ्चविकल्प इति पञ्चभिर्भागे लब्धं शून्यं शेष एक इति। प्रथमविकल्पः सर्वगुरुः। लब्धे सैके पञ्चमश्चतुर्विकल्प इति तैर्भक्ते लब्धं शून्यमवशेष एक इति। प्रथमः सर्वगुरुः। अन्त एको गुरुर्लेख्यो नियतत्वात्। एवं सत्येतादृशीयमिति पूर्वोक्तामेवार्यां वदेत्। तदुक्तम्—

नष्टाङ्के प्रथमे भक्ते गणाङ्कैश्चतुरादिकैः।
शेषसङ्ख्यो गणो ज्ञेयो लब्धं कुर्यात्सरूपकम्।
पुनर्भजेत्पुनर्लब्धं सरूपं शेषसङ्ख्यया।
गणान्द्यात्प्रते शेषे गाथायाः प्राग्गणक्रमः॥ इति।

एवमार्यान्तरेषु गीत्यादिषु च ज्ञेयम्। इत्यार्यानष्टविधिः॥

अथ काँश्चिदार्याविशेषानाह—

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।
पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन॥ ३॥ (१)

(१) अत्रोदाहरणान्तरं यथा सामुद्रिकतिलके—

आद्येषु त्रिष्वंशकेषु चतुर्मात्रिकेषु त्रिषु गणेषु यस्या दलयोरर्धयोः पादो दृश्यते कविप्रयोगेषु तस्या आर्याया नागश्रेष्ठेन पिङ्गलेन पथ्येति नाम प्रकीर्तितमुक्तम् । "त्रिषु गणेषु पादः पथ्याद्ये च" (पिं. सू. ४-२२) इति सत्रे इत्यर्थः । सर्वत्रात्र ऋषिनामनिर्देशः समूलताप्रदर्शनार्थः, न त्वन्यतमत्वप्रदर्शनार्थः । इदमेवात्रोदाहरणम् । एवमुत्तरत्राऽपि ॥ ३ ॥

सँलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥४॥ (१)

यस्या = आर्याया आद्यं गणत्रयं लङ्घयित्वा परतो यत्र क्वचिद् द्वयोः शकलयोरर्धयोर्व्यस्तयोः समस्तयोर्वा पादयोर्यतिः स्यात्, तामार्यामित्येवंप्रकारतया पिङ्गलनागो विपुलां समाख्याति कथयति । "विपुलान्या" (पिं. सू. ४-२३) इति सूत्रे इतिशब्दं प्रकारवचनमङ्गीकृत्य व्याख्येयम् । तेन इतिनाऽनुक्तत्वाद्विपुलामिति कर्माण द्वितीयाया न विरोधः । प्रकारवाचिनेतिशब्देन चपलादीनामपि गणत्रयानन्तरविरामत्वप्रकारे सति विपुलात्वमपि भवतीति सङ्कीर्णभेदा अपि सङ्गृहीताः । इयं च त्रिविधा । पूर्वार्ध एव त्रिगणानन्तरविरामा मुखविपुला, उत्तरार्ध एव तादृग्जघनविपुला, उभयोरर्धयोस्तादृगुभयविपुलेति । इयमेव महाविपुलाऽपि । तत्र "षष्ठे" (वृ. २-२) इत्यादिर्मूलस्थाद्या । द्वितीया

१	२	३	४	५	६	७	गु.
करमू—ले	यव—	माला—	द्विपरि—	क्षेपा	मनोह—रा	य—	स्य ॥
।।ऽ,	ऽ ।।,	ऽ ऽ,	।।ऽ,	ऽऽ,	।ऽ।,	ऽ ऽ,	ऽ ,
१	२	३	४	५	६	७	गु.
मनुजः	स राज—	मन्त्री	विपुलम—	तिर्जा—	य—	ते धन—वान् ॥	
।।ऽ,	। ऽ।,	ऽ ऽ,	।।।।,	ऽऽ,	।,	ऽ ।।,	ऽ,

(१) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

१	२	३	४	५	६	७	गु.
या स्त्री	कुचकल—शनित—स्थमण्ड—ल जा—	यते म—	हाविपु—	ला ॥			
ऽ ऽ,	।।।।,	।।ऽ,	।ऽ।,	ऽ ऽ,	।ऽ।,	ऽ।।,	ऽ ,
१	२	३	४	५	६	७	गु.
गम्भी—	रनाभ—	रतिदी—	र्घलोच—ना	भव—	ति	सा सुभ	गा ॥
ऽ ऽ,	।ऽ।,	।।ऽ,	।ऽ।	ऽ।।,	।,	ऽ।।,	ऽ ,

ममैव यथा—

करुणाविषये करुणां करुणावरुणालयाशु मयि धेहि ।
राघव ! करुणाशीलवतां विषमा न मनसो वृत्तिः ॥

तृतीया मूलस्यैव ॥ ४ ॥

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ॥
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥ (१)

यस्यां द्वयोरर्धयोर्व्यस्तयोः समस्तयोर्वा द्वितीयतुर्यौ गणौ पश्चात्पुरःस्थितगुरुमध्यगतौ जगणौ स्याताम्, साऽऽर्या चपला । एतदुक्तं भवति—प्रथमो गणो द्विगुरुरन्यगुरुर्वा, तृतीयो द्विगुरुः, पञ्चमो द्विगुरुरादिगुरुर्वा, द्वितीयचतुर्थौ मध्यगुरू इति नियतमस्यामिति । अत्राद्यार्धे प्रथमे द्वौ विकल्पौ (ऽऽ, ॥ऽ), द्वितीये एकः (।ऽ।), तृतीयेऽप्येकः (ऽऽ), चतुर्थेऽप्येकः (।ऽ।), पञ्चमे द्वौ (ऽऽ, ऽ॥), षष्ठे द्वौ (।ऽ।, ।।।।), सप्तमे चत्वारः (ऽऽ, ॥ऽ, ऽ॥, ।।।।), अष्टमे गुरुरेव । अन्योन्यगुणने द्वात्रिंशत् । उत्तरार्धे षष्ठस्य लघुमात्रत्वात्षोडश । उभयार्धविकल्पानामन्योन्यगुणने द्वादशाऽधिका पञ्चशती विकल्पानाम्, अङ्कतोऽपि ५१२ ॥५॥

मुखविपुलादीनां सूत्रकारानुक्तत्वात्स्वयं स्फुटतया लक्षणाऽनुक्तावपि चपलाभेदौ सूत्रोक्तत्वाल्लक्षयति—

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ॥
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥ (२)

---

(१) अत्रोदाहरणान्तरं यथा मम—

स. गु. १	ज० २	स. गु. ३	ज० ४	स. गु. ५	ज० ६	मूल ७	८ गु.
बा।ला—	र्ककोटि—	वर्ण	त्रिलोक—	सौन्द—	र्यसार—	घटितमि—	व ॥
ऽ ऽ,	। ऽ ।,	ऽ ऽ,	। ऽ ।,	ऽ ऽ,	। ऽ ।,	। । । ।,	ऽ,

स० १	ज० २	स. गु. ३	ज० ४	स. गु. ५	ल० ६	भ० ७	गु. ८
करुणै—	कसाग—	रं त—	न्महो म—	माल	स्व—	नं जय—	ति ॥
। । ऽ,	। ऽ ।,	ऽ ऽ,	। ऽ ।,	ऽ ऽ,	।,	ऽ । ।,	ऽ,

(२) अत्रोदाहरणान्तरं यथा ममैव—

स. गु. १	ज० २	स. गु. ३	ज० ४	स. गु. ५	ज० ६	स० ७	८ गु.
विश्व—	प्रकाश—	हेतुः	स्वतन्त्र—	भूता	यतस्त्व—	मसि का—	ऽपि ॥
ऽ ऽ,	। ऽ ।,	ऽ ऽ,	। ऽ ।,	ऽ ऽ,	। ऽ ।,	। । ऽ,	ऽ,

यस्या आर्याया आद्यं प्रथमं दलमर्धं चपलानिष्ठं लक्ष्म लक्षणं भजेत। शेषे द्वितीयार्धे पूर्वजं सामान्यार्याभवं लक्ष्म यस्याः सा तथा सा मुनिना=पिङ्गलेन मुखचपलोक्ता। अत्र चपलापूर्वार्धविकल्पानां द्वात्रिंशतार्याऽपरार्धविकल्पानां चतुःषष्टिशतरूपाणां परस्परताडनेन द्वौ लक्षौ चत्वारि सहस्राणि अष्टौ शतानि च विकल्पा भवन्ति। अङ्कतोऽपि २०४८०० ॥ ६ ॥

प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे च चपलायाः ॥
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥ (१)

प्राक्प्रतिपादितं पूर्वोक्तं लक्ष्म सामान्यलक्षणं प्रथमार्धे भवति। प्रथमेतरे द्वितीयार्धे चपलाया लक्षणं भवति, साऽऽर्या विशुद्धा विवेकचतुरा धीर्बुद्धियेषां तैः पिङ्गलादिभिर्जघनचपलोक्ता। अत्राऽपि चपलायामिवोत्तरार्धविकल्पाः षोडश। पूर्वार्धे त्वशीत्यधिकद्वादशसहस्रसङ्ख्या आर्यापूर्वार्धविकल्पा अविकृता एव। परस्परं गुणने द्वौ लक्षौ चत्वारः सहस्रा अष्टौ शतानि विकल्पाः। अङ्कतोऽपि २०४८००। उभयार्धयोश्चपलालक्षणयोगे महाचपला। सा च प्रथमैव मूले। अत्र चैका पथ्या विपुलाभेदत्रयं चेति चत्वारो भेदाः। पुनश्चैत एव प्रत्येकं चपलाभेदत्रयेण सम्पन्नाः सन्तो द्वादश एवं मिलित्वा षोडशाऽऽर्याभेदाः स्थूलदृशां भवन्ति। एषां भेदानां मध्येऽनुक्तोदाहरणानि स्वबुद्ध्या ग्रन्थान्तराच्चात्राऽवगन्तव्यानि। अस्माभिस्तूक्तप्रायत्वाद् ग्रन्थविस्तरभयाच्च नोक्तानि ॥ ७ ॥ (२)

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायामार्याप्रकरणम्।

स० १ ज० २ स. गु. ३ स. गु. ४ स. गु. ५ ल० ६ स. गु. ७ गु० ८

शरणं ततः प्रपद्य त्वामे—वाऽहं ज— गन्मा— तः ॥
।।ऽ, ।ऽ, ।ऽऽ, ऽऽ, ऽ ऽ, ।, ऽ ऽ, ऽ,

(१) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

स. गु. १ भ० २ स. गु. ३ भ० ४ स० ५ ज० ६ स. गु. ७ गु० ८

यत्पा—दस्य क—निष्ठा न स्पृश—ति मही—मनामि—का वाऽ—पि ॥
ऽऽ, ऽ।।, ऽऽ, ऽ।।, ।।ऽ, ।ऽ।, ऽ ऽ, ऽ,

स. गु. १ ज० २ स. गु. ३ ज० ४ स. गु. ५ ल० ६ नूल ७ गु० ८

सा स—र्वधूर्त्त—भोग्या भवेद—वश्यं ज—घनचप— ला ॥
ऽ ऽ, ।ऽ।, ऽ ऽ, ।ऽ।, ऽऽ, ।, ।।।।, ऽ,

(२) ते च भेदा नामतो यथा—

अथार्यालक्षणज्ञानपूर्वकज्ञेयस्वरूपत्वात्कैश्चिदार्याभेदत्वाङ्गीकाराद्गीतीर्लक्षयति—

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥
दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजङ्गेशः ॥८॥ (१)

तदाशब्दोऽत्राध्याहार्यो यदिशब्दयोगाय । तथा च यद्यार्याप्रथमार्धोक्तं लक्षणमुभयोरर्धयोः कथमपि विकल्पितषष्ठजगणचतुर्लघुगणान्यतमप्रकाराश्रयणेनापि भवेत्, तदा कृतयतिशोभां कृता यत्या विच्छेदात्मिकया शोभा श्रुतिसौभाग्यं यस्यास्ताम् । एतेनार्योक्तो यस्तत्तद्गणविशेषे सति विरामविशेषः सोऽप्यस्यां भवतीति दर्शितम् । भुजङ्गेशः = पिङ्गलस्तां गीतिं गीतवानुक्तवान् । "आद्यर्धसमा गीतिः" (पिं. सू. ४-२८) इति सूत्रेणेत्यर्थः । ततश्चात्र द्वितीयार्धेऽपि पूर्णाः सगुरवः सप्त गणाः । न तु षष्ठे लघुमात्रमित्यादि ज्ञेयम् । इयमेका पथ्या, तिस्रो विपुलाः, द्वादश चपलाः । एतत्पूर्वोक्तत्वात्षोडशधा । तत्र पथ्यागीतिर्मूले । अन्याः स्वयमुदाहार्याः । अत्राद्यार्धमार्यावत् । द्वादश सहस्राण्यष्टौ शतानि च विकल्पाः । उत्तरार्धेऽपि तावन्त एव । परस्परहतौ कोटयः षोडशाऽष्टत्रिंशल्लक्षाश्चत्वारिंशत्सहस्राणि च विकल्पाः । अङ्कतोऽपि १६३८४०००० ।

१ पथ्यार्या ।	२ मुखविपुलार्या ।
३ जघनविपुलार्या ।	४ उभयविपुलार्या ।
५ मुखचपलापथ्यार्या ।	६ मुखचपलामुखविपुलार्या ।
७ मुखचपलाजघनविपुलार्या ।	८ मुखचपलोभयविपुलार्या ।
९ जघनचपलापथ्यार्या ।	१० जघनचपलामुखविपुलार्या ।
११ जघनचपलाजघनविपुलार्या ।	१२ जघनचपलोभयविपुलार्या ।
१३ महाचपलापथ्यार्या ।	१४ महाचपलामुखविपुलार्या ।
१५ महाचपलाजघनविपुलार्या ।	१६ महाचपलोभयविपुलार्या ।

(१) अत्रोदाहरणान्तरं यथा मम—

स. गु. १ स. गु. २ स. गु. ३ स. गु. ४ स. गु. ५ ज० ६ स. गु. ७ गु० ८

याचे वाचे! तुभ्यं दीनो हीनो गुणैर- हं नू नम् ॥
ऽ ऽ, ऽ ऽ, ऽ ऽ, ऽ ऽ, ऽ ऽ, । ऽ ।, ऽ ऽ, ऽ,

न्ल १ न्ल २ स.गु.३ स.गु.४ स.गु.५ ज० ६ स० ७ गु० ८

निजतन-य इति वि-चार्य--प्रमा मामे—कवार—मपि प—श्य ॥
। । । ।, । । । ।, ऽ ऽ, ऽ ऽ, ऽ ऽ, । ऽ ।, । ऽ ऽ, ऽ,

पथ्यागीत्यादिषु चतुर्षु भेदेष्वियं सङ्ख्या ज्ञेया । द्वादशसु चपलागीतिषु पूर्वापरार्धविकल्पघाते सङ्ख्या स्वयमूह्या ॥८॥ (१)

आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ॥
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ९ ॥(२)

अत्रापि तदेति शेषः । यद्यार्याद्वितीयार्धे यदुक्तं लक्षणं षष्ठलघ्वादि, तदुभयोरर्धयोः स्यात् । तदोपगीतिं पिङ्गलः "अन्येनोपगीतिः" (पिं० सू० ४-७९) इत्यत्राहेत्यर्थः । अस्यां पूर्वार्धे षट्सहस्राणि चत्वारि शतानि विकल्पाः । उत्तराधऽपि तावन्त एव । अन्योन्यघाते चतस्रः कोट्यो नव लक्षाः षष्टिः सहस्राणां विकल्पाः । अङ्कतोऽपि ४०९६०००० ॥९॥(३)

---

(१) गीतेः षोडशभेदानां नामानि यथा—

१ गीतिपथ्यार्या । २ गीतिमुखविपुलार्या ।
३ गीतिजघनविपुलार्या । ४ गीत्युभयविपुलार्या ।
५ मुखचपलागीतिपथ्यार्या । ६ मुखचपलागीतिमुखविपुलार्या ।
७ मुखचपलागीतिजघनविपुलार्या । ८ मुखचपलागीत्युभयविपुलार्या ।
९ जघनचपलागीतिपथ्यार्या । १० जघनचपलागीतिमुखविपुलार्या ।
११जघनचपलागीतिजघनविपुलार्या । १२जघनचपलागीत्युभयविपुलार्या ।
१३ महाचपलागीतिपथ्यार्या । १४ महाचपलागीतिमुखविपुलार्या ।
१५ महाचपलागीतिजघनविपुलार्या । १६ महाचपलागीत्युभयविपुलार्या ।

(२) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

स. गु. १ आ.गु.२ आ.गु.३ स.गु. ४ स.गु. ५ ल. ६ आ.गु. ७ गु. ८

गान्ध—र्वं मक—रध्वज— देव— स्यास्त्रं ज— गद्विज—यि ॥
ऽ ऽ, ऽ । ।, ऽ । ।, ऽ ऽ, ऽ ऽ, ।, ऽ । ।, ऽ.

न्लौ १ आ.गु. २ आ.गु. ३ अं.गु. ४ स.गु. ५ ल. ६ स.गु. ७ गु. ८

इतिसम-वेक्ष्य मु-मुक्षुभि—रुपगी—तिस्त्य— ज्य— ते दे— शः ॥
। । । ।, ऽ । ।, ऽ । ।, । । ऽ, ऽ ऽ, ।, ऽ ऽ, ऽ.

(३) उपगीतेः षोडशभेदानां नामानि यथा—

१ उपगीतिपथ्यार्या । २ उपगीतिमुखविपुलार्या ।
३ उपगीतिजघनविपुलार्या । ४ उपगीत्युभयविपुलार्या ।
५ मुखचपलोपगीतिपथ्यार्या । ६ मुखचपलोपगीतिमुखविपुलार्या ।
७ मुखचपलोपगीतिजघनविपुलार्या । ८ मुखचपलोपगीत्युभयविपुलार्या ।
९ जघनचपलोपगीतिपथ्यार्या । १० जघनचपलोपगीतिमुखविपुलार्या ।

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ॥
सोद्गीतिः किल गदिता तद्वद्यत्यंशभेदसंयुक्ता ॥ १० ॥(१)

आर्याधद्वयं यस्या व्यत्ययेन विपर्यासेन यत्पूर्वार्धं तदुत्तरार्धम्, यदुत्तरार्धं तदत्र पूर्वार्धमित्येवंरूपेण रचितम्, सा किलेति प्रसिद्धा। उद्गीतिरुक्ता। तेनैव तद्वदिति पथ्याद्यार्याभेदवदेव यत्या विरामेण योऽशभेदः पादभेदस्तेन युक्तेत्यर्थः। अत्रार्यावद्विकल्पसङ्ख्या। यथा— ८१६२०००० ॥ १० ॥(२)

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ॥
इतरत्तद्वन्निखिलं भवति यदीयमर्द्धमुदितार्यागीतिः ॥ ११ ॥(३)

---

११ जघनचपलोपगीतिजघनविपुलार्या।
१२ जघनचपलोपगीत्युभयविपुलार्या।
१३ महाचपलोपगीतिपथ्यार्या। १४ महाचपलोपगीतिमुखविपुलार्या।
१५ महाचपलोपगीतिजघनविपुलार्या। १६ महाचपलोपगीत्युभयविपुलार्या।

(१) अत्रोदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

स. गु. १ ज. २ भ. ३ स. गु. ४ स. गु. ५ ल. ६ स. गु. ७ गु. ८

नारा— यणस्य सन्तत— मुद्गी— तिः सं— स्मृ— तिर्भ— क्तया ॥
ऽ ऽ, । ऽ ।, ऽ । ।, ऽ ऽ, ऽ ऽ, ।, ऽ ऽ, ऽ.

स. गु. १ स. गु. २ स. गु. ३ भ. ४ स. गु. ५ ज. ६ भ. ७ गु. ८

अर्चा—यामा— सक्ति—र्दुस्तर—संसा— रसाग—रे तर— णिः ॥
ऽ ऽ, ऽ ऽ, ऽ ऽ, ऽ । ।, ऽ ऽ, । ऽ ।, ऽ । ।, ऽ.

(२) उद्गीतेः षोडशभेदानां नामानि यथा—

१ उद्गीतिपथ्यार्या। २ उद्गीतिमुखविपुलार्या।
३ उद्गीतिजघनविपुलार्या। ४ उद्गीत्युभयविपुलार्या।
५ मुखचपलोद्गीतिपथ्यार्या। ६ मुखचपलोद्गीतिमुखविपुलार्या।
७ मुखचपलोद्गीतिजघनविपुलार्या। ८ मुखचपलोद्गीत्युभयविपुलार्या।
९ जघनचपलोद्गीतिपथ्यार्या। १० जघनचपलोद्गीतिमुखविपुलार्या।
११ जघनचपलोद्गीतिजघनविपुलार्या। १२ जघनचपलोद्गीत्युभयविपुलार्या।
१३ महाचपलोद्गीतिपथ्यार्या। १४ महाचपलोद्गीतिमुखविपुलार्या।
१५ महाचपलोद्गीतिजघनविपुलार्या। १६ महाचपलोद्गीत्युभयविपुलार्या।

(३) अत्रोदाहरणान्तरं यथा—

आर्यापूर्वार्धं यद्येकेनाधिकेन गुरुणा निधने अन्ते युक्तं स्यात् । इतरच्च द्वितीयं समस्तं यदीयमर्धं तद्वत्पूर्वार्धवदियमार्यागीतिरिति मुनिनोक्ता । आर्यायां हि पूर्वार्धे सगुरुकाः सप्त गणाः । इह तु पूर्णा अष्टौ गणा अर्धद्वयेऽपि भवन्ति । अन्तिमस्तु गणो द्विगुरुरेव । अन्यत्सर्वमार्यापूर्वार्धतुल्यमेवेति भावः । अत्रार्या पूर्वार्धविकल्पानामष्टमगणे विकल्पाभावात्परस्परताडने जातोऽङ्को द्वादशसहस्राण्यष्टौ शतानि च पूर्वार्धे । उत्तरार्धेऽपि तावदेव । अन्योन्यहतौ जाता मुख्यगीतिवद् भेदसङ्ख्या । अङ्कतोऽपि १६३८४०००० ।(१)

केचित्त्वत्रोत्तरार्धेऽर्धशब्दमपठित्वा इतरदार्याया एवोत्तरार्धं तद्वदन्तेऽधिकैकगुरुयुक्तं स्यात्साऽऽर्यागीतिरिति । आर्यापूर्वार्धमित्यत्र समस्तमप्यार्याशब्दं षष्ठ्यन्तं समासान्निष्कृष्टमनुषज्य पूर्वार्धस्याष्टगणत्वेन द्वात्रिंश-

---

न्लौ १ न्लौ २ स. गु. ३ स. गु. ४ स. गु. ५ ज. ६ स. गु. ७ स. ८

अजमज—रममर—मेकं प्रत्यक्— चैत—न्यमीश्व—रं व्र—ह्म परम् ॥
।।।।, ।।।।, ऽ ऽ, ऽ ऽ, ऽ ऽ, । ऽ ।, ऽ ऽ, । । ऽ.

स. गु. १ स. गु. २ स. ३ स. ४ स. गु. ५ ज. ६ स. गु. ७ स. गु. ८

आत्मा—नं भा— वयती भवमु—क्तिः स्या—दितीय—मार्या—गीतिः ॥
ऽ ऽ, ऽ ऽ, ।।ऽ, ।।ऽ, ऽ ऽ, । ऽ ।, ऽ ऽ ऽ ऽ.

(१) आर्यागीतेः षोडशभेदानां नामानि यथा—

१ आर्यागीतिपथ्यार्या । २ आर्यागीतिमुखविपुलार्या ।
३ आर्यागीतिजघनविपुलार्या । ४ आर्यागीत्युभयविपुलार्या ।
५ मुखचपलार्यागीतिपथ्यार्या ।
६ मुखचपलार्यागीतिमुखविपुलार्या ।
७ मुखचपलार्यागीतिजघनविपुलार्या ।
८ मुखचपलार्यागीत्युभयविपुलार्या ।
९ जघनचपलार्यागीतिपथ्यार्या ।
१० जघनचपलार्यागीतिमुखविपुलार्या ।
११ जघनचपलार्यागीतिजघनविपुलार्या ।
१२ जघनचपलार्यागीत्युभयविपुलार्या ।
१३ महाचपलार्यागीतिपथ्यार्या ।
१४ महाचपलार्यागीतिजघनविपुलार्या ।
१५ महाचपलार्यागीतिजघनविपुलार्या ।
१६ महाचपलार्यागीत्युभयविपुलार्या ।

न्मात्रताम्, उत्तरार्धस्यैकोनत्रिंशन्मात्रतां चाभिप्रेत्य व्याचक्षते। भवतु नामैतद्व्याख्याकौशलम्, किं तु बहूनामसम्मतम्, सूत्रानुगुणं च, "अर्धे वसुगण आर्यागीतिः" (पिं० सू० ४-३१) इति हि सामान्यतोऽर्धे वसुगणेऽष्टगणे सतीति। यद्वा द्वे अप्यर्धे यद्यष्टगणे स्यातामिति सूत्रकार आह। कैश्चित्त्वियं सङ्गीतिरिति संज्ञिता । अपरैः स्कन्धकमिति। गीतीनामप्यार्यापूर्वकत्वादार्यात्वमस्त्येव । एताश्चतस्रोऽपि गीतयः प्रत्येकं पथ्यादिपूर्वोक्तषोडशप्रकारार्यासम्भिन्नतया षोडशेति मिलिताश्चतुःषष्टिः पूर्वाश्च षोडशार्या इति मिलित्वाऽशीतिः । तदुक्तं हलायुधेन—

एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः ।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः ॥
गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकारं स्यात् ।
साकल्येनार्याणामशीतिरेवं विकल्पाः स्युः ॥ इति ।

छन्दोविचितौ त्वेकादशाऽपरे गीतिभेदाः प्रदर्शिताः। ते यथा, आर्यैव दलद्वयेऽप्यधिकैकगुरुयुता सङ्गीतिः। ममैव यथा—

आगमविद्यैकनिधिर्विबुधेन्द्रशतैरधीतनिगमविलासः ।
रामेश्वरभट्टगुरुर्जयति पिता मे पितामहतुल्यः ॥ (१)

पूर्वार्धं एवाधिकैकगुरुयुक् सुगीतिर्नाम । पितामहगुरुरिति पठित्वा पूर्वमेवोदाहरणम् (२)। यद्युत्तरार्धं एव तादृक्तदा प्रगीतिर्नाम। 'अधीतनिगमार्थः' इति पठित्वा प्रथममेवोदाहार्यम् (३) । सुगीतिरेव व्यत्यस्तार्धानुगीतिः । सुगीत्युदाहरणमेव व्यत्यस्तार्धं ज्ञेयम् (४)। प्रगीतिरेव व्यत्यस्तार्धा मञ्जुगीतिः । प्रगीत्युदाहरणं व्यत्यस्तार्धमत्रोदाहरणम् (५) । यद्युपगीतिरर्धद्वयेऽप्यधिकैकगुरुयुक् स्यात्तदा विगीतिः । ममैव यथा

विषयान्विषधरविषमान्संसृतिमपि नीरसां ज्ञातवतः ।
संसारसारभूते दशरथबाले मतिः स्थैर्यमियात् ॥ (६) ॥

यद्युद्गीतिर्द्वयोरप्यर्धयोरधिकगुरुयुक्ता तदा चारुगीतिः । अत्र पूर्वोक्तं सङ्गीत्युदाहरणमेव विपर्यस्तार्धं ज्ञेयम् (७) । आर्यागीतेरेवैकगुरुहीनोत्तरार्धतायां वल्लरीत्वम्। ममैव यथा—

पीनोन्नतकुचकलशा पीवरजघनोरुभारमन्थरयाता ।
पश्यन्ती प्रणयदृशा तरुणी कं वा न चालयेत्पुरुषम् ॥ (८)।

तस्या एव पूर्वार्धं एव तथात्वे ललितेतिसंज्ञा अर्धयोर्व्यत्यासेनाऽनन्तरमेवोदाहरणम् (९) उपगीतिरेवाद्यार्धेऽधिकैकगुरुयुता प्रमदा-

नाम । ममैव यथा—

यस्य विलासवतीनां केलिकलाकौशले रतिविरतिः ।
मैथुनमात्ररसज्ञः शृङ्गविहीनः पुमान्स पशुः ॥ (१०) ।

सैवोत्तरार्धेऽधिकैकगुरुयुता चन्द्रिका नाम । व्यत्यस्तार्धं पूर्वमेवोदाहरणम् (११) । एतासामपि पूर्वोक्तपथ्यादिषोडशार्याणां सम्भिन्नतया प्रत्येकं षोडशधात्वे सति सङ्ख्या १७६ । एतासामुदाहरणानि स्वयमूह्यानि । विस्तरभयात्तु नोच्यन्ते । पूर्वोक्तानां चतुर्विधगीतीनां च तथैव षोडशधात्वे सङ्ख्या ६४ । ऐक्ये गीतिसङ्ख्या २४० । पूर्वोक्तषोडशशुद्धार्याभेदैक्ये सङ्ख्या २५६ ॥ ११ ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां गीतिप्रकरणम् ॥

मात्राच्छन्दसां प्रकृतत्वाद्वैतालीयप्रकरणमारभते—

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ॥
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥१२॥(१)

वैतालीये छन्दसि विषमे, अर्थात्पादे, प्रथमे तृतीये च षट् कला मात्राः स्युः । समे पादे द्वितीये चतुर्थे चाष्टौ कलाः स्युः । अन्ते उक्तानां कलानामन्ते परस्ताद् रलौ रगणलघू गुरुश्च भवतीति वैतालीयस्वरूपपरिच्छेदः । एतदुक्तं भवति विषमे पादे चतुर्दश, समे च षोडश मात्राः कार्याः । तन्मध्येऽन्तिमा अष्टौ मात्रा रेफलघुगुरुभिः कार्या इति । विषमे पश्चात्षट् समेऽष्टौ अवशिष्यन्ते, तासां निवेशने नियमविशेषमाह—ताश्चेति । समे ताः षट् कला निरन्तराः नो न स्युः केवलाः षट् लघव एव न कार्याः, किं तु गुरुमिश्रा इत्यर्थः । समे विशेषोक्तया विषमे स्वरुचिः ।

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

षण्मात्राः र. ल. गु. अष्टौमात्राः र. ल. गु.

क्षुत्क्षीणश—रीरस— ञ्च— या व्यक्तीभूतशि—रोऽस्थिप—ञ्ज रा: ॥
ऽ ऽ । ।, ऽ । ऽ; ।, ऽ, ऽ ऽ ऽ । ।, ऽ । ऽ, ।, ऽ.

ष. मा. र. ल. गु. अ. मा. र. ल. गु.

कैशैः परु—षैस्तवा—ऽर— यो वैतालीयत—नुं वित— न्व— ते ॥
ऽ ऽ । ।, ऽ । ऽ, ।, ऽ, ऽ ऽ ऽ । ।, ऽ । ऽ, ।, ऽ.

अत्राऽवशिष्टासु षट्स्वष्टसु च कलासु समा कला द्वितीया चतुर्थी षष्ठी च परया तृतीयपञ्चमसप्तमकलयाश्रिता मिलिता न भवति, द्वितीयतृतीयकलादीनामेकेन गुरुणोपादानं न कार्यमित्याशयः । अत्र विषमपादयोराद्यासु षण्मात्रास्वष्टौ विकल्पाः । यथा—SSS; ॥SS, S॥S, ॥॥S, SS॥, ॥S॥, S॥॥, ॥॥॥, समपादयोराद्यास्वष्टमात्रासु त्रयोदश विकल्पाः—SSSS, ॥SSS, ।S।SS, ॥॥॥SS, SS॥S, ॥S॥S, S॥॥S, SSS॥, ॥SS॥, S॥S॥, ॥॥S॥, SS॥॥, ॥S॥॥, एते आर्याभिर्वर्णक्रमेण निबद्धाः कैश्चित्—'मीनाङ्काः (१) सुरसङ्गैः (२) पङ्कजसौ(३)रभितजलाः (४) तत्सारस (५) खगसम्भृत (६) सज्जनमुदि (७) ककुभिककुभि (८)॥

एते विषमे पादे । हंसस्मेरा (१) अलिकेशाड्ढ्या (२) नीरजवक्त्राः (३) कुवलयनेत्राः (४) सुस्वच्छजलाः (५) सुतरङ्गभुजाः (६) केशरदशना (७) राजन्ते कृत (८) जनहर्षा भुवि (९) शारदरात्रिषु (१०) विमलनिशाकर (११) भानुप्रभृतिषु (१२) ननु पश्य सुतनु (१३) ॥" एते समे ॥ ततोऽष्टभिस्त्रयोदश गुणिताश्चतुरधिकं शतं वैतालीयस्याद्यार्धे भेदाः । एतावन्त एवाऽपरार्धे । परस्परहतौ जातं दश सहस्राण्ययष्टौ शतानि षोडश च । अङ्कतोऽपि १०८१६ । इयमेवौपच्छन्दसिकापातलिकयोर्वक्ष्यमाणयोः सङ्ख्या ॥ १२ ॥

वैतालीयभेदानाह—

पर्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ॥ १३ ॥ (१)

विषमसमपादयोः षण्णामष्टानां च कलानामन्ते यौ रेफयगणौ स्याताम्, शेषं षडष्टकलानियमादि तथैव सामान्यवैतालीयवदेव यदा तदा च्छन्दोविद्भिरौपच्छन्दसिकसंज्ञं वैतालीयमुक्तम् । वैतालीय एव प्रतिचरणमेकगुर्वाधिक्येन विषमपादे षोडश, समपादे चाष्टादश मात्राः कार्या इति भावः ॥ १३ ॥

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ ।

६ मात्रा.	र.	य.	८ मात्रा.	र.	य.
वाक्यैर्मधु—	रैः प्रता—	र्यं पूर्वं	यः पश्चादभि–सन्धा–	ति मित्रम् ॥	
S S I I,	S I S,	I SS,	S S S I I,	S I S,	I S S.
६ मात्रा.	र.	य.	८ मत्रा.	र.	य.
तं दुष्टम—	तिं विश—	ष्टगोष्ठ्या–	मौपच्छन्दसि–	कं वद—	न्ति बाह्यम् ॥
S S I I,	S I S,	I S S,	S S S I I,	S I S,	I S S.

आपातलिका कथितेयं भाद्रुरुकावथ पूर्ववदन्यत् ॥ १४ ॥(१)

षण्णामष्टानां च मात्राणां पर्यन्ते भाद्भगणात्परौ गुरुकौ गुरू स्यातामिति रेफलघुगुरूणामपवादः । अथान्यच्छेषं पूर्ववद्वैतालीयवत् । सेयमापातलिका सुधीभिः कथितेति पर्यन्तसुधीशब्दानुषङ्गेण योज्यम् ॥ १४ ॥

तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः ॥ १५ ॥(२)

समस्तेषु चतुर्ष्वपि पादेषु द्वितीयलो द्वितीया मात्रा तृतीयया युग् युक्ता चेत्स्यात्, तदा दक्षिणान्तिका नाम स्यादिति । चेत्तदाशब्दयोरध्याहारः कार्यः । सर्वेषु पादेषु द्वितीयो वर्णो गुरुरेव कार्य इति । तेन "न समात्र पराश्रिता कला" (वृ० र० २-१२) इत्यस्यापवादः । शेषं यथाप्राप्तमेवेति भावः । इयं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्या । अस्मिन्भेदत्रयेऽपि विषमपादयोर्विकल्पौ द्वौ । यथा—ISIS, ISII. समयोश्चत्वारो यथा—ISISS, ISIIS, ISISI, ISIII. द्वयोश्चतुर्णां च परस्परहतावष्टौ पूर्वार्धे । द्वितीयार्धेऽपि तावन्त एव । तयोरन्योन्यघाते चतुःषष्टिर्भेदा भवन्ति ॥ १५ ॥

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

६ मात्राः भ. गु. गु. ८ मात्राः भ. गु. गु.

पिङ्गलके-शी कपि—ला— क्षी वाचाटः विक-टोन्नत— द— न्ती ॥
S I I S, S I I, S, S, S S S I I, S I I, S, S.

६ मात्राः भ. गु. गु. ८ मात्राः भ. गु. गु.

आपातलि-का पुन— रे— षा नृपतिकुलेऽपि न भाग्यमु-प—ति ॥
S S I I, S I I, S, S, I I I I S I I, S I I, S, I.

(२) उदाहरणान्तरं यथा मम—

२-३ र. ल. गु. २-३ र. ल. गु.

यदीयपा-दाब्जचि—न्त— या पलायनं पा-पानि कु—र्व—ते ॥
I S I S, S I S, I, S, I S I S S, S I S, I, S.

२-३ र. ल. गु. २-३ र. ल. गु.

सदैव भ-वडासुरा—न्त— कं तमादिदेवं मानसे द— धे ॥
I S I S, S I S, I, S, I S I S S, S I S, I, S .

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः ॥१६॥(१)

अयुग्मयोर्विषमयोः प्रथमतृतीययोः पादयोर्द्वितीयलो द्वितीयमात्रा अग्रेण तदग्रिमेण लेन सक्तो युक्तश्चेत्, तदा उदीच्यवृत्तिरुदितेति वक्ष्यमाणानुषङ्गः। शेषं यथाप्राप्तम्। इयं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्या। अत्र तु द्वौ विषमयोर्विकल्पौ। यथा— ।ऽ।ऽ, ।ऽ।।। समयोः पूर्वोक्तान्त्रयोदश। परस्परहतौ षड्विंशतिः पूर्वार्धभेदाः। तावन्त एवाऽपरत्र। परस्परहतौ जाता भेदाः षट्शतानि षट्सप्ततिश्च। अङ्कतोऽपि ६७६ ॥ १६ ॥

पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥ १७ ॥(२)

अथेति यदीत्यर्थे वैलक्षण्ये वा। निपातानामनेकार्थत्वात्। युग्मयोर्द्वितीयचतुर्थपादयोः पञ्चमो लः पञ्चमी मात्रा पूर्वेण चतुर्थेन लघुना यदि युतः, एकेन गुरुणा चतुर्थपञ्चममात्रयोरुपादानं यदि स्यादित्य-

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

२-३ र. ल. गु. ८ मात्राः र. ल. गु.

अवाचकम-नूर्जिता— त्त रं श्रुतिदुष्टं यति- दुष्टम- क्क—मम्।
।ऽ।।।, ऽ।ऽ, ।, ऽ, ।।ऽऽ।।, ऽ।ऽ, ।, ऽ.

२-३ र. ल. गु. ८ मात्राः र. ल. गु.

प्रसादरहि-तं च ने—प्य— ते कविभिः काव्यमु-दीच्यव्- त्ति—भिः॥
।ऽ।।।, ऽ।ऽ, ।, ऽ, ।।ऽऽ।।, ऽ।ऽ, ।, ऽ.

(१) अत्रो दाहरणान्तरं यथा छन्दोवृत्तौ—

६ मात्राः र. ल. गु. ४-५ र. ल. गु.

विपुलार्थसु-वाचका—त्त- राः- कस्य नामनह-रन्तिमा— न— सम्॥
।।ऽ।।, ऽ।ऽ, ।, ऽ, ऽ।ऽ।।।, ऽ।ऽ, ।, ऽ.

६ मात्राः र. ल. गु. ४-५ र. ल. गु.

रसभावावि—शेषपे— श-लाः-प्राच्यवृत्तिकवि-काव्यस- म्प— दः॥
।।ऽ।।, ऽ।ऽ, ।, ऽ, ऽ।ऽ।।।, ऽ।ऽ, ।, ऽ,

र्थः । तदा प्राच्यवृत्तिरुदितोक्ता पिङ्गलादिभिरिति । समासान्निष्कृष्टं लशब्दमनुषज्य व्याख्येयम् । शेषं यथाप्राप्तम् । अनयोरपि उदीच्यवृत्तिप्राच्यवृत्त्योः "न समात्र पराश्रिता कला" (वृ०र०२-१२) इत्यस्य पूर्ववदेवापवादः । सेयमपि पूर्ववत्त्रेधा । विषमयोः पूर्वोक्ता अष्टौ विकल्पाः । समयोश्चत्वारः । यथा—। ऽ। ऽ। ऽ, । । । ऽ। ऽ, ऽ। ऽ। । ।, । । । ऽ। । । अष्टानां चतुर्भिर्हतौ द्वात्रिंशत्पूर्वार्धभेदाः । तावन्त एवोत्तरार्धे । परस्परहतौ भेदाश्चतुर्विंशत्यधिकं सहस्रम् । अङ्कतोऽपि१०२४॥१७॥

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ॥ १८ ॥ (१)

यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समा तुल्यौ क्रमेणौजयुग्मकौ विषमसमपादौ स्याताम्, तत्तदा प्रवृत्तकं नाम । विषमयोः प्रथमतृतीययोः पादयोर्द्वितीयतृतीयमात्रायोगः । समयोस्तु चतुर्थपञ्चममात्रायोगः स्यादिति भावः । इदं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्यम् । अत्र पूर्वोक्तविषमसमपादविकल्पानामन्योन्यहतौ सङ्ख्या स्वयमूहनीया । एवमपरान्तिकादिष्वपि ॥ १८ ॥

अस्य युग्मरचिताऽपरान्तिका ॥ १९ ॥(२)

अस्य प्रवृत्तकस्य युग्मपादैर्या सम्पूर्णा रचिता साऽपरान्तिका नाम । पञ्चमी चतुर्थमात्रायुक्ता । षोडशमात्रता च चतुर्ष्वपि पादेषु कार्येत्यर्थः ।

---

(१) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

२-३ र. ल. गु. ४-५ र. ल. गु.

इदं भरत-वंशभू—भृ—तां श्रूयतां श्रुतिम—नोरसा—य——नम् ॥
।ऽ ।।।, ऽ।ऽ, ।, ऽ, ऽ।ऽ ।।।, ऽ।ऽ, ।, ऽ.

२-३ र. ल. गु. ४-५ र. ल. गु.

पावत्रमधि-कं शुभो--द-यं व्यासवक्त्रकथि—तं प्रवृ——त्त——कम् ॥
।ऽ ।।।, ऽ।ऽ, ।, ऽ, ऽ।ऽ ।।।, ऽ।ऽ, ।, ऽ.

(२) अस्योदाहरणान्तरं यथा छन्दौवृत्तौ—

४-५ र. ल. गु. ४-५ र. ल. गु.

स्थिरविलासनत-मौक्तिका-व-ली-कमलकोमला-ङ्गीमृग——क्ष——णा ॥
।।।ऽ।।।, ऽ।ऽ, ।, ऽ, ।।।ऽ।ऽ, ऽ।ऽ, ।, ऽ.

इयं च वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन पूर्ववत्त्रेधा। कश्चित्तु 'अस्य वतालीयादिच्छन्दोवृन्दस्य युग्मरचिता' इति व्याचख्यौ। तन्मते वैतालीयादिपूर्वकत्वेन तत्पूर्वत्वेन प्राच्यवृत्तिपूर्वकत्वेन च षोढा। उदाहरणानि तु स्वयमूह्यानि। भेदाः ॥ २५६ ॥ १६ ॥

अयुग्भवा चारुहासिनी ॥ २० ॥ (१)

अस्य प्रवृत्तकस्याऽयुग्भवाऽयुक्पादैर्विषमपादै रचिता चारुहासिनी। समस्तपादेषु चतुर्दश मात्राः। द्वितीया च तृतीययायुक्ता कार्येत्यर्थः। इयमपि पूर्ववत्त्रेधा। अस्येति वैतालीयादिच्छन्दोवृन्दपरत्वेन व्याचक्षाणस्य मते तु वैतालीयौपच्छन्दसिकाऽऽपातलिकातदुदीच्यवृत्तिपूर्वकत्वेन षोढा। उदाहरणान्यूह्यानि। भेदाः २५६। अन्येऽपि भेदा अन्यैरुक्तास्ते स्वकीयैरुदाहरणैः प्रदर्श्यन्ते। यथा वैतालीयसमपादचतुष्टययुताऽन्येयं दक्षिणान्तिका। यथा—

पुरुषश्रेष्ठतमः स पूरुषो विषयैर्यस्य मनो हृतं न हि।
पुरुषक्षुद्रतमः स पूरुषो विषयैर्यस्य मनो हृतं मुहुः ॥

वैतालीयविषमपादरचितोत्तरान्तिका। यथा—

विषयान्विषमान्विषोपमानवधार्य ततोऽवधीर्य च।
कुरु राघवचिन्तनं सदा यदि ते हितमीहितं स्वकम् ॥

तथाऽऽपातलिकाप्राच्यवृत्त्योर्विषमपादाभ्यां क्रमेण रचितोपपातलि-

---

४-५ र. ल. गु. ४-५ र. ल. गु.

हरति कस्य हृद—यं नका-मि-नः सुरतकेलिकुश-लाऽपरा—न्ति——का ॥
।।। ऽ। ।।, ऽ। ऽ, ।, ऽ, ।।।ऽ।।।, ऽ। ऽ, ।, ऽ.

(१) एतदुदाहरणान्तरमपि तत्रव—

२-३ र. ल. गु. २-३ र. ल. गु.

मनाक्प्रसृत—दन्तदी-धि-तिः स्मरोल्लसित-गण्डम——ण्ड——ला ॥
। ऽ ।।।, ऽ।ऽ, ।, ऽ, ।ऽ।।।, ऽ। ऽ, ।, ऽ.

२-३ र. ल. गु. २-३ र. ल. गु.

कटाक्षललि-ता तु का-मि—नी मनो हरति चारुहा—सि——नी ॥
।ऽ।।।, ऽ। ऽ, ।, ऽ, ।ऽ।।।, ऽ। ऽ, ।, ऽ.

का नाम । यथा—

यः पुरतो वक्त्यतिमिष्टं दोषभाषणरतः परोक्षतः ।
वाञ्छसि सौख्यं त्यज तं द्राङ् मित्रसंज्ञितमरिं विषोपमम् ॥

तथा यद्यापातलिकादीनां सप्तानां छन्दसां प्रतिपादमन्तेऽधिकैकगुरुयोगः स्यात्, तदा तन्नामकान्यौपच्छन्दसिकानि सप्त भवन्ति । तत्रापातलिकौपच्छन्दसिकम् । यथा—

आपातलिकादिषु चेदेको गुरुरधिको भवति प्रतिपादान्ते ।
आपातलिकादिकसंज्ञायुगौपच्छन्दसिकं तदभिप्रेतम् ॥

एवं दक्षिणान्तिकौपच्छन्दसिकादौ ग्रन्थगौरवप्रसङ्गादस्मदनुक्तान्युदाहरणान्यूह्यानि । एवं च वैतालीयसङ्ख्या सप्तत्रिंशत् ३७ ॥ २० ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकर-
टीकायां वैतालीयप्रकरणम् ॥

अथ वक्त्रस्याऽष्टाक्षरत्वेनानुष्टुभि वक्तव्यस्याऽपि तद्वत्सकलस्य नियतगुरुलघुत्वाभावात्पथ्याचपलादिसंज्ञा कार्या । मात्रावृत्तनामसाङ्कर्याच्च मात्रावृत्तप्रस्ताव एव लक्षणमाह—

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥ २१ ॥(१)

आद्यादक्षरादूर्ध्वं न्सौ नगणसगणौ न स्याताम्, मगणादिर्यथेच्छं स्यात्, अब्धेश्चतुर्थादक्षरादूर्ध्वं यो यगणः स्याद्यदि, तदा वक्त्रंनाम ख्यातम् । तच्चानुष्टुभि ख्यातमुक्तमाचार्यैरिति । यदातदाशब्दाध्याहारेण ख्यातशब्दावृत्त्या च व्याख्येयम् । यद्यप्याद्यादब्धेश्चेति गणग्रहणमपि सम्भवति तथाप्यनुष्टुभि ख्यातमित्यष्टाक्षरत्वसूचनाद्गणचतुष्टयासम्भवादब्धिग्रहणस्याऽक्षरपरता । आद्यग्रहणस्यापि च तत्समभिव्याहाराद्गणग्रहणे चतुर्थाक्षरमादाय गकारमभाश्चतुर्थाक्षरादूर्ध्वं यगणारम्भायोगा-

---

(१) एतदुदाहरणान्तरं यथा छन्दोवृत्तौ—

ल.	य.	य.	गु.	ल.	य.	य.	गु.
न—वधारा	म्बुसंसि	क्तं		व—सुधाग	न्धिनिश्वा	सम् ॥	
।, ।ऽऽ,	।ऽऽ,	ऽ,		।,	।ऽऽ,	।ऽऽ,	ऽ.
गु.	ज.	य.	गु.	ल.	त.	य.	गु.
किं—चिदुन्न	तघोणा—	ग्रं		म—ही काम	यतेव	क्त्रम् ॥	
ऽ,	।ऽ।,	।ऽऽ,	ऽ,	।,	ऽऽ।,	।ऽऽ,	ऽ.

ष्वाक्षरपरतैव । आद्यात्परतो नगणसगणनिषेधेन द्वितीयतृतीयवर्णान्यतरस्य गुरुताऽवश्यं भवतीति सूचितम् । अनुष्टुभि ख्यातमित्यनेनाष्टाक्षरपादता सूचिता । अतश्चाऽनुक्तोऽन्यष्टमो वर्णो ज्ञेयः । समयोश्च पादयोः प्रथमादक्षरादूर्ध्वं रगणोऽपि न कार्य इति सम्प्रदायः । अत्राद्ये पादे प्रथमस्थाने गुरुलघुरूपौ द्वौ विकल्पौ, द्वितीये नसनिषेधाच्छेषाः षड्गणाः, तृतीयस्थान एको य एव, चतुर्थस्थाने ग्लौ । अन्योन्यघाते चतुर्विंशतिः । एवं द्वितीयादिपादत्रयेऽपि प्रत्येकं चतुर्विंशतिः । तेषां परस्परहतौ जातं त्रयो लक्षाः एकत्रिंशत्सहस्राणि सप्त शतानि षट्सप्ततिश्चेति सङ्ख्या । अङ्कतोऽपि ३३१७७६ । एषैव सङ्ख्या प्रत्येकं पथ्यावक्त्रादिषु त्रिषु भेदेषूह्या । सम्प्रदायमाश्रित्य द्वितीयचतुर्थपादयोर्द्वितीयस्थाने रगणस्यापि निषेधात्समयोः प्रत्येकं विंशतिर्भेदाः, विषमयोश्चतुर्विंशतिरेव । तेषामन्योन्यघाते जाता सङ्ख्या लक्षद्वयं त्रिंशत्सहस्राणि चत्वारि शतानि । अङ्कतोऽपि २३०४०० ॥ २१ ॥

अन्धेर्य इत्यस्यापवादेनास्यैव भेदानाह—

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥ २२ ॥(१)

युजोर्युग्मयोर्द्वितीयचतुर्थचरणयोः सरिद्भर्तुश्चतुर्थाक्षरात्परेण जगणेन पथ्यावक्त्रं प्रकीर्तितम् । पिङ्गलेन "पथ्या युजो ज्" (पिं०सू०१-१४) इति सूत्रे इत्यर्थः । विषमयोस्तु यगणः सामान्यप्रायः ॥ २२ ॥

ओजयोर्जेन वारिधेस्तदेव विपरीतादि ॥ २३ ॥(२)

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

गु.	त.	य.	ल.	गु.	म.	ज.	ल.
नि—	त्यं नीति-निपुण—	स्य रा—	ज्ञो राष्ट्रं	न सीद	ति ॥		
ऽ,	ऽ ऽ ।,	। ऽ ऽ,	।,	ऽ,	ऽ ऽ ऽ,	। ऽ ।,	।.

ल.	य.	य.	गु.	गु.	म.	ज.	गु.
न हि पथ्या-	शिनःका—	ये जा—	यन्ते व्या-	धिवेद—	नाः ॥		
।,	। ऽ ऽ,	। ऽ ऽ,	ऽ,	ऽ,	ऽ ऽ ऽ,	। ऽ ।,	ऽ.

(२) उदाहरणान्तरं तत्रैव यथा—

गु.	य.	ज.	गु.	गु.	म.	य.	गु.
भ—	र्तुराज्ञा-	ऽनुवर्त्ति—	नी या स्त्री	स्यात्सा-	स्थिरा ल-	क्ष्मीः ॥	
ऽ,	। ऽ ऽ,	। ऽ ।,	ऽ,	ऽ,	ऽ ऽ ऽ,	। ऽ ऽ,	ऽ

विषमपादयोश्चतुर्थादूर्ध्वं जगणेन तदेव पथ्यावक्त्रं विपरीतशब्दादि विपरीतपथ्येति ज्ञेयमित्यर्थः । समयोर्य एव ॥ २३ ॥

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ २४ ॥(१)

अयुजोर्विषमयोः पयोराशेश्चतुर्थान्नकारश्चेन्नगणश्चेच्चपलावक्त्रम् । समयोर्य एव ॥ २४ ॥

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥ २५ ॥

युग्मे द्वितीये चतुर्थे च पादे सप्तमो वर्णो लो लघुः सा युग्मविपुला मता सम्मता । यद्यपि पथ्यायामपि युजोः सप्तमो लस्तथापि तत्र जगणेनैव, अत्र तु नभजतैः सप्तमस्य लघुतेति न सङ्करः । तथाऽपि जगणपक्षे सङ्कर एवेति चेत्, तर्हि तत्र संज्ञाविकल्प एवास्तु । ये त्वत्र जेन सप्तमस्य नैव लघुतेत्यसङ्करमाहुस्तेषां मूलस्य लक्ष्यविरोधः । जगणेन लघुकरणात् ।

सैतवेन पथाऽर्णवं तीर्णो दशरथात्मजः ।
रक्षःक्षयकरीं पुनः प्रतिज्ञां स्वेन बाहुना ॥

इति सैतवमतेन विपुलोदाहरणे जकारेणैव वृत्तिकृता लघुकरणात्तद्विरोधश्चेति पूर्वमेवोत्तरं युक्तं संज्ञाविकल्प इति । अत्र समपादयोस्तृतीये स्थाने चत्वारो विकल्पाः शेषेषु प्राग्वत् । तेन समयोः परस्परहता षण्णवतिर्भेदाः, विषमयोः प्रत्येकं पूर्ववच्चतुर्विंशतिः । परस्परहतौ सङ्ख्याऽपि त्रिपञ्चाशल्लक्षाः, अष्टौ सहस्राः चत्वारि शतानि षोडश च अङ्कतोऽपि ५३०८४१६ । अत्राऽयुग्मे यस्यां लः साऽयुग्मविपुलेत्यकारप्रश्लेषेणापि केचिद्व्याचक्षते । पादव्यत्ययं यत्रोदाहरणमाहुः । विपरीतपथ्या-

---

गु.	य.	ज.	गु.	ल.	म.	य.	गु.
स्व—प्रभुत्वाऽ-भिमानि—नी				वि—परीता परित्या—ज्या ॥			
ऽ,	।ऽऽ,	।ऽ।,	ऽ,	।,	।ऽऽ,	।ऽऽ,	ऽ.

(१) उदाहरणान्तरं यथा तत्रैव—

गु.	य.	न.	गु.	गु.	य.	य.	गु.
क्षी— यमाणाऽग्रदश—ना				व—क्त्रानिर्मा-सनासा—ग्रा ॥			
ऽ,	।ऽऽ,	।।।,	ऽ,	ऽ,	ऽऽऽ,	।ऽऽ,	ऽ.
गु.	य.	न.	गु.	ल.	य.	य.	गु.
क—न्यका व-क्त्रचप—ला				ल—भते धू—र्त्तसौभा—ग्यम् ॥			
ऽ,	।ऽऽ,	।।।,	ऽ,	।,	।ऽऽ,	।ऽऽ,	ऽ.

चपलावक्त्राभ्यां चैवं भेदः । तत्र जगणनगणाभ्यां सप्तमस्य लघुता, अत्र तु भ-ताभ्यामपि तस्य तथात्वमिति । उदाहरणं च सप्तमस्य लघुत्वमात्रतात्पर्येण जगणे भराभावेनोक्तमिति चाहुः ॥ २५ ॥

सैतवस्याऽखिलेष्वपि ॥ २६ ॥

सैतवस्याऽऽचार्यस्य मतेऽखिलेष्वपि पादेषु सप्तमो लः स्यादिति । स्मृत इत्यध्याहारेण सप्तमो ल इति पादानुषङ्गेण व्याख्येयम् । संज्ञा तु विपुलेति निरुपपदैव । अत्र प्रतिपादं षण्णवतिभेदाः । तेषां परस्परहतौ सङ्ख्या अष्टौ कोट्य एकोनपञ्चाशल्लक्षाश्चतुस्त्रिंशत्सहस्राणि षट्शती षट्पञ्चाशच्च । अङ्कतोऽपि ८४९३४६५६ ॥ २६ ॥

भेनाऽब्धितो भाद्विपुला ॥ २७ ॥

अब्धितश्चतुरक्षरात्परेण भेन भगणेन भाद् भ इत्यक्षरात्परा विपुला । भविपुलेत्यर्थः । केचिदत्र 'अखिलेष्वपि' इत्यनुवर्तयन्ति । वृत्तिकृतस्तु "भ्रौ न्तौ च" (पिं० सू० ५-१९) इति सूत्रे "सर्वतः सैतवस्य" (पिं० सू० ५-१८) इति निवृत्तम् । "चपलायुजोर्" (पिं० सू० ५-१६) इत्यस्मादयुग्ग्रहणमनुवर्तते" इति वदन्तो विषमपादविषया एव भविपुलाद्या इत्याहुः ॥ २७ ॥

इत्थमन्या रश्चतुर्थात् ॥ २८ ॥

चतुर्थाक्षरात्परतश्चेद्रः रगणस्तदेत्थमन्या यथा भाद्विपुला तथा रादिति रविपुलेत्यर्थः ॥ २८ ॥

नोऽम्बुधेश्चेन्नविपुला ॥ २९ ॥

अम्बुधेश्चतुर्थान्नो नगणश्चेत्तदा नपूर्वाऽन्या विपुला । नविपुलेत्यर्थः ॥ २९ ॥

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥ ३० ॥

अब्धेश्चतुर्थात्परस्तगणश्चेत्तदा तत्पूर्विका तकारपूर्विकाऽन्या विपुला तविपुलेत्यर्थः । एवं मयाभ्यां तत्पूर्वे विपुले भवतः । अत्रैतासु चतसृषु पादचतुष्केऽपि तत्तद्गणयोगस्य ये सत्त्वमाहुस्तेषां मतेन यत्रैकस्मिन्द्वयोर्वा तत्तद्गणयोगस्तत्रासां परस्परसंसर्गेणान्ये भेदा ज्ञेयाः । वृत्तिकृन्मते तु विषमपादयोरेतद्गणयोगः, अन्ययोस्तु सप्तमस्य लघुत्वमात्रम् । यत्र तु चतुर्ष्वपि पादेषु भादियोगस्तस्यानुष्टुभ्यमेव । न तु वक्त्रत्वमिति विवेकः । तत्राप्ययुक्पादस्य जातिपरत्वे द्वयोरप्ययुजोर्भगणादियोगः, व्यक्तिपरत्वे त्वन्यतराङ्गीकारेणापि लक्षणार्थसिद्धेराद्ये तृतीये वा भगणादियोगः । जातिपक्षे भ-विपुलोदाहरणम्—

इयं सखे ! चन्द्रमुखी स्मितज्योत्स्ना च मानिनी ।
इन्दीवराक्षी हृदयं दन्दहीति तथापि मे ॥

आद्ये भ-विपुलोदाहरणम्—

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ (शि.२-१०)

तृतीये—

प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ।
कृष्णोत्तरासङ्गरुचं विदधद्द्योतपल्लवीम् ॥ (शि.२-१६)

रेफविपुलायाः क्रमणोदाहरणानि—

सकारनानारकासकायसाद्दसायका ।
रसाहवा वाहसारनादवाददवादना ॥ (शि.१६-२६)
महाकविं कालिदासं वन्दे वाग्देवतां गुरुम् ।
यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत् ॥
कामिनीभिः सह प्रीतिः कस्मै नाम न रोचते ।
यदि न स्याद्वारिवीचिचञ्चलं हन्त जीवितम् ॥

न-विपुलोदाहरणानि क्रमेण—

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥ (कि.११-१५)
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ (र. १२-१२)
तव मन्त्रकृतो मन्त्रैर्दूरात्संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥

तत्र त-विपुलोदाहरणानि—

सा वैदुष्ये प्रौढिर्यदि सर्वशास्त्रानुगामिनी ।
सा शूरता श्रेष्ठा यदि सर्वशास्त्रानुगामिनी ॥
वन्दे गुरुं रामेश्वरं सर्वशास्त्रविशारदम् ॥
विस्मेराः कम्प्रशिरसो यस्योक्तौ पण्डिताः परे ॥
लोकवत्प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः ।
लोकव्यवहारं प्रति सदृशौ बालपण्डितौ ॥

म-विपुलोदाहरणानि—

सखा गरीयाञ्शत्रुश्च कृत्रिमस्तौ हि कार्यतः ।
स्यातामभिमित्रौ मित्रे च सहजप्राकृतावपि ॥ (शि.२-३६)
यियक्षमाणेनाऽऽहूतः पार्थेनाथ द्विषन्मुरम् ।
अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः ॥ (शि.२-१)

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् ॥ (शि.२-२६)

य-विपुलोदाहरणानि—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥
नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥
तथाप यन्मय्यपि ते गुरुरित्यस्ति गौरवम् ।
तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः ॥ (शि.२-७१)

एवं ज-विपुलाप्युदाहार्या । तत्र तु समपादयोश्चतुर्थादूर्ध्वं जगणेन पथ्यावक्त्रता, सप्तमस्य लघुतामात्रत्वे ज-विपुलात्वमिति विवेकः । स-विपुला तु कविप्रयोगाभावान्नास्ति । अन्येषां तु मते "युयुत्सुनेव"(कि.११-१५) इत्यादीनां विषमयोश्चपलादित्वात्समयोस्तु पथ्यात्वाच्चपलापथ्यावक्त्रादिसंज्ञा भवन्ति । एवं विपुलापथ्येत्यादिसंज्ञा ज्ञेयाः । अत्र वृत्तिकृन्मते सर्वासु भ-विपुलादिषु विषमपादयोः प्रत्येकं चतुर्विंशतिर्भेदाः, समयोः प्रत्येकं षण्णवतिः । परस्परहतौ युग्मविपुलावत्सङ्ख्या ज्ञेया । अन्येषां मते तु मुख्यवक्त्रवत्सङ्ख्या । तथा सङ्कीर्णगणतायां सङ्कीर्णविपुलावक्त्रं भवति । भारवेः—

क्वचिदग्रे प्रसरता क्वचिदाप्लुत्य निघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां कुलम् ॥ (१)

कुमारे—

यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याऽविषयं मनोविषयमात्मनः ॥ (कु.६-१७)

माघे—

भवद्भिरामवसरप्रदानाय वचांसि नः ।
पूर्वरङ्गप्रसङ्गाय नाटकीयस्य वस्तुनः ॥ (शि.२-८)

इत्यादयो विपुलाभेदा अनन्ता एव कविप्रयोगेषु द्रष्टव्याः । सर्वेषु तु प्रायेण चतुर्थवर्णस्य गुरुतेति साम्प्रदायिकाः ॥ ३० ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां वक्त्रप्रकरणम् ॥

---

(१) नायं श्लोकः समुपलभ्यते भारवेः सुप्रसिद्धायां कृतौ किरातार्जुनीयमहाकाव्ये इति विचारणीयं पण्डितैः । अधुनाऽवधि भारविकवेरन्तरेण किरातार्जुनीयं न काऽपि कृतिरन्या नयनपथं श्रवणपथं वा समारूढा ।

अथ मात्रासमान्याह—

द्विगुणितवसुलघुरचलधृतिरिति ॥ ३१ ॥ (१)

वर्णच्छन्दोऽप्येतद् द्विगुणितवसुपदस्योत्तरत्राऽनुवृत्तिसिद्ध्यर्थं प्रकीर्णकेष्वभ्यधायि । तेन मात्रासमकादिषु षोडशमात्रत्वमधिकृतं भवति । द्विगुणाः वसुलघवोऽष्टौ लघवो यस्यां साऽचलधृतिरिति कथ्यते । चकाराद्वीत्यार्येत्यपि संज्ञा भवति, इति पिङ्गलमतसङ्ग्रहः । षोडशलघुपादेत्यर्थः ॥ ३१ ॥

मात्रासमकं नवमो लगान्तम् ॥ ३२ ॥ (२)

यत्र पादे नवमो ल लघुरेव गुरुश्चाऽन्ते नियतस्तन्मात्रासमकसंज्ञम् । नवमाऽन्त्ययोर्लघुगुरुनियमाच्छेषे नियमाऽभावः सूचितः । सर्वथा षोडशमात्रता कार्येति भावः । सर्वेषु मात्रासमेषु सममात्रा परेण युक्ता न कार्येत्यपि सम्प्रदायः । ततश्च प्रथमे जगणाभावाच्चत्वारो गणविकल्पाः ।

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
म-द-क-ल-ख-ग-ऊ-ल-क ल-र-व-मु-ख-रि-णि
। । । । । । । । । । । । । । । ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
वि-क-सि-त-स-र-सि-ज-प-रि-म-ल-सु-र-भि-णि ॥
। । । । । । । । । । । । । । । ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
गि-रि-व-र-प-रि-स-र-स-र-सि-म-ह-ति-ख-लु
। । । । । । । । । । । । । । । ।
१ २ ३ ४ ५ ६ ७ ८ ९ १०।११ १२ १३ १४ १५ १६
र-ति-र-ति-श-य-मि-ह म म ह दि वि-ल-स-ति ॥
। । । । । । । । । । । । । । । ।

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

	ल.	गु.		ल.	गु.
	⏑	⏓		⏑	⏓
	९			९	
अश्मश्रुमुखो	विरलैर्दन्तै—		गम्भीरास्यो	मितनासाग्रः ॥	
ऽऽ।।ऽ,	।,।।ऽऽ,		ऽऽऽऽ,	।,।ऽऽऽ.	
	ल.	गु.		ल.	गु.
	⏑	⏓		⏑	⏓
	९			९	
निर्मांसहनुः	स्फुटितैः	केशै—	मात्रासमकं	लभते दुःखम् ।।	
ऽऽ।।ऽ,	।, ।ऽ	ऽऽ,	ऽऽ।।ऽ,	।,।ऽ	ऽऽ.

यथा—ऽऽ, । । ऽ, ऽ । ।, । । । ।. द्वितीये त्रयः—ऽऽ, । । ऽ, ऽ । ।, मध्यगुरुसर्वलघुगणौ विश्लोकस्येष्टत्वान्न भवतः । तृतीये एकः—। । ऽ. "नवमो ल्" इति वचनादादिगुरुसर्वगुरू न भवतः । मध्यगुरुसर्वलघू तु वानवासिकालक्षणस्पृष्टत्वान्न भवतः । चतुर्थे द्वौ—ऽऽ, । ।ऽ. गन्तत्वाभिधानादन्ये गणा न भवन्ति । एतेषां विकल्पानामन्योन्यघाते प्रतिचरणं चतुर्विंशतिर्भेदाः । चतुर्णां चतुर्विंशत्यङ्कानामन्योन्यहतौ वक्त्रवदेव जाता सङ्ख्या लक्षत्रयं एकत्रिंशत्सहस्री षट्सप्तत्यधिकसप्तशती चेति । अङ्कतोऽपि ३३१७७६ ॥ ३२ ॥

जो न्लावथाम्बुधेर्विश्लोकः ॥ ३३ ॥ (१)

अथेत्यथवेत्यर्थे । अम्बुधेः कलाचतुष्टयादूर्ध्वं जगणोऽथवा न्लौ चतुर्लघुर्वा गणः स्यात् । शेषं पूर्ववत् । स विश्लोको नाम मात्रासमकम् । यद्यपि "विश्लोकः पञ्चमाष्टमौ" (पिं० सू० ४-४४) इति सूत्रे पञ्चमाष्टममात्रयोर्लघुत्वमात्रमुक्तम्, तथाऽपि पञ्चमाष्टमयोर्लघुता चतुर्थमात्रानन्तरं जगणचतुर्लघ्वोरेव भवति, नान्यथेत्यभिप्रायेणैवमूचिवान् । जपक्षे इदमेवोदाहरणम् । लपक्षे तु "सेव्यो रघुपतिरात्महितार्थम्" । अत्राद्ये गणे विकल्पाश्चत्वारः । यथा—ऽऽ, । ।ऽ, ऽ । ।, । । । ।. द्वितीये द्वौ—। ऽ ।, । । । ।. तृतीयेऽपि द्वौ—ऽऽ, ऽ । ।. मध्यगुर्वन्तगुरुसर्वलघुरूपं भेदत्रयं तु चित्रापादकत्वान्न भवति । चतुर्थे गुर्वन्तं गणद्वयम्—। ।ऽ, ऽऽ. एतेषां परस्परघाते द्वात्रिंशत्प्रतिपादभेदाः । एतेषां घाते जाता सङ्ख्या दश लक्षा अष्टाचत्वारिंशत्सहस्राणि पञ्च शतानि षट्सप्ततिश्चेति । अङ्कतोऽपि १०४८५७६ ॥ ३३ ॥

---

(१) उदाहरणान्तरं यथा मम—

ज. गु. ज. गु.

यो नै-वचिन्त— येत्तो पा-दौ नामाऽ—पि नो स्म—रेत्तेज्ञा- तु ॥
ऽ ऽ, । ऽ ।, ऽऽ ऽ, ऽ, ऽ ऽ, । ऽ ।, ऽऽ ऽ, ऽ.

ज. गु. ज. गु.

नूनं कृपानि— धे हे मा-त लोके स जाय—ते विश्लो कः ॥
ऽ ऽ, । ऽ ।, ऽ ऽ ऽ, ऽ, ऽ ऽ, । ऽ ।, ऽ ऽ ऽ, ऽ.

तद्युगलाद्वानवासिका स्यात् ॥ ३४ ॥ (१)

तद्युगलादम्बुधियुगलादष्टमात्रानन्तरं यदि जो न्लौ वा सा वानवासिकेति । "जो न्लावथ" (वृ. र. २-३३) इति पदत्रयमनुषज्य योज्यम् । अत्रापि "द्वादशश्च वानवासिका" (पिं. सू. ४-४३) इति सूत्रे द्वादशचकारलभ्यनवमयोर्लघुतोक्ता, सा चैवमेव नान्यथेत्येवमेवोक्तम् । जपत्त इदमुदाहरणम् । 'लपत्ते यथा—"लोकहितार्थं हरिहरमूर्ती" । अत्राद्ये गणे विकल्पाश्चत्वारः-ऽऽऽ, ।।ऽ, ऽ।।, ।।।।. द्वितीये त्रयः-ऽऽऽ, ऽ।।, ।।ऽ. तृतीये द्वौ-।ऽ।, ।।।।. चतुर्थेऽपि द्वौ-ऽऽ, ।।ऽ. एतेषामन्योन्यताडने भेदाः प्रतिपादमष्टाचत्वारिंशत् । अन्योन्यहतौ जाता सङ्ख्या त्रिपञ्चाशल्लक्षा अष्टौ सहस्राणि चत्वारि शतानि षोडश च । अङ्कतोऽपि ५३०८४१६ ॥ ३४ ॥

बाणाष्टनवसु यदि लश्त्रिा ॥ ३५ ॥ (२)

---

(१) अत्रोदाहरणान्तरं यथा मम—

ज. गु. ज. गु.

या निजभर्त्तु—र्हिताय नि—त्यं दुःखसुखे म न्यते तृ—णा—भ्याम् ॥
ऽ ।।ऽऽ, ।ऽ।, ऽ ऽ, ऽ ।।ऽ ऽ, ।ऽ।, ऽ ऽ.

ज. गु. ज. गु.

स्मेरमुखा स्व—प्रियप्रि—या स्या—त्सा रमणी वा—नवासि—काऽपि ॥
ऽ।।ऽ ऽ, ।ऽ।, ऽ ऽ, ऽ ।।ऽ ऽ, ।ऽ।, ऽ ऽ.

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

ल. ल. ल. गु.

यदि वा—ञ्छ—सि—प—र—प—द—मारोढं.
।। ऽ । । । । । ऽ ऽ ऽ

ल. ल. ल. गु.

मैत्रीं प—रि—ह—र स—ह व—नितामिः॥
ऽऽ । । । ।। । । । ऽ ऽ.

ल. ल. ल. गु.

मुह्यति मु—नि—र पि वि—षयास—ङ्गा-
ऽ।। । । । । । । ऽऽ ऽ.

ल. ल. ल. गु.

ध्रित्रा भ—वति हि म—नसोवृत्तिः ॥
ऽ ऽ । ।। । । । ऽऽ ऽ.

बाणाः पञ्च । पञ्चमाष्टमनवसु यदि लघुः स्यात् । शेषं पूर्ववत् । तदा चित्रा नाम । अस्यामाद्ये गणे चत्वारो विकल्पाः यथा-$\overset{१}{ऽ}\overset{२}{ऽ}\overset{३}{ऽ}$, ।$\overset{१}{ऽ}$, ऽ।$\overset{२}{।}$, ।।$\overset{३}{।}$, ।।।$\overset{४}{।}$ । द्वितीयेऽपि द्वौ-।$\overset{१}{ऽ}$, ।$\overset{२}{।}$।. तृतीये त्रयः-।।$\overset{१}{ऽ}$, ।$\overset{२}{ऽ}$।, ।।$\overset{३}{।}$।. चतुर्थे द्वौ-$\overset{१}{ऽ}\overset{२}{ऽ}$, ।$\overset{२}{ऽ}$. अन्योन्यघाते प्रतिपादं भेदसङ्ख्या अष्टाचत्वारिंशत्। अन्योन्यगुणने पूर्वैव सङ्ख्या ॥ ३५ ॥

उपचित्रा नवमे परयुक्ते ॥ ३६ ॥ (१)

नवमे मात्रास्वरूपे परेण दशमेन युक्ते मिलिते सत्युपचित्रा नाम । शेषं प्राग्वत् । जयदेवस्त्वेकादशादिमात्रास्वपि नियममाह—"अष्टभ्यो गो ल्यावुपचित्रा" इति । अष्टकलानन्तरं गुरुलघुयगणा इत्यर्थः । अत्र तृतीये गणे द्वौ विकल्पौ-$\overset{१}{ऽऽ}$, ऽ$\overset{२}{।}$ । अन्ये गणविकल्पा मात्रासमकवत् । अन्योन्यघाते प्रतिपादं भेदा अष्टाचत्वारिंशत् । अन्योन्यघाते सङ्ख्या प्राग्वत् ॥ ३६ ॥

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् ॥
अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकुलकम् ॥३७॥

अतीतानि पूर्वोक्तानि कृतानि विविधानि नानाप्रकाराणि यानि लक्ष्माणि लक्षणानि तद्युक्तैर्मात्रासमादीनां पञ्चानां पादैः कलितं रचितं तथाऽनियतवृत्तं पादचतुष्केऽपि नियतैकवृत्तलक्षणहीनं परिमाणेन च षोडशमात्रपादत्वेन युक्तम् । ततः कर्मधारयः । एतादृशं यद्वृत्तं तत्पादाकुलकमित्यन्वर्थसंज्ञया ज्ञेयमिति तच्छब्दाध्याहारेण योज्यम्। अथ प्रथमपादे मात्रासमकद्विश्लोकचित्राणां लक्षणयोगः, द्विश्लोकोपचित्रयोर्द्वितीये, मात्रासमकवानवासिकयोस्तृतीये, उपचित्राद्विश्लोकयोश्चतुर्थे इति । इदं च प्रतिपादमनेकपूर्वोक्तलक्षणं मत्वोदाहरणं मन्तव्यम् । अन्ये तु

---

(१) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

गु.	गु.	गु.	गु.
६-१०		६-१०	
यश्चित्तं गुरु— स— क्तमुदा—रं		विद्याभ्यासम—हा—	व्यसनं च ॥
ऽ ऽ ऽ । ।, ऽ,	। । ऽ ऽ,	ऽ ऽ ऽ । ।, ऽ,	। । ऽ ऽ.
६-१०	गु.	६-१०	गु.
पृथ्वी तस्य गु-णै-रुपचि—त्रा	—चन्द्रमरीचिनि—भै—र्भवती—यम् ॥		
ऽ ऽ ऽ । । ऽ, । । ऽ,	ऽ, ऽ । । ऽ । । ऽ,	ऽ, । । ऽ,	ऽ.

प्रतिपादमेकैकलक्षणयोगं वदन्तः समुदितेषु विविधलक्षणयोगाभिप्रायेणेदं व्याचक्षते। वयं तूभयथा व्याख्याने दोषाभावं वदामः। अत एव मात्रासमकादिप्रकृत्या "एभिः पादाकुलकम्" (पिं.सू.४-४७) इति सूत्रकारः सामान्यत एवाह। तथा मात्रासमकविश्लोकवानवासिकोपचित्राणामसङ्कीर्णपादवदुदाहरणमाह यथा—

अलिवाचालितविकसितचूते
काले मदनसमागमदूते ॥
स्मृत्वा कान्ता परिहृतसार्थः
पादाकुलकं धावति पान्थः ॥ इति।

सङ्कीर्णोदाहरणं तु मूल एव। तेनोभयथाऽपि न दोषः। अत्र पञ्चानां मात्रासमकादीनां परस्परसङ्करे अनन्ता एव भेदाः। तत्र यथा द्वयोर्द्वयोः सङ्करे चत्वारिंशदधिकं शतं भेदा भवन्ति। तद्यथा—

१ २	२ ३	३ ४	४ ५
१ ३	२ ४	३ ५	१४
१ ४	२ ५	२८	
१ ५	४२		
५६			

१४+२८+४२+५६=१४०

अत्रैककोष्ठस्याङ्कद्वयसङ्ख्याकवृत्तद्वयस्य सङ्करे वक्ष्यमाणोपजातिप्रस्तारमार्गेण चतुर्दश प्रतिकोष्ठं भेदा भवन्ति। एवं प्रथमद्वितीययोः प्रथमतृतीययोः प्रथमचतुर्थयोः प्रथमपञ्चमयोः सङ्करे चत्वारश्चतुर्दशका मिलिताः षट्पञ्चाशद् (५६) भवन्ति। द्वितीयतृतीयद्वितीयचतुर्थद्वितीयपञ्चमानां सङ्करे द्विचत्वारिंशत् (४२)। तथा तृतीयचतुर्थतृतीयपञ्चमानां सङ्करेऽष्टाविंशतिः (२८)। तथा चतुर्थपञ्चमयोः सङ्करे चतुर्दश (१४) इति। सर्वेषां मेलने शतमेकं चत्वारिंशच्च (१४०)। एवं त्रयाणां चतुर्णां सङ्करेऽप्यूह्याः। एतेषामुदाहरणान्न ह्यानि। विस्तरभयात्तु नोच्यन्ते। अत्राचलधृत्यादीनां सर्वेषां षोडशमात्रपदत्वेन समत्वान्मात्रासमकसंज्ञा ॥३७॥

अथोक्तानां वक्ष्यमाणानां च वृत्तानां गुरुलघुमात्रावर्णयत्तापरिज्ञानोपायमाह—

वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्तथा ॥
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥ ३८ ॥

वृत्तस्य ला मात्रा वर्णैर्विना गा गुरवो ज्ञेया इत्यध्याहारः । ला वर्णा गा इत्यादिभिर्वर्णैस्तत्सङ्ख्या लक्ष्यते । ततश्चायमर्थः—यदि वृत्तस्य मात्रावर्णयोः सङ्ख्या विज्ञाता, गुरुलघुसङ्ख्या च न ज्ञाता तदा मात्रासङ्ख्यायां वर्णसङ्ख्यामपनीयाऽवशिष्टा गुरुसङ्ख्या ज्ञेयेति, वर्णसङ्ख्यामध्ये च ज्ञातां गुरुसङ्ख्यामपनीयावशिष्टा लघुसङ्ख्या ज्ञेयेत्याशयः । यदि तु मात्राणां गुरूणां च ज्ञातसङ्ख्यत्वं वर्णाश्चाऽज्ञातसङ्ख्यास्तदा तज्ज्ञानोपायमाह—वर्णा इति । तथा वृत्तस्य मात्रा गुरुभिर्विना वर्णा ज्ञेया इत्यर्थः । वृत्तमात्रासङ्ख्यायां गुरुसङ्ख्यामपनीयाऽवशिष्टा वर्णसङ्ख्येत्यर्थः । वृत्तमात्रालघुसङ्ख्याज्ञाने सति गुरुज्ञाने प्रकारान्तरमाह—गुरव इति । वृत्तस्य ला इत्यनुषङ्गः । वृत्तस्य मात्राः लैर्लघुभिर्विना दलेऽर्धे कृते गुरवो ज्ञेयाः । वृत्तमात्रासङ्ख्यायां लघुसङ्ख्यामपनीयाऽवशिष्टां सङ्ख्यामर्धीकृत्य तावत्प्रमाणा गुरुसङ्ख्येत्यर्थः । उक्तां गुर्वादिसङ्ख्यामुपसंहरति—नित्यमिति । इत्यमुना प्रकारेण प्रमाणं गुर्वादीनां नित्यं सर्वदा निश्चितं भवतीति शेषः । वृत्तस्येत्युपलक्षणम् । गद्यादावपि सम्भवात् । अत्र च गुरुवर्णसङ्ख्याया ज्ञानोपायप्रदर्शनमुपलक्षणार्थम् । तथा हि मात्रावर्णगुरुलघुचतुष्टयात्मके वृत्ते द्वयोर्द्वयोरियत्तापरिच्छेदेऽन्ययोः सङ्ख्यापरिच्छित्तेः । तद्यथा-मात्रावर्णयोर्मात्रागुर्वोर्मात्रालघ्वोर्वर्णलघ्वोर्गुरुलघ्वोश्च षट्सु द्विकेष्वेकैकद्विकज्ञानेऽपरं द्विकमुक्तया दिशा ज्ञेयमिति । इदं सर्वमुदाहरणे योज्यते-"वागर्थाविव सम्पृक्तौ" (रघु.१-१) इत्यत्र चतुर्दशमात्रास्वष्टरूपां वर्णसङ्ख्यामपनीयाऽवशिष्टाः षड् गुरवः । वर्णसङ्ख्यापूरकौ च द्वौ । एवं षड्रूपां गुरुसङ्ख्यामपनीयाऽवशिष्टा वर्णा अष्टौ, गुरूणां षट्त्वादवशिष्टौ द्वौ लघू । एवं लघुद्वयमपनीयावशिष्टायां द्वादशसङ्ख्यायामर्धितायां षट्सङ्ख्या गुरवः, गुरुभिर्द्वादशमात्रासिद्धेश्चतुर्दशमात्रासिद्ध्यर्थं द्वौ लघू इति । एवं वर्णगुरुज्ञाने वर्णलघुज्ञाने गुरुलघुज्ञाने चेतरद्वयज्ञानं योज्यम् । एवं सर्वेषु गद्यपद्येषु ॥ ३८ ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां मात्रासमकप्रकरणम् ।

मात्रानियमघटितत्वान्मात्रावृत्तप्रसङ्गेन द्विखण्डकान्याह—

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम् ॥
सगुरु शकलयुगलकमपि सुपरिघटितललितपदवितति भवति
शिखा ॥ ३६ ॥ (१)

शिखिनो गार्हपत्याहवनीयदक्षिणाग्न्याख्यास्त्रयोऽग्नयः । तैस्त्रित्वाख्या तत्सङ्ख्या लक्ष्यते । तेन शिखिभिर्गुणितास्त्रिगुणीकृता ये दश लघवस्तै रचितमेकं शकलमित्यध्याहारः, अपरमित्यग्रेऽभिधानात् । तच्चाऽपगतं न्यूनं लघुद्वयं यस्मात्तादृक्कार्यम् । अपरं द्वितीयम् शकलमित्यर्थः । इदं पूर्वोक्तमखिलं समग्रं लघुद्वयान्न्यूनं त्रिंशल्लघुकं भवति । शकलयुगलकमर्धद्वयमपि सगुरु अन्तेऽधिकैकगुरुयुक्तम् । सुष्ठु परिघटिता रचिता ललिता पदवितितिः पदरचना यत्र तत् तादृशं च भवति शकलयुगलं यस्यां सा शिखेति, यत्तच्छब्दाऽध्याहारेणार्थः । अयं भावः-पूर्वार्धेऽष्टाविंशतिर्लघव एको गुरुरिति एकोनत्रिंशदक्षराणि, उत्तरार्धे त्रिंशल्लघव एकश्च गुरुरित्येकत्रिंशदक्षराणि यत्र सा शिखेति । सुपरिघटितेतिपदेन श्रुतिसुखकर्त्री यतिः कार्येति सूचयति ॥ ३६ ॥

---

(१) अत्रोदाहरणान्तरं यथा मम—

२८ लघवः

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
भ-	ग-	व-	ति-	पु-	र-	म-	थ-	न-	म-	हि-	षि-	सु-	र-	मु-	नि
।	।	।	।	।	।	।	।	।	।	।	।	।	।	।	।

१ गु.

१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९
ग-	ण-	प-	रि-	च-	रि-	त-	च-	र-	ण-	क-	म-	ले ॥
।	।	।	।	।	।	।	।	।	।	।	।	ऽ

३० लघवः

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
भ-	व-	नि-	ज-	च-	र-	ण-	क-	म-	ल-	यु-	ग-	ल-	प-	रि-	च
।	।	।	।	।	।	।	।	।	।	।	।	।	।	।	।

१ गु.

१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३१
र-	ण-	द्रू-	ढ-	म-	ति-	वि-	त-	र-	ण-	कृ-	द-	वि-	र-	तम् ॥
।	।	।	।	।	।	।	।	।	।	।	।	।	।	ऽ

विनिमयविनिहितशकलयुगल -
कलितपदवितितिविरचितगुणनिचया ॥
श्रुतिसुखकृदियमपि जगति त्रि
जशिर उपगतवति सति भवति खजा ॥४०॥ (१)

इयमेव शिखा यदि विनिमयेन व्यत्यासेन विनिहितं न्विवेशितं यच्छकलयुगलं तेन कलिता घटिता पदसमुदायकृतसौकुमार्यादिगुणसमुदायवती च, कलितान्तस्य पदादिना कर्मधारयः। श्रुतिसुखकारिणी वेति पूर्ववद्यतिः कार्येति सूचितम्। त्रि त्रकारे। जशिर इति जकारप्रागुच्चारणे प्राप्ते सति खजा भवति। खञ्जेति यावत्। गुरुद्वयस्य छन्दसि प्रवेशयितुमशक्यत्वादुक्तिप्रकारोऽयम्। विनिमयविनिहितशकलयुगललघुललितपदवितितिरचितेति पाठे युगलान्तस्य लघ्वित्यादिना कर्मधारयः। यद्यपि सूत्रकारेण "अर्धे" (पिं.सू.५-३१) इत्यधिकृत्य "शिखैकान्नत्रिंशदेकत्रिंशदन्ते गः" (पिं.सू.५-४३) इति "खञ्जा महत्ययुजीति" (पिं.सू.५-४४) इति च वदता पूर्वोक्तनियमवदेकोनत्रिंशदक्षरैकोनत्रिंशदक्षररचितक्रमवद्व्युत्क्रमवत्पादद्वयघटितार्धद्वयवत्यौ विंशत्यधिकशताक्षरे शिखाखञ्जे उक्ते, अत्र तु षष्ट्यक्षरे एवेति विरोधस्तथापि ग्रन्थान्तरपर्यालोचनयैवमुक्तिः। यद्वा सूत्रकारोक्तशिखाखञ्जाभ्यामेते अन्ये एव सूत्राऽनुक्ते एवात्रोक्ते। सूत्रोक्ते तु चतुर्थेऽध्याये अर्धसमत्वात्स्वयमूह्ये। अथवोभयत्रापि शकलशब्दावयववचनत्वात्पादरूपावयवपरौ कृत्वा मूलोदाहरणे चार्धविषये मत्वार्धसमत्वेऽपि च मात्रानियमात्मकत्वान्मात्रावृत्तप्रकारेणोक्तिं समाधाय सूत्रानुसारः कार्य इति सर्वं सुस्थम् ॥ ४० ॥

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः साऽनङ्गक्रीडोक्ता।
दलमपरमपि वसुगुणितसलिलनिधिलघु कविरचितं
पदवितति भवति ॥ ४१ ॥ (२)

वृत्तरत्नाकरमतेनेदमुदाहरणम्। पिङ्गलमते तु पादचतुष्टयघटितम्। तत्र च प्रथमतृतीयपादयोः २८ अष्टाविंशतिलघवः गुरुश्चान्त एकः।

द्वितीयचतुर्थपादयोश्च ३० त्रिंशल्लघवः अन्ते गुरुश्चैकः। तदुदाहरणं छन्दोवृत्तौ द्रष्टव्यम्।

(१) एतदुदाहरणं 'भगवति' इति व्यत्यस्तं पठनीयम्।

(२) अत्रोदाहरणान्तरं यथा छन्दोवृत्तौ—

यस्या अर्धेऽष्टौ गा गुरवो द्व्यभ्यस्ता द्विगुणाः षोडशेत्यर्थः । अपिश्चार्थः । अपरं च दलं द्वितीयमर्धवसवोऽष्टौ तैर्गुणिताः सलिलनिधिलघवश्चत्वारो लघवो द्वात्रिंशद्यत्र तत्तादृक्कविना रचिता पदानां विततिर्विस्तरो यत्र तादृक् भवति साऽनङ्गक्रीडेति संज्ञयोक्ता वृत्तज्ञैः । पूर्वार्धे षोडश गुरवः, उत्तरार्धे द्वात्रिंशल्लघवः कार्या इति तात्पर्यार्थः । कवीत्यादिना श्रुतिसुखा यतिर्भवतीत्यसुसूचत् । पैङ्गले त्वियं सौम्येति संज्ञिता । इयमेव व्यत्यस्तार्धतायां ज्योतिराख्या भवति । उदाहरणं तु—

यदि सुखमनुपममपरमभिलषसि परिहर युवतिषु रतिमतिशयमिह ।
आत्मज्योतिर्योगाभ्यासाद् दृष्ट्वा दुःखच्छेदं कुर्याः ॥

अनयोर्द्वयोः शिखेति सामान्यसंज्ञा पैङ्गले उक्ता ॥ ४१ ॥

त्रिगुणनवलघुरवसितिगुरुरिति
दलयुगकृततनुरतिरुचिरा ॥ ४२ ॥ (१)

१६ गुरवः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
सौ-म्यां दृ-ष्टिं दे-हि स्ने-हा-र्द्रे-हेऽ-स्मा-कं मा-नं मु-क्त्वा ॥
ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ.

३२ लघवः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
श-श-ध-र-मु-खि मु-ख-म-प-न-य म-म हृ-दि
। । । । । । । । । । । । । । । ।

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२
म-न-सि-ज-रु-ज-म-प-हृ-र ल-घु-त-र-भि-हृ ॥
। । । । । । । । । । । । । । । ।

(१) अत्रोदाहरणान्तरं छन्दोवृत्तौ यथा—

२७ लघवः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
र-ति-क-र-म-ल-य-म-रु-ति-शु-भ-श-श-म-भि
। । । । । । । । । । । । । । । ।

१ गु.

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८
ह-त-हि-म-म-ह-सि-म-धु-स-म-यं ॥
। । । । । । । । । । । ऽ.

त्रिगुणा नव लघवो यत्र, सप्तविंशतिरित्यर्थः । अवसितावसाने गुरुर्यस्याः सा तथा इत्यमुना प्रकारेणार्धद्वयरचितशरीरातिरुचिरासंज्ञा। पैङ्गले त्वियं चूलिकेत्युक्ता। अर्धसमत्वेऽप्यस्या मात्रामात्रघटितत्वाद-त्रोक्तिः। "चूलिकैकोनत्रिंशदन्ते ग्" (पिं० सू० ४-५२) इति सूत्रपाठ-पक्षेणैवमुक्तम्। 'चूलिकार्धमेकोनत्रिंशदेकत्रिंशदन्ते ग' इति पाठे तु प्रथमं द्वितीयं चार्धं क्रमेणैकोनत्रिंशदेकत्रिंशन्मात्रं भवति,अन्ते च मात्राद्वयस्थाने गुरुरेकः स्यात्सा चूलिकेति सूत्रार्थः। अस्मिन्पक्षे मूलानुक्तमुदाहरणं ममैव—

रघुकुलनलिनविकसनशशभृति दशमुखमुखरिपुतिमिरहरे।
विषधरविषमविषयविषहरमहसि कुरु रतिमिह दशरथतनये॥

अत्र सूत्रेऽर्धग्रहणात्पादनियमो नास्ति । इह चावसितिगुरुरिति पदेन गुरावेवावसानं नान्यत्रेति सूचितम्॥ ४२॥

इति श्रीमद्भट्टरामेश्वरसूनुनारायणभट्टविरचितायां वृत्तरत्नाकर-व्याख्यायां मात्रावृत्ताधिकारो नाम द्वितीयोऽध्यायः॥



तृतीयोऽध्यायः।

एवं मात्रावृत्तान्यभिधायाऽधुना वर्णवृत्तेषु समवृत्तानि कीर्त्तयति-उक्ता इति। अधिक्रियत इति शेषः। सप्तम्यन्तपाठे तु भेदा अभिधीयन्त इति। एवमत्युक्तादिष्वपि व्याख्येयम्॥

अथोक्ता (१)—

गुः श्रीः॥ १॥ (१)

२६ लघवः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
प्र-व-स-सि-प-थि-क-वि-र-हि-त-क-थ-मि-ह-तु
। । । । । । । । । । । । । । । ।

१ गु.

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०
प-रि-ह-त-यु-व-ति-र-ति-च-प-ल-त--या॥
। । । । । । । । । । । । । । ऽ.

(१) अत्रोदाहरणान्तरं यथा वाणीभूषणे—

एकाक्षरपादायामुक्तायां गुरेकश्चेत्पादस्तदा श्रीर्नाम । लक्ष्यलक्षणयोरेकाक्षरेण पादेनासङ्ग्रहादर्धोदाहरणमेतत् ।

नोक्ता उक्तादिभेदा ये ग्रन्थगौरवभीतितः ।
तांस्तथा शब्दचिह्नेन वदामोऽन्यत्र दर्शनात् ॥

यथा—

अस्मत्पितृकृते नव्ये काव्ये रामकुतूहले ।
उक्ता उक्तादयो व्यक्ता विवेक्तव्याः सुयुक्तिभिः ॥

अत्र वक्ष्यमाणसङ्ख्याऽऽख्यानप्रकारेण वृत्तभेदौ २ । न च सुप्रतिष्ठान्तानां पञ्चानां जातीनां सूत्राऽनुक्तत्वान्निर्मूलतेति शङ्क्यम् । "द्विकौ ग्लौ" (पिं०सू०८-२०) इति प्रस्तारकथने, "परे पूर्णम्" (पिं०सू० ८-३३) इति मेरुप्रस्तारकथने च सूत्रकारेणाऽपि दर्शितत्वात् । बहुतरप्रचाराभावात्तु गाथाभेदवल्लक्षणानुक्तेरुपपत्तिः ॥ १ ॥

अथाऽत्युक्ता (२)—

गौ स्त्री ॥ २ ॥ (१)

द्वौ गुरू यदि पादे स्तस्तदा स्त्री नाम । अत्र वृत्तसङ्ख्या ४ ॥ २ ॥

अथ मध्या (३)—

मो नारी ॥ ३ ॥ (२)

मो मगणश्चेत्पादस्तदा नारी नाम ॥ ३ ॥

गु. गु. गु. गु.
वि-ष्णं । व-न्दे ॥
ऽ, ऽ. ऽ, ऽ.

(उक्ताभेदयोः प्रथमभेदोऽयम् ।)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

गु. गु. गु. गु. गु. गु. गु. गु.
गो-प-स्त्री-भिः । कृ-ष्णो रे-मे ॥
ऽ, ऽ, ऽ, ऽ. ऽ, ऽ, ऽ, ऽ.

(अत्युक्ताभेदेषु प्रथमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

गो-पा-नां ना-री-भिः ॥ श्लि-ष्टोऽ-व्या-त्कृ-ष्णो वः ॥
ऽ ऽ ऽ, ऽ ऽ ऽ, ऽ ऽ ऽ, ऽ ऽ ऽ.

(मध्याभेदेषु प्रथमोऽयं भेदः ।)

रो मृगी ॥ ४ ॥ (१)

रगणश्चेत्पादस्तदा मृगी । अत्र सङ्ख्या ८ ॥ ४ ॥

अथ प्रतिष्ठा (४)—

म्गौ चेत्कन्या ॥ ५ ॥ (२)

म्गौ मगणगुरू चेत्पादश्चतुर्गुरुरित्यर्थस्तदा कन्या । अत्र सङ्ख्या १६ ॥५॥

अथ सुप्रतिष्ठा (५)—

भ्गौ गिति पङ्क्तिः ॥ ६ ॥ (३)

भगणगुरू पुनर्गुरुश्चेत्येवं पङ्क्तिः । सङ्ख्या ३२ ॥ ६ ॥

अथ गायत्री (६)—

त्यौ स्तस्तनुमध्या ॥ ७ ॥ (४)

(१) अत्रोदाहरणान्तरं छन्दोमञ्जर्याम्—

र.

सा मृगी-लोचना । राधिका श्रीपतेः ॥

ऽ । ऽ,

(मध्याभेदेषु तृतीयोऽयं भेदः ।)

(२) अत्रोदाहरणान्तरं छन्दोमञ्जर्यां यथा—

म. गु.

भास्वत्क-न्या सैका धन्या ॥ यस्याः कूले कृष्णोऽखेलत् ॥

ऽ ऽ ऽ, ऽ.

(प्रतिष्ठाभेदेषु प्रथमो भेदोऽयम् ।)

(३) अत्रोदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

भ. गु. गु.

कृष्णस-ना-था तर्णकपङ्क्तिः ॥ यामुनकच्छे चारु चचार ॥

ऽ । ।, ऽ, ऽ.

(सुप्रतिष्ठाभेदेषु सप्तमोऽयं भेदः ।)

(४) उदाहरणान्तरं यथा सुवृत्ततिलके—

त. य.

तेन प्र--विभक्ता कामं वयसा सा ॥ येन प्रविलासं धत्ते तनुमध्या ॥

ऽ ऽ ।, । ऽ ऽ.

(गायत्रीभेदेषु त्रयोदशोऽयं भेदः ।)

त्यौ=तगण-यगणौ यदि स्तो भवतस्तदा तनुमध्येति । यदि तदेत्यध्याहार्यम् ॥७॥

शशिवदना न्यौ ॥ ८ ॥ (१)

नगण-यगणौ यदि पादस्तदा शशिवदना नाम ॥८॥

विद्युल्लेखा मो मः ॥ ९ ॥ (२)

मगणौ चेत्पादस्तदा विद्युल्लेखा नाम ॥ ९ ॥

त्सौ चेद्वसुमती ॥ १० ॥ (३)

तगण-सगणौ चेत्पादस्तदा वसुमती । गायत्र्यन्तेषु सर्वेषु पादेषु पादान्तयतिरित्याम्नायः । तत्र सङ्ख्या ६४ ॥ १० ॥

अथोष्णिक्(७)—

म्सौ गः स्यान्मदलेखा ॥ ११ ॥ (४)

मगणसगणगुरुभिर्मदलेखा नाम ॥

---

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न. य.

शशिव-दनानां व्रजतरुणीनाम् ॥
। । ।, । ऽ ऽ.
अधरसुधोर्मिं मधुरिपुरैच्छत् ॥
(गायत्रीभेदेषु षोडशोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म. म.

गोपस्त्री-णांमुख्या । विद्युल्लेखारूपा ॥
ऽ ऽ ऽ, ऽ ऽ ऽ.
कालिन्दीतीरे सा । रेमे श्रीकृष्णेन ॥
(गायत्रीभेदेषु प्रथमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा मम—

त. स.

राजीव—नयना । बिम्बाऽधरवती ॥
ऽ ऽ ।, । । ऽ.
रामा भवति सा । नूनं वसुमती ॥
(गायत्रीभेदेषु एकोनत्रिंशो भेदः ।)

(४) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

तथा—

सरगैर्हसमाला ॥
मधुमति ननगाः ॥
कुमारललिता ज्सौ गू ॥
चूडामणिस्तभगात् ॥

अत्र द्वाभ्यां पञ्चभिश्च यतिमाहुः केचित् । अन्ये तु पादान्त एव । अत्र सङ्ख्या १२८ ॥ ११ ॥

अथानुष्टुप् (८)—

भौ गिति चित्रपदा गः ॥ १२ ॥ (१)

भगणौ गुरू च यत्र पादे सा चित्रपदा । पादान्ते यतिः ॥ १२ ॥

मो मो गो गो विद्युन्माला ॥ १३ ॥ (२)

मगणौ द्वौ च गुरू विद्युन्मालेति।चतुर्भिश्चतुर्भिश्च यतिरिति सम्प्रदायः॥ १३

म. स. गु.
रङ्गे बा—ह्वावरु—ग्णात् । दन्तीन्द्रान्मदलेखा ॥
ऽऽऽ, ।।ऽ, ऽ.
लग्नाऽभून्मुरशत्रौ । कस्तूरीरसचर्चा ॥
(उष्णिग्भेदेषु पञ्चविंशो भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

भ. भ. गु. गु.
यस्यमु-ख प्रिय-वा—णी । चेतसि सज्जनता च ॥
ऽ।।, ऽ।।, ऽ, ऽ.
चित्रपदाऽपि च लक्ष्मी- । स्तं पुरुषं न जहाति ॥
(अनुष्टुब्भेदेषु ५५ तमो भेदः ।)

(२) उदाहरणान्तरं यथा सुवृत्ततिलके—

म. म. गु. गु.
मौनं ध्या-नं भूमौ-श—य्या । गुर्वी तस्याः कामाऽवस्था ॥
ऽऽऽ, ऽऽऽ, ऽ, ऽ.
मेघोत्सङ्गे नृत्तासक्ता । यस्मिन्काले विद्युन्माला ॥
अनुष्टुब्भेदेषु प्रथमो भेदः ।)

माणवकं भात्तलगाः ॥ १४ ॥ (१)

भादिगणात्तलगास्तगणलघुगुरवो यदि तदा माणवकम् । 'माणवकाक्रीडितकम्' इति पैङ्गले संज्ञा । पूर्ववद्यतिः ॥ १४ ॥

म्नौ गौ हंसरुतमेतत् ॥ १५ ॥ (२)

मगण-नगणौ गुरू च द्वावेतद्धंसरुतं नाम ॥ १५ ॥

जौ समानिका गलौ च ॥ १६ ॥ (३)

रेफ-जकारौ गुरुलघू च समानिका नाम ॥ १६ ॥

प्रमाणिका जरौ लगौ ॥ १७ ॥ ४)

---

(१) उदाहरणान्तरं यथा—

भ. त. ल. गु.

माणव-का क्रीडि-त-कं । यः कुरुते वृद्धवयाः ।
ऽ । ।, ऽ ऽ । ।, ऽ.
हास्यमसौ याति जने । भिक्षुरिव स्त्रीचपलः ॥

(अनुष्टुब्भेदेषु १०३ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. न. गु. गु.

अभ्यागा-मिशशि-ल—द्मी- । मज्जीरक्वणिततुल्यम् ॥
ऽ ऽ ऽ, । । ।, ऽ, ऽ.
तीरे राजति नदीनां । रम्यं हंसरुतमेतत् ॥

(अनुष्टुब्भेदेषु ५७ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

र. ज. गु. ल.

यस्यक्क-ष्णपाद--प-द्म- । मस्ति हृत्तडागसद्म ॥
ऽ । ऽ, । ऽ ।, ऽ, ।.
धीः समानिका परेण । नोचिताऽत्र मत्सरेण ॥

(अनुष्टुब्भेदेषु १७१ तमो भेदः ।)

(४) उदाहरणान्तरं यथा सुवृत्ततिलके—

ज. र. ल. गु.

लघु श्रु--तं मदो--द्ध-तं । गुरुश्रमाय केवलम् ॥
। ऽ । ऽ । ऽ, ।, ऽ.

जगणरेफौ लघुगुरू च प्रमाणिका । समान्येव समानिका, प्रमाण्येव प्रमाणिका । स्वार्थे कश्छन्दोऽनुरोधात्कृतः ॥ १७ ॥

वितानमाभ्यां यदन्यत् ॥ १८ ॥

आभ्यां समानीप्रमाणीभ्यामन्यद्यदनुष्टुब्जातीयं छन्दो वितानसंज्ञम् । आभ्यामन्यदित्युक्तलक्षणनियमाऽभावोपलक्षणम् । केचित्तु—'समानिकायां गुरुलघुक्रमेण समाप्तिः, प्रमाणिकायां लघुगुरुक्रमेण, विताने तु द्वौ गुरू द्वौ लघू, द्वौ लघू द्वौ गुरू वा, द्वौ गुरू एको लघुः पुनरेको गुरुरिति वा, द्वौ लघू एको गुरुरेको लघुरिति वा, इत्येवं वा नियमः' इत्याहुः । तत्र द्वौ गुरू द्वौ लघू इत्यत्रोदाहरणम्—

तृष्णां त्यज धर्मं भज पापे हृदयं मा कुरु ।
इष्टा यदि लक्ष्मीस्तव शिष्टाननिशं संश्रय ॥

द्वौ लघू द्वौ गुरू इत्यत्रोदाहरणम्—

हृदयं यस्य विशालं गगनाभोगसमानम् ।
लभतेऽसौ मणिचित्रं नृपतिर्मूर्ध्नि वितानम् ॥

एवमन्यत्राप्युदाहार्यम् । वयं तु गृह्णीम एतत्, एतेषां वितानतेति न तु नियमः । अतएवोक्तनियमातिक्रमेणैवोदाहरणं मूले । सूत्रमपि "वितानमन्यत्" (पिं० सू० ५-८) इति सामान्यत एव, न तु नियमं कंचिदाह । वृत्तिकृदपि "सूत्रकारो वितानस्याऽनेकप्रकारतां दर्शयति" इति वदन्ननेकतामात्रमाह, न तु नियममिति ।

तथा—

नाराचिका तरौ लगौ ॥

अत्र सङ्ख्या २५६ ॥ १८ ॥

अथ बृहती (९)—

रान्नसाविह हलमुखी ॥ १९ ॥ (१)

न यत्परोपकारकृद् । वृथैव तत्प्रमाण्यपि ॥

(अनुष्टुब्भेदेषु ८६ तमो भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

र. न. स.

गण्डयो- रतिश—यकृशं । यन्मुखं प्रकटदशनम् ।
ऽ ।ऽ, । ।।, ।।ऽ.

आयतं कलहनिरतां । तां स्त्रियं त्यज हलमुखीम् ॥

(बृहतीभेदेषु २५१ तमोऽयं भेदः ।).

रगणानन्तरं नगणसगणौ चेदिह छन्दःशास्त्रे हलमुखी नाम । त्रिभिः षड्भिश्च यतिरिति सम्प्रदायः ॥ १९ ॥

भुजगशिशुभृता नौ मः ॥ २० ॥ (१)

द्वाभ्यां नगणाभ्यामेकेन च मगणेन भुजगशिशुभृतां । सप्तभिर्द्वाभ्यां च यतिः ।

तथा—

भद्रिकेति रनरैरियम् ॥

वृत्तसङ्ख्या ५१२ ॥ २० ॥

अथ पङ्क्तिः (१०)—

म्सौ ज्गौ शुद्धविराडिदं मतम् ॥ २१ ॥ (२)

मगण-सगणौ जगणगुरू च तच्छुद्धविराण्मतं छन्दोविदाम् । पादान्तेऽत्र यतिः ॥ २१ ॥

म्नौ ज्गौ चेति पणवनामकम् ॥ २२ ॥ (३)

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. न. म.

इयम—धिकत—रं रम्या । विकचकुवलयश्यामा ॥
।।।, ।।।, ऽ ऽऽ.
रमयति हृदयं यूनां । भुजगशिशुभृता नारी ॥
(बृहतीभेदेषु ६४ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. स. ज. गु.

विश्वं ति-ष्ठति कु-क्षिकोट-रे । वक्त्रे यस्य सरस्वती सदा ॥
ऽऽ ऽ, ।। ऽ, । ऽ।, ऽ.
अस्मद्वंशपितामहो गुरु- । ब्रह्मा शुद्धविराट् पुनातु नः ॥
(पङ्क्तिभेदेषु ३४५ तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा मम—

म. न. ज. गु.

भक्ता ये—शरण—मुपागता- । स्तेषां नो चिकुरमपि प्रभुः ॥
ऽ ऽ ऽ, ।।।, ।ऽ।, ऽ.
छेत्तं कोऽपि जगति हे शिवे ! । तेऽयं कीर्तिपणवनिःस्वनः ॥

मगण-नगणौ जगण-गुरू चेति पणवनामकम्। पञ्चभिः पञ्चभिश्च यतिः॥

जौ रगौ मयूरसारिणी स्यात् ॥ २३ ॥ (१)

रगण-जगण-रगण-गुरुभिर्मयूरसारिणी। पादान्ते यतिः॥ २३ ॥

भौ सगयुक्तौ रुक्मवतीयम् ॥ २४ ॥ (२)

भ-म-स-गणै-र्गुरुणा च रुक्मवती नाम। चम्पकमालेत्यन्ये। पादान्ते यतिः॥ २४ ॥

मत्ता ज्ञेया मभसगयुक्ता ॥ २५ ॥ (३)

म-भ-स-गणगुरुयुता मत्ता। चतुर्भिः षड्भिश्च यतिः॥ २५ ॥

नरजगैर्भवेन्मनोरमा ॥ २६ ॥(४)

(षड्क्तिभेदेषु ३७७ तमो भेदोऽयम्।)

नारायणभट्टसम्मतमिदं लक्षणम्। अन्येषां मते तु मनयगग्रथितः पणवः।

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

र. ज. र. गु.

या वना-न्तरागयु--पैति र-न्तं। या भुजङ्गभोगमुक्तचित्ता॥

ऽ।ऽ, ।ऽ।, ऽ।ऽ, ऽ.

या द्रुतं प्रयाति सन्नतांसा। तां मयूरसारिणीं विजह्यात्॥

(षड्क्तिभेदेषु १७१ तमो भेदः।)

(२) उदाहरणान्तरं यथा सुवृत्ततिलके—

भ. म. न. गु.

भग्नभ—सत्यैः का—यसह— लै-। मोहमयी गुर्वी तव माया॥

ऽ।।, ऽऽ ऽ, ।।ऽ. ऽ.

स्वप्नविलासा योगवियोगा। रुक्मवती हा कस्य कृते श्रीः॥

(षड्क्तिभेदेषु १९९ तमोऽयं भेदः)

(३) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

भ. भ. स. गु.

पीत्वा म-त्ता मधु-मधुपा—ली। कालिन्दीये तटवनकुञ्जे॥

ऽऽ ऽ, ऽ।।, ।।ऽ, ऽ.

उद्दीव्यन्तीव्रजजनरामाः। कामासक्ता मधुजिति चक्रे॥

(षड्क्तिभेदेषु २४१ तमो भेदोऽयम्।)

(४) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

नौ-र-जगणगुरुभिर्मनोरमा पादान्ते यतिः ॥ २६ ॥

तजौ जो गुरुणेयमुपस्थिता ॥ २७ ॥ १)

त-ज-जगण-गुरुभिरुपस्थिता नाम । पादान्ते यतिः । द्वाभ्यामष्ट-मिश्चेत्येके ॥

अत्र सङ्ख्या १०२४ ॥ २७ ॥

अथ त्रिष्टुप् (११)—

स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ २८ ॥(२)

त-त-जगणैर्गुरुभ्यां चेन्द्रवज्रा नाम । पादे यतिः ॥२८॥

उपेन्द्रवज्रा जतजास्ततो गौ ॥ २९ ॥(३)

न. र. ज. गु.

तरणि जातटे विहारि—णी । व्रजविलासिनीविलासतः ॥
।।।, ऽ।ऽ, ।ऽ।, ऽ.
मुररिपोस्तनुः पुनातु वः । सुकृतशालिनां मनोरमा ॥

(षड्भेदेषु ३४४ तमो भेदोऽयम् ।)

(१) उदाहरणान्तरं छन्दोमञ्जर्याम्—

त. ज. ज. गु.

एषा ज—गदेक मनोह—रा । कन्या कनकोज्ज्वलदीधितिः ॥
ऽऽ।, ।ऽ।, ।ऽ।, ऽ.
लक्ष्मीरिव दानवसूदनं । पुण्यैर्नरनाथमुपस्थिता ॥

(षड्भेदेषु ३६५ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

त. त. ज. गु. गु.

य दुष्ट लोकाह ह भूमि-लो-के
ऽऽ।, ऽऽ।, ।ऽ।, ऽ ऽ.
द्वेषं व्यधुर्गोद्विजदेवसङ्घे ॥
तानिन्द्रवज्रादपि दारुणाङ्गान्
व्याजीवयद् यः सततं नमस्ते ॥

(त्रिष्टुब्भेदेषु ३५७ तमो भेदोऽयम्)

(३) उदाहरणान्तरं यथा सुवृत्ततिलके—

ज-त-जगणा गुरू चोपेन्द्रवज्रा नाम । पूर्वोक्तैव यतिः ॥ २९ ॥

अनन्तरोदीरितलक्ष्मभाजौ ॥
पादौ यदीयावुपजातयस्ताः ॥ ३० ॥(१)

ज. त. ज. ग. ग.

जितो ज—गत्येष भवभ्र--म-स्तै
। ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ, ऽ.
र्गुरूदितं ये गिरिशं स्मरन्ति ॥
उपास्यमानं कमलासनाद्यै-
रुपेन्द्रवज्रायुधवारिनाथैः ॥
(त्रिष्टुब्भेदेषु ३५८ तमो भेदोऽयम् ।)

(१) अत्रेदमवधेयम्—समानजातिकयोरेव द्वयोर्वृत्तयोः सङ्करे उपजातित्वम् । न विषमजातिकयोः । किं च मेलनमपि वृत्तद्वयस्य कविजनसमाचरितस्य श्रुतिसुखकरस्य च । किं च यत्र चरणद्वयस्य जातिभिन्ना, अपरचरणद्वयस्य च जातिर्भिन्ना तत्र नोपजातित्वं, किं तु अर्धसमत्वम् । समजातिकयोरपि किंचिद्वैशिष्ट्यं विहाय सर्वेष्वंशेषु यत्र साम्यं सम्भवति तत्रैव मेलनम् । यथा इन्द्रवज्रोपेन्द्रवज्रयोः स्वागतारथोद्धतयोः इन्द्रवंशावशस्थयोरित्यादि । सर्वेषूपजातिषु चतुर्दश भेदा भवन्ति । तत्र इन्द्रवज्रोपेन्द्रवज्रयोर्भेदा नामतो यथा—

१ कीर्तिः (उइइइ) २ वाणी (इउइइ)
३ माला (उउइइ) ४ शाला (इउउइ)
५ हंसी (उइउइ) ६ माया (उइइउ)
७ जाया (उउउइ) ८ बाला (इइइउ)
९ आर्द्रा (उइइउ) १० भद्रा (उउइइ)
११ प्रेमा (उइइउ) १२ रामा (इइउउ)
१३ ऋद्धि (उइउउ) १४ वृद्धि (इउउउ)

तत्र उपजातिभेदेषु प्रथमभेदोदाहरणं यथा रघुवंशे—

१की० उ. ततः सुनन्दावचनाऽवसाने
इ. लज्जां तनूकृत्य नरेन्द्रकन्या ॥
इ. दृष्ट्या प्रसादाऽमलया कुमारं
इ. प्रत्यग्रहीत्संवरणस्रजेव ॥

द्वितीयभेदोदाहरणं यथा सुभाषितावलौ कस्याऽपि—

२या०
इ. उत्साहसम्पन्नमदीर्घसूत्रं
उ. क्रियाविधिज्ञं व्यसनेष्वसक्तम् ॥
इ. शूरं कृतज्ञं दृढसौहृदं च
इ. लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥

तृतीयोदाहरणं यथा मङ्खकस्य—

३मा०
उ. विना न साहित्यविदाऽपरत्र
उ. गुणः कथंचित्प्रथते कवीनाम् ॥
इ. आलम्बते तन्तुणमम्भसीव
इ. विस्तारमन्यत्र न तैलबिन्दुः ॥

चतुर्थोदाहरणं यथा कुमारसम्भवे—

४शा०
इ. पुष्पं प्रवालोपहितं यदि स्या-
इ. न्मुक्ताफलं वा स्फुटविद्रुमस्थम् ॥
उ. ततोऽनुकुर्याद्विशदस्य तस्या-
इ. स्ताम्रौष्ठपर्यस्तरुचेः स्मितस्य ॥

पञ्चमोदाहरणं यथा श्रीमदुत्पलराजस्य—

५हंसी
उ. हृताञ्जनश्यामरुचस्तवैते
इ. स्थूलाः किमित्यश्रुकणाः पतन्ति ॥
उ. भृङ्गा इव व्यायतपक्ष्मकोशा ये
इ. तनीयसीं रोमलतां श्रयन्ति ॥

षष्ठभेदोदाहरणं यथा ध्वन्यालोके—

६मा०
उ. प्रतीयमानं पुनरन्यदेव
इ. वस्त्वस्ति वाणीषु महाकवीनाम् ॥
इ. यत्तत्प्रसिद्धाऽवयवाऽतिरिक्तं
उ. विभाति लावण्यमिवाङ्गनासु ॥

सप्तमोदाहरणं यथा रघुवंशे—

७जा०
उ. कुलेन कान्त्या वयसा नवेन
उ. गुणैश्च तैस्तैर्विनयप्रधानैः ॥
उ. त्वमात्मनस्तुल्यममुं वृणीष्व
इ. रत्नं समागच्छतु काञ्चनेन ॥

अष्टमोदाहरणं यथा सुभाषितावलौ कस्याऽपि—

८ बा० इ. वन्द्यः स पुंसां त्रिदशाऽभिनन्द्यः
इ. कारुण्यपुण्योपचयक्रियाभिः ॥
इ. संसारसारत्वमुपैति यस्य
उ. परोपकाराऽऽभरणं शरीरम् ॥

नवमोदाहरणं यथा सुभाषितावलौ कस्यापि—

९ आ० उ. गुणा गुणज्ञेषु गुणीभवन्ति
इ. ते निर्गुणं प्राप्य भवन्ति दोषाः ॥
इ. सुस्वादुतोयप्रभवा हि नद्यः
उ. समुद्रमासाद्य भवन्त्यपेयाः ॥

दशमोदाहरणं यथा कुमारसम्भवे—

१० भ. इ. अस्त्युत्तरस्यां दिशि देवताऽऽत्मा
उ. हिमालयो नाम नगाऽधिराजः ॥
इ. पूर्वापरौ तोयनिधी वगाह्य
उ. स्थितः पृथिव्या इव मानदण्डः ॥

एकादशोदाहरणं यथा

११ प्रे. उ. वितीर्णशिक्षा इव हृत्पदस्थ-
उ. सरस्वतीवाहनराजहंसैः ॥
इ. ये क्षीरनीरप्रविभागदक्षा
उ. विवेकिनस्ते कवयो जयन्ति ॥

द्वादशोदाहरणं यथा जल्हणस्य—

१२ रा. इ. व्यालाश्च राहुश्च सुधाप्रसादा-
इ. ज्जिह्वाशिरोनिग्रहमुग्रमापुः ॥
उ. इतीव भीताः पिशुना भवन्ति
उ. पराङ्मुखाः काव्यरसामृतेषु ॥

त्रयोदशोदाहरणं यथा जयवर्धनस्य—

१३ भ्र उ. हृतोऽङ्गरागस्तिलकं विमृष्टं
इ. लब्धान्तरैरेभिरितीव मत्वा ॥
उ. सुसंहतेनेति सदा जलाना-
उ. मदायि मध्यं न कुचद्वयेन ॥

चतुर्दशोदाहरणं यथा अमृतवर्धनस्य—

अव्यवहितोक्तेन्द्रवज्रोपेन्द्रवज्रालक्षणवन्तौ पादौ यत्सम्बन्धिनौ ता उपजातयो नाम । अत्र पूर्वोक्तलक्षणेन पादद्वयेन यथायोगमेकद्विवारावृत्त्या निष्पत्तिर्विवक्षिता, न तु द्वाभ्यामेव वृत्तपूर्तिः । पादद्वयमात्रघटितस्य वृत्तस्याभावात् । द्विवचनं लक्षणद्वययोगेन लक्षणया नेयम् । ताश्चतुरक्षरप्रस्तारवत्प्रस्तारे सत्याद्यन्तभेदयोः केवलेन्द्रवज्रोपेन्द्रवज्रात्यागे चतुर्दश भवन्ति । यथा—उइइइ १ इउइइ २ उउइइ ३ इइउइ ४ उइउइ ५ इउउइ ६ उउउइ ७ इइइउ ८ उइइउ ९ इउइउ १० उउइउ ११ इइउउ १२ उइउउ १३ इउउउ १४ इति । तथा च वृद्धाः—

एकत्र पादे चरणद्वये वा पादत्रये वान्यतरः स्थितश्चेत् ।
तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥ इति ।

तत्राद्यभेदोदाहरणम्—

दैत्याधिपप्राणमुषां नखाना-
मुपेयुषां भूषणतां क्षतेन ।
प्रकाशकार्कश्यगुणौ दधानाः
स्तनौ तरुण्यः परिवव्रुरेनम् ॥ (शि०३-१४) (१)

१४वृ.- इ. दीपाः स्थितं वस्तु विभावयन्ति
उ. कुलप्रदीपास्तु भवन्ति केचित् ॥
उ. चिरव्यतीतानपि पूर्वजान्ये
उ. प्रकाशयन्ति स्वगुणप्रकर्षात् ॥

एते चतुर्दशोपजातिभेदा इन्द्रवज्रोपेन्द्रवज्रासम्भवाः प्रदर्शिताः । उपरि जगद्गुरुनारायणभट्टपादैरुपजातिभेदानामाद्यमुदाहरणं यत्प्रदर्शितं तत्र एकैकलघुह्रासक्रमः । मत्प्रदर्शितेषूदाहरणेषु च एकैकगुरुह्रासक्रमः । अयमेव क्रमो बहुत्र ग्रन्थेषु समादृतस्तत एव मयाऽपि तेनैव क्रमेणोपजातिभेदा दर्शिताः । किंचमूलकृतः "अनन्तरोदीरित" इत्युदाहरणप्रदर्शनेन "पादे सर्वगुरावाद्यात्लघुं न्यस्य" (वृ. र. ६-२) इति प्रस्तारपथप्रदर्शनेन च मत्प्रदर्शितः क्रम एव सामञ्जस्यमावहति । अत्र विषये भट्टपादा अप्यनुकूला: एव । अत एव "पादे सर्वगुरावाद्यात्" (वृ. र.६-२) इत्यस्य व्याख्यानाऽवसरे यदुक्तं "अत्र मामकः सङ्ग्रहश्लोकः 'पादं सर्वगुरुं लिखेन्मुखगुरोश्चाधो लघुं पूर्ववत्" इति तत् सङ्गच्छते । "दैत्याऽधिपप्राणमुषां" इत्यस्योपजातिभेदेषु आद्यभेदोदाहरणत्वेन प्रदर्शनं तु जगद्गुरूणां स्वातन्त्र्यसूचकमिति मन्तव्यम् ।

(१) 'दैत्याऽधिपप्राणमुषां' इत्यत्र "प्राणच्छिदां दैत्यपतेः" इति पाठो

मूलश्लोकस्तु पृष्ठभेदोदाहरणम् । एवमन्यभेदेष्वप्युदाहरणानि काव्येषु च विवेचनीयानि ॥ ३० ॥

इत्थं किलान्यास्वपि मिश्रितासु ॥
स्मरन्ति जातिष्विदमेव नाम ॥ ३१ ॥(१)

मल्लिनाथपण्डितसम्मतः । निर्दोषः श्रुतिमधुरश्च पूर्वपाठ एवेति काव्यमर्मवेदिनः ।

(१) इत्थमित्यनेन जगत्यादिष्वपि सम्मेलककौशल्येन बहुध उपजातयः सम्पद्यन्ते इति सूचितम् । तत्र यथेन्द्रवज्रोपेन्द्रवज्रयोस्त्रिष्टुभि उपजातयो जायन्ते तथैव त्रिष्टुभि स्वागतारथोद्धतयोरपि प्रस्तारपथेन चतुर्दशोपजातयो भवन्ति । ते भेदाः प्रस्तारतो यथा—

१ र. स्वा. स्वा. स्वा.	२ स्वा. र. स्वा. स्वा.
३ र. र. स्वा. स्वा.	४ स्वा. स्वा. र. स्वा.
५ र. स्वा. र. स्वा.	६ र. स्वा. स्वा. र.
७ र. र. र. स्वा.	८ स्वा. स्वा. स्वा. र.
९ र. स्वा. स्वा. र.	१० स्वा. र. स्वा. र.
११ र. र. स्वा. र.	१२ स्वा. स्वा. र. र.
१३ र. स्वा. र. र.	१४ स्वा. र. र. र.

अत्र स्वागतारथोद्धतयोरुपजातिभेदेषु पञ्चमभेदोदाहरणं भट्टोजीदीक्षितगुरूणां प्रक्रियाप्रकाशादिनानानिबन्धविधायिनां महाकवीनां श्रीशेषकृष्णपण्डितानां पारिजातहरणचम्पूकाव्ये दृश्यते । तथा हि—

५ र. ब्रह्मनिष्ठमकनिष्ठचेष्टितं
स्वा. विष्टपत्रितयशिष्टवरिष्ठम् ॥
र. ब्रह्मसनुमथ विष्टरश्रवा
स्वा. विष्टरे समुपविष्टमयष्ट ॥ (पा.१-५१) इति ।

अन्यभेदोदाहरणानि ग्रन्थेषु मृग्यानि ।

अत्र केचित्-इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनेन इन्द्रवंशावंशस्थयोर्वा मेलनेन यथोपजातयः सम्पद्यन्ते तथा इन्द्रवज्रावंशस्थयोरिवान्यान्यविषमाक्षरजातिद्वयमेलनेनाप्युपजातयो भवन्ति इति वदन्ति, त एवं प्रष्टव्याः भवतां मते त्रिष्टुप्त्वादिकं जातिराहोस्विदिन्द्रवज्रात्वादिकं ? त्रिष्टुप्त्वादिकं चेत्, इन्द्रवज्रोपेन्द्रवज्रयोः सामरस्येन सम्प्रसूतासूपजातिषु किं त्रिष्टुप्त्वमुत जगतीत्वम् ? उभयमपि न सम्भवति । उभाभ्यां साङ्कर्यात्, सङ्करस्य च जातिबाधकत्वात् । यदीन्द्रवज्रात्वादिकस्य जातित्वं स्वीक्रियते तर्हि

अन्यास्वपि जगत्यादिजातिष्वित्थं सामान्यसङ्ख्याऽक्षरत्वसमानयतिकत्वादिप्रकारेण मिश्रितास्विदमेवोपजातिनाम वृद्धाः स्मरन्ति । ग्रन्थान्तरेभ्यो ज्ञात्वा वदन्तीत्यर्थः । इत्थमित्यनेन विषमवर्णसङ्ख्यानां विषमयतिकानां च जातीनां त्र्यादीनां च मिश्रणे उपजातिर्नाम नास्तीति सूचितम् । स्मरन्तीत्यनेन च कविप्रयोगे दर्शनानुरोधः सूचितः । तत्रेन्द्रवंशावंशस्थाभ्यामुदाहरणम्—

इत्थं रथाश्वेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहिः ॥
प्रस्थानकालक्षमवेषकल्पना-
कृतक्षणक्षेपमुदैक्षताच्युतम् ॥ (शि०१२-१)

एवमन्यत्राऽपि प्रयोगवशादुदाहरणं ज्ञेयम् । सर्वासामुपजातीनामुक्तया दिशा चतुर्दश भेदा भवन्ति । विषमार्धसमरूपत्वेऽप्युपजातीनां समवृत्तेषूपन्यासः समवृत्तघटिततया प्रासङ्गिकः ॥ ३१ ॥(१)

नजजलगैर्गदिता सुमुखी ॥ ३२ ॥(२)

पिङ्गलादिमुनिभिरन्यैरपि सकलैश्छन्दोविद्भिर्विरोधः । यतः सर्वैरपि एकैकाक्षरवर्धनक्रमेण जायमानाः षड्विंशतिसङ्ख्याका एव जातय उररीकृताः। किं च विषमाक्षरवृत्तद्वयमेलनेन समुत्पन्नेषु वृत्तान्तरेषु उपजातित्वस्वीकारे पिङ्गलाद्याचार्याणां वृत्तानामर्धसमविषमत्वादिकथनं वृथैव स्यात्। अतो भवदुक्तमसङ्गतमेवेत्यलं ज्ञानलवदुर्विदग्धैर्भवद्भिः साकं विवादेन । अत्रत्यं तत्त्वं तु मया प्रणेष्यमाणग्रन्थान्तरे विवेचयिष्यत इति मयि विश्वस्य साम्प्रतं सन्तोष्टव्यम् । इन्द्रवंशावंशस्थसम्मेलनसम्भूतानामुपजातीनामुदाहरणान्यनुपदमेव प्रदर्शयिष्यन्ते ।

(१) इन्द्रवंशावंशस्थसम्मेलनसम्भूतानामुपजातीनामुदाहरणानि वंशस्थोदाहरणप्रदर्शनाऽवसरे प्रदर्शयिष्यन्ते ।

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न. ज. ज. ल. ग.
तरणि— सुतात— टकुञ्ज—गृ-हे
।।।, ।ऽ।, ।ऽ।, ।, ऽ॰
वदनविधुस्मितदीधितिभिः ॥
तिमिरमुदस्य मुखं सुमखी
हरिमवलोक्य चुचुम्ब चिरम् ॥
(त्रिष्टुब्भेदेषु ८८० तमो भेदोऽयम् ।)

न-ज-जैर्गणैर्लघुगुरुभ्यां च सुमुखी नाम। पञ्चभिः षड्भिश्च यतिः॥३२॥

दोधकवृत्तमिदं भभभाद्वौ ॥ ३३ ॥(१)

भगणत्रयाद्गुरुद्वयं चेद्दोधकं नाम। भभभादिति समाहारद्वन्द्वैकवद्भावः। 'दोधकनामनि भत्रयतो गौ' इति वा पाठः। पादान्ते यतिः॥ ३३॥

शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥ ३४ ॥(२)

म-त-तै-र्गुरुभ्यां च शालिनी। अब्धिभिश्चतुर्भिर्लोकैः सप्तभिश्च यतिरिति शेषः। एवमुत्तरत्रापि॥ ३४॥

वातोर्मीयं कथिता म्भौ तगौ गः ॥ ३५ ॥(३)

म-भ-त-गु-गुरुभिर्वातोर्मी। इयमिति शालिन्युक्तयतिमतीत्यर्थः॥ ३५॥

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

भ. भ. भ. गु. गु.

दोधक—मर्थवि—रोधक मु—ग्रं
ऽ।।, ऽ।।, ऽ।।, ऽ, ऽ.
स्त्रीचपलं युधि कातरचित्तम्॥
स्वार्थपरं मतिहीनममात्यं
मुञ्चति यो नृपतिः स सुखी स्यात्॥
(त्रिष्टुब्भेदेषु २३६ तमो भेदोयम्।)

(२) उदाहरणान्तरं यथा सुवृत्ततिलके—

म. त. त. गु. गु.

मत्ता गो—ष्ठीगर्भ—मूढप्र ला पा
ऽऽऽ, ऽऽ।, ऽऽ।, ऽ, ऽ.
प्रौढा गाढाऽऽलिङ्गिता यौवनेन॥
मध्वाताम्रस्वेदमीलत्कपोला
लोला लीलाशालिनी कस्य नेष्टा॥
(त्रिष्टुब्भेदेषु २८६ तमो भेदोयम्।)

(३) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. भ. त. गु. गु.

यात्युत्से—कं सप—दि प्राप्य किं—चित्
ऽऽऽ, ऽ।।, ऽऽ।, ऽ, ऽ.
स्याद्वा यस्याश्चपला चित्तवृत्तिः॥
या दीर्घाक्षी स्फुटशब्दाट्टहासा

बाणरसैः स्याद्भतनगगैः श्रीः ॥ ३६ ॥(१)

भ-त-न-ग-गुरुभिः पञ्चभिः षड्भिश्च यतौ श्रीर्नाम ॥ ३६ ॥

म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ॥ ३७ ॥(२)

म-भ-न-लघुगुरुभिर्भ्रमरविलसितम् । चतुर्भिः सप्तभिश्च यतिः ॥ ३७ ।

राभ्रराविह रथोद्धता लगौ ॥ ३८ ॥(३)

र-न-र-ल-गैरिह च्छन्दःशास्त्रे रथोद्धता । पादे यतिः ॥ ३८ ॥

स्वागतेति रनभाद्गुरुयुग्मम् ॥ ३९ ॥(४)

त्याज्या सा स्त्री द्रुतवातोर्मिमाला ॥

(त्रिष्टुब्भेदेषु ३०५ तमो भेदोऽयम् ।)

(१) अस्यैवच्छन्दसो नामान्तरं "मौक्तिकमाला" इत्यत एतदुदाहरणं तत्रैव प्रदर्शयिष्यते ।

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म. भ. न. ल. गु.

मुग्ध! मा नं परि— हर न चि— रात्
ऽ ऽ ऽ, ऽ । ।, । । ।, ।, ऽ.

तारुण्यं ते सफलयतु हरिः ॥
फुल्ला वल्ली भ्रमरविलसिताऽ-
भावे शोभां कलयति किमु ताम् ॥

(त्रिष्टुब्भेदेषु १००९ तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा नाट्यशास्त्रे—

र. न. र. ल.गु.

किं त्वया सुभट! दूरव— र्जि- तं
ऽ । ऽ, । । ।, ऽ।ऽ, ।, ऽ.

नात्मनो न सुहृदां प्रियं कृतम् ॥
यत्पलायनपरायणस्य ते
याति धूलिरधुना रथोद्धता ॥

(त्रिष्टुब्भेदेषु ६९९ तमो भेदोऽयम् ।)

(४) उदाहरणान्तरं यथा सुवृत्ततिलके—

र. न. भ. गु. गु.

रत्नभ— ङ्गविभ—लैगुण— तु-ङ्ग
ऽ।ऽ, । । ।, ऽ।।, ऽ, ऽ.

र-न-भ-गणेभ्यः परं गुरुयुग्मं यदि तदेत्येवं स्वागता। र-न-भादित्येकवद्भावः। पूर्ववद्यतिः ॥ ३९ ॥

ननसगगुरुरचिता वृन्ता ॥ ४० ॥(१)

न-न--स-ग-गुरुकृता वृन्ता नाम। चतुर्भिः समभिश्च यतिः ॥ ४० ॥

ननरलगुरुभिश्च भद्रिका ॥ ४१ ॥(२)

न-न-र-ल-गैर्भद्रिका। पादे यतिः ॥ ४१ ॥

श्येनिका रजौ रलौ गुरुर्यदा ॥ ४२ ॥(३)

रथिनामभिमताऽर्पणसक्तैः ॥
स्वागताऽभिमुखनम्रशिरस्कै-
र्जीव्यते जगति साधुभिरेव ॥
(त्रिष्टुब्भेदेषु ४४३ तमो भेदोऽयम्।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. न. स. गु.गु.

द्विजगु—रुपरि—भवका री यो
। ।।, ।ऽ।, ।।ऽ, ऽ,ऽ.

नरपतिरतिधनलुब्धात्मा ॥
ध्रुवमिह निपतति पापोऽसौ
फलमिव पवनहतं वृन्तात् ॥
(त्रिष्टुब्भेदेषु २५६ तमो भेदोऽयम्।)

(२) उदाहरणान्तरं यथा मम—

न. न. र. ल.गु.

सकल— दुरित -नाशका रि-णी
।।।, ।।।, ऽ।ऽ, ।, ऽ.

मदभिलषितकामपूरणी ॥
भगवति तव मूर्तिरेकिका
मम मनसि सदाऽस्तु भद्रिका
(त्रिष्टुब्भेदेषु ७०४ तमो भेदोऽयम्।)

(३) उदाहरणान्तरं यथा छन्दोवृत्तौ—

र. ज. र. गु.गु.

क्रूरद्र— ष्टिराय--ताम्रना-सि-का
ऽ।ऽ, ।ऽ।, ऽ।ऽ, ।, ऽ.

स्पष्टम् । पादे यतिः ॥ ४२ ॥

मौक्तिकमाला यदि भतनाद्गौ ॥ ४३ ॥(१)

भ-त-नादित्येकवद्भावः । पञ्चसु षट्सु च यतिः ॥ ४३ ॥

उपस्थितमिदं ज्सौ तादृकारौ ॥ ४४ ॥(२)

ज-स-त-ग-गैरुपस्थितम् । पादे यतिः ॥

तथा—

उपचित्रमिदं ससमा लगौ ।
कुपुरुषजनिता ननौगौंगः ॥
अनवसिता न्यौ भगौ गु पडन्ते ॥

अत्र वृत्तानि २०४८ ॥ ४४ ॥

चञ्चला कठोरतीक्ष्णनादिनी ॥
युद्धकाङ्क्षिणी सदाऽऽमिषप्रिया
श्येनिकेव सा विगर्हिताऽङ्गना ॥
(त्रिष्टुब्भेदेषु ६८३ तमो भेदोऽयम् ।

(१) उदाहरणान्तरं यथा मम—

भ. त. न. गु. गु.

शोभन वर्णा सु—विशद जा-तिः
ऽ।।, ऽऽ।, ।।।, ऽ, ऽ.
सुक्रमराजद्गुरुलघुयुक्ता ॥
सद्यतिरम्या बुधहृदि छन्दो-
मौक्तिकमाला विलसति हृद्या ॥
(त्रिष्टुब्भेदेषु ४८७ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा मम—

ज. स. त. गु. गु.

जगज्ज—नानि वि-द्वच्चित्त-सं—स्थे
।ऽ।, ।। ऽ, ऽऽ।, ऽ, ऽ.
समग्रजडतानाशैकदक्षे ॥
सनाथय तव द्वारस्य मध्ये
उपस्थितमपाङ्गालोकनेन ॥
(त्रिष्टुब्भेदेषु २८६ तमोऽयं भेदः ।)

अथ जगती (१२)—

चन्द्रवर्त्म निगदन्ति रनभसैः ॥ ४५ ॥(१)

र-न-भ-सैर्गणैश्चन्द्रवर्त्म । चतुर्भिरष्टभिश्च यतिः ॥ ४५ ॥

जतौ तु वंशस्थमुदीरितं जरौ ॥ ४६ ॥(२)

ज-त--ज-रैर्वंशस्थम् । पादे यतिः ॥ ४६ ॥

स्यादिन्द्रवंशा ततजैः रसंयुतैः ॥ ४७ ॥(३)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

र. न. भ. स.

चन्द्रव--र्त्म पिहि--तं घन--तिमिरैः
ऽ । ऽ, । । ।, ऽ । । । । ऽ.
राजवर्त्म रहितं जनगमनैः ॥
दृष्टवर्त्म तदलङ्कुरु सरसे !
कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
(जगतीभेदेषु १२७६ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा सुवृत्ततिलके—

ज. त. ज. र.

जनस्य--तीव्रात--पजार्ति--वारणा
। ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ । ऽ.
जयन्ति सन्तः सततं समुन्नताः ॥
सितातपत्रप्रतिमा विभान्ति ये
विशालवंशस्थतया गुणोचिताः ॥
(जगतीभेदेषु १३८२तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा

त. त. ज. र.

कुर्वीत--यो देव--गुरुद्वि--जन्मना
ऽ ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ । ऽ.
मुर्वीपतिः पालनमर्थलिप्सया ॥
तस्येन्द्रवंशेऽपि गृहीतजन्मनः
सञ्जायते श्रीः प्रतिकूलवर्तिनी ॥
(जगतीभेदेषु १३८१ तमोऽयं भेदः ।)

वंशस्थेन्द्रवंशासम्भूतानामुपजातीनां भेदा यथा—

१ वैरासिकी	(वं. इ. इ. इ.)	८ वासन्तिका	(इ. इ. इ. वं.)
२ रताख्यानकी	(इ. वं. इ. इ.)	९ मन्दहासा	(वं. इ. इ. वं.)
३ इन्दुमा	(वं. वं. इ. इ.)	१० शिशिरा	(इ. वं. इ. वं.)
४ पुष्टिदा	(इ. इ. वं. इ.)	११ वैधात्री	(वं. वं. इ. वं.)
५ उपमेया	(वं. इ. वं. इ.)	१२ शङ्खचूडा	(इ. इ. वं. वं.)
६ सौरभेयी	(इ. वं. वं इ.)	१३ रमणा	(वं. इ. वं.)
७ शीलातुरा	(वं. वं.वं. इ.)	१४ कुमारी	(इ. वं. वं. वं.)

तत्र दशममुदाहरणं माघे दृश्यते। तच्च भट्टपादैः "इत्थं रथाश्वेभ" (शि. १२-१) इति "इत्थंकिलान्यास्वपि" (वृं. र. ३-३१) इत्यस्य व्याख्यानाऽवसरे प्रदर्शितम्। अन्यान्युदाहरणान्यपि क्वचिद् दृश्यन्ते तानि यथासम्भवमत्र प्रदर्श्यन्ते—

तत्र तृतीयभेदोदाहरणं यथा कुमारसम्भवे पञ्चदशसर्गे—

३
वं. चमूप्रभुं मन्मथमर्दनात्मजं
वं. विजित्वरीभिर्विजयश्रिया श्रितम् ॥
इ. श्रुत्वा सुराणां पृतनाभिरागतं
इ. चित्ते चिरं चुक्षुभिरे महासुराः ॥

षष्ठमुदाहरणं यथा तत्रैव—

६
इ. सङ्गेन वो गर्भतपस्विनः शिशु-
वं. र्वराक एषोऽन्तमवाप्स्यति ध्रुवम् ॥
वं. अतस्करस्तस्करसङ्गतो यथा
इ. तद्धो निहन्मि प्रथमं ततोऽप्यमुम् ॥

सप्तममुदाहरणं यथा तत्रैव—

७
वं. ततः क्रुधा विस्फुरिताऽधराधरः
वं. स तारको दर्पितदोर्बलोद्धतान् ॥
वं. युधे त्रिलोकीजयकेलिलालसः
इ. सेनापतीन्सन्नहनार्थमादिशत् ॥

नवममुदाहरणं यथा तत्रैव—

९
वं. स जामदग्न्यः क्षयकालरात्रिकृत्
इ. स क्षत्रियाणां समराय वल्गति ॥
इ. येन त्रिलोकीसुभटेन तेन ते
वं. कुतोऽवकाशः सह विग्रहग्रहे ॥

त-त-जै रसंयुतै रगणसहितैरिन्द्रवंशा । पादे यतिः ॥ ४७ ॥
इह तोटकमम्बुधिमैः प्रथितम् ॥ ४८ ॥ (१)

दशममुदाहरणं यथा माघे—

१० इ. साऽवज्ञमुन्मील्य विलोचने सकृत्
वं. क्षणं मृगेन्द्रेण सुपुप्सुना पुनः ॥
. सैन्यान्न यातः समयाऽपि विव्यथे
वं. कथं सुराजम्भवमन्यथाऽथ वा ॥

एकादशमुदाहरणं यथा सौन्दराऽऽनन्दे—

११ वं. प्रयान्ति मत्रः प्रशमं भुजङ्गमा
वं. न मन्त्रसाध्यास्तु भवन्ति धातवः ॥
इ. केचिच्च कंचिच्च दशन्ति पन्नगाः
वं. सदा च सर्वं च तुदन्ति धातवः ॥

द्वादशमुदाहरणं यथा कुमारसम्भवे—

१२ इ. श्रुत्वेति वाचं वियतो गरीयसीं
इ. क्रोधादहङ्कारपरो महासुरः ॥
वं. प्रकल्पिताशेषजगत्त्रयोऽपि स-
वं. न्नकम्पतोच्चैर्दिवमभ्यधाच्च सः ॥

त्रयोदशमुदाहरणं यथा तत्रैव—

१३ वं. बली बलारातिबलाऽतिशातनं
इ. दिग्दन्तिनादद्रुवनाशनस्वनम् ॥
वं. महीधराम्भोधिनवारितक्रमं
वं. ययौ रथं घोरमथाऽधिरुह्य सः ॥

चतुर्दशमुदाहरणं यथा तत्रैव—

१४ इ. दास्मीकृताऽशेषजगत्त्रयं न मां
वं जिगाय युद्धे कतिशः शचीपतिः ॥
वं. गिरीशपुत्रस्य बलेन साम्प्रतं
वं. ध्रुवं विजेतेति स काकुतोऽहसत् ॥

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स. स. स. स.
त्यज तो--टकम--र्थनियो--गकरं
। । ऽ, । । ऽ, । । ऽ, । । ऽ,

अम्बुधिसैश्चतुर्भिः सगणैः । पादे यतिः ॥ ४८ ॥

द्रुतविलम्बितमाह नभौ भरौ ॥ ४९ ॥(१)

न-भ-भ-रैर्द्रुतविलम्बितमाहाचार्यः । पूर्ववद्यतिः ॥ ४९ ॥

मुनिशरविरतिर्नौ म्यौ पुटोऽयम् ॥ ५० ॥(२)

मुनिभिः सप्तभिः शरैः पञ्चभिश्च विरतिर्यत्र ॥ ५० ॥

प्रमुदितवदना भवेन्नौ च रौ ॥ ५१ ॥(३)

स्पष्टम् ॥ ५१ ॥

प्रमदाऽधिकृतं व्यसनोपहतम् ॥
उपधाभिरशुद्धमतिं सचिवं
नरनायक ! भीरुकमायुधिकम् ॥
(जगतीभेदेषु १७५६ तमोऽयं भेदः

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न. भ. भ. र.

तराण—जापुलि—ने नव—वल्लवी-
। । ।, ऽ । ।, ऽ । ।, ऽ । ऽ.

परिपदा सह केलिकुतूहलात् ॥
द्रुतविलम्बितचारुविहारिणं
हरिमहं हृदयेन सदा वहे ॥
(जगतीभेदेषु १४६४ तमो भेदोऽयम् ।

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. न. म. य.

न विच—लति क-थं चिन्त्या-यमार्गा-
। । ।, । । ।, ऽ ऽ ऽ, । ऽ ऽ.

द्रसुनि शिथिलमुष्टिः पार्थिवो यः ॥
अमृतपुट इवाऽसौ पुण्यकर्मा
भवति जगति सेव्यः सर्वलोकैः ॥
(जगतीभेदेषु ५७६ तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा माघे—

न. न. र. र.

अतिसु—रभिर—भाजि पु-ष्पश्रिया-
। । ।, । । ।, ऽ । ऽ, ऽ । ऽ.

नयसहितौ न्यौ कुसुमविचित्रा ॥ ५२ ॥(१)

स्पष्टम् । द्वयोरपि पादे यतिः ॥ ५२ ॥

रसैर्जसजसा जलोद्धतगतिः ॥ ५३ ॥(२)

रसाश्च रसाश्चेत्येकशेषे षड्भिः षड्भिश्च यतिः ॥ ५३ ॥

चतुर्जगणं वद मौक्तिकदाम ॥ ५४ ॥(३)

मतनुतरतयेवसन्तानकः ॥
तरुणपरभृतः स्वनं रागिणा-
मतनुत रतयेवसन्तानकः ॥ (शि. ६-६७)
(जगतीभेदेषु १२१६ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. य. न. य.
विगाल—तहारा—सुकुसु—ममाला
। । ।, । ऽ ऽ, । । ।, । ऽ ऽ.
सचरणलाक्षा वलयसुलक्षा ॥
विरचितवेशं सुरतविशेषं
कथयति शय्या कुसुमविचित्रा ॥
(जगतीभेदेषु ६७६ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

ज़. स. ज. स.
यदीय—हलतो—विलोक्य-विपदं
। ऽ ।, । । ऽ, । ऽ ।, । । ऽ,
कलिन्दतनया जलोद्धतगतिः ॥
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम् ॥
(जगतीभेदेषु १८८६ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा वाणीभूषणे—

ज. ज. ज. ज.
मया न—व किंचि—दकारि कदाऽपि
। ऽ ।, । ऽ ।, । ऽ ।, । ऽ ।.
विलासिनि ! वाम्यमनुस्मरताऽपि ॥
तथाऽपि मनस्तव नाश्वसनाय

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ ५५ ॥(१)
रैश्चतुर्भिर्युता स्रग्विणी सम्मता ॥ ५६ ॥(२)
भुवि भवेन्नभजरैः प्रियंवदा ॥ ५७ ॥(३)
त्रीणि स्पष्टानि । पादे यतिः ॥ ५७ ॥

व्रजामि कुतो भवतीमपहाय ॥
(जगतीभेदेषु २६२६ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

य. य. य. य.
सदारा--त्मजज्ञा-तिभृत्यो विहाय
। ऽ ऽ, । ऽ ऽ, । ऽ ऽ, । ऽ ऽ.
स्वमेतं हृदं जीवनं लिप्समानः ॥
मया क्लेशितः कालियेत्थं कुरु त्वं
भुजङ्ग ! प्रयातं द्रुतं सागराय ॥
(जगतीभेदेषु ६५८ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

र. र. र. र.
इन्द्रनी-लोपले—नेव या निर्मिता
ऽ । ऽ, ऽ । ऽ, ऽ । ऽ, ऽ । ऽ.
शातकुम्भद्रवाऽलङ्कृता शोभते ॥
नव्यमेघच्छविः पीतवासा हरे-
र्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥
(जगतीभेदेषु ११७१ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा मम—

न. भ. ज. र.
हसित—तामर—सनेत्र—सारसा
। । ।, ऽ । ।, । ऽ ।, ऽ । ऽ.
रजनिवल्लभमुखाऽलिकुन्तला ॥
स्मितवती पतिहितैकमानसा
सुकृतिनो हि दयिता प्रियम्वदा ॥
(जगतीभेदेषु १४०० तमोऽयं भेदः ।)

त्यौ त्यौ मणिमाला च्छिन्ना गुहवक्त्रैः ॥ ५८ ॥(१)

त-य-त-यैर्मणिमाला । गुहस्य स्कन्दस्य वक्त्रैः षड्भिः षड्भिश्च च्छिन्ना यतिमतीत्यर्थः ॥ ५८ ॥

धीरैरभाणि ललिता तभौ जरौ ॥ ५९ ।(२)

प्रमिताक्षरा सजससैरुदिता ।। ६० ॥(३)

एते स्पष्टे । पादे यतिः ॥ ६० ॥

---

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

त. य. त. य.

प्रह्वाम—रमौलौ रत्नोप—लक्लृप्ते
ऽ ऽ ।, । ऽ ऽ, ऽ ऽ ।, । ऽ ऽ.
जातप्रतिबिम्बा शोणा मणिमाला ॥
गोविन्दपदाब्जे राजी नखराणा-
मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥
(जगतीभेदेषु ७८१ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा मम—

त. भ. ज. र.

सास्ते पु—रत्रय —मतीत्य सुन्दरी
ऽ ऽ ।, ऽ । ।, । ऽ ।, ऽ । ऽ.
गीता ततस्त्रिपुरसुन्दरी इति ॥
लोकानतीत्य ललते यतो हि सा
भक्तैरभाणि ललिताऽभिधानतः ॥
(जगतीभेदेषु १३९७ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स. ज. स. स.

परिशु—द्धवाक्य—रचनाऽ—तिशयं
। । ऽ, । ऽ । , । । ऽ, । । ऽ.
परिषिञ्चती श्रवणयोरमृतम् ॥
प्रमिताऽक्षराऽपि विपुलार्थवती
कविभारती हरति मे हृदयम् ॥
(जगतीभेदेषु १७७२ तमोऽयं भेदः ।)

ननभरसहिता महितोज्ज्वला ॥ ६१ ॥(१)

महिता पूजिता । श्रेष्ठेत्यर्थः । उज्ज्वलेति नाम । पादे यतिः ॥६१॥

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ ६२ ॥(२)

पञ्चभिरश्वैः सप्तभिश्च छिन्ना यतिमती वैश्वदेवी नाम ॥ ६२ ॥

अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ ॥ ६३ ॥(३)

अब्धिभिश्चतुर्भिरष्टाभिश्च यतिः । मगण-भगणौ सगण-मगणौ च भवतः तज्जलधरमालानाम । चतुर्भिरष्टभिश्छिन्नेत्यनुषङ्गः । पैङ्गले

---

(१) उदाहरणान्तरं यथा मम—

न.	न.	भ.	र.
अधिह—दयम—-नाहत—सारसे			
।।।,	।।।,	ऽ।।,	ऽ।ऽ.

तव पदमनुचिन्तयते हि यः ॥
भगवति ननु तस्य यशोध्वजः
स्फुरति च धिषणा स्फटिकोज्ज्वला ॥
(जगतीभेदेषु १४७२ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म.	म.	य.	य.
अर्च्चाम—-न्येषां त्वं विहाया—मराणां			
ऽऽऽ,	ऽऽऽ,	।ऽऽ,	।ऽऽ,

अद्वैतेनैकं विष्णुमभ्यर्च्च भक्त्या ॥
तत्राऽशेषात्मन्यर्चिते भाविनी ते
भ्रातः ! सम्पन्नाऽऽराधना वैश्वदेवी ॥
(जगतीभेदेषु ५७७ तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म.	भ.	स.	म.
या भक्ता—नां कलि—दुरितो—त्तप्तानां			
ऽ ऽऽ,	ऽ ।।,	।।ऽ,	ऽऽऽ,

तापच्छेदे जलधरमाला नव्या ॥
भव्याकारा दिनकरपुत्रीकूले
केलीलोला हरितनुरव्यात् सा वः ॥
(जगतीभेदेषु २४१ तमो भेदोऽयम् ।)

त्रियमेव कान्तोत्पीडा ॥ ६३ ॥

इह नवमालिका नजभयैः स्यात् ॥ ६४ ॥(१)

इह छन्दःशास्त्रेऽष्टाभिश्चतुर्भिश्च यतिरित्याहुर्वृद्धाः ॥ ६४ ॥

स्वरशरविरतिर्ननौ रौ प्रभा ॥ ६५ ॥(२)

स्वरैः षड्जादिभिः सप्तभिः शरैः पञ्चभिश्च यतिर्यत्र ॥ ६५ ॥

भवति नजावथ मालती जरौ ॥ ६६ ॥

पञ्चभिः सप्तभिश्च यतिः ॥ ६६ ॥

जभौ जरौ वदति पञ्चचामरम् ॥ ६७ ॥(३)

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ--

न. ज. भ. य.

धवल—यशांशु—केन प—रिवीता
। । ।, । ऽ ।, ऽ । ।, । ऽ ऽ,
सकलजनाऽनुरागघुसृणाक्ता ॥
दृढगुणबद्धकीर्तिकुसुमौघै-
स्तव नवमालिनीव नृपलक्ष्मीः ॥

(जगतीभेदेषु ६४४ तमोऽयं भेदः ।) पिङ्गलसूत्रमतेनेदमुदाहरणम् । एतच्छन्दोविषये वृत्तरत्नाकरपिङ्गलसूत्रयोर्नाम्नैव भेदः । अन्यत् सर्वं समानमेवेति तदेवोदाहरणं न्यासि मया ।

(२) एतदुदाहरणान्तरं प्रमुदितवदनोदाहरणमेव । एकस्यैव च्छन्दसो नामद्वयं 'प्रमुदितवदना' 'प्रभा' इति च । नाऽत उदाहरणान्तरं न्यासि मया ।

(३) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न. ज. ज. र.

इहक—लयाऽच्यु-त केलि-कानन
। । ।, । ऽ । , । ऽ ।, ऽ । ऽ,
मधुरससौरभसारलोलुपः ॥
कुसुमकृतस्मितचारुविभ्रमा-
मलिरपि चुम्बति मालतीं मुहुः ॥
(जगतीभेदेषु १३९२ तमो भेदोऽयम् ।)

(३) इदं छन्दो न दृष्टं पुस्तकान्तरेऽतो नोदाहरणान्तरं न्यासि मया ।

अभिनवतामरसं नजजाद्यः ॥ ६८ ॥(१)

स्पष्टम् । इदमेवान्ये ललितपदमाहुः । पादे यतिः ॥

तथा—

नयुगरयुगलं च गौरी मता ॥
पञ्चमुनी भ्मौ सात्सयुता ललना ॥
ललितमभिहितं नौ भ्रौ नामतः ॥
द्रुतपदं भवति नभनयाश्चेत् ॥

अत्र वृत्तसङ्ख्या ४०९६ ॥ ६८ ॥

अथाऽतिजगती(१३)—

तुरगरसयतिर्नौ ततौ गः क्षमा ॥ ६९ ॥(२)

न-न-त-त-गुरुभिः क्षमा । सप्तभिः षड्भिश्च तत्र यतिः । चन्द्रिकेत्यन्ये ॥ ६९ ॥

म्नौ भ्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ७० ॥(३)

त्रिभिर्दशभिश्च यतिर्यत्र सा ॥ ७० ॥

---

(१) उदाहरणान्तरं यथा साहित्याचार्य'खिस्ते' इत्युपाह्वयनारायणशास्त्रिणाम्—

न. ज. ज. य.

अभिन—वताम—रसं क—मलायाः
। । ।, । ऽ ।, । ऽ ।, । ऽ ऽ.
करयुगवासमितं मृदुलायाः ॥
अहिपतितल्पगतं स्मरतातं
मदयति कामकलाकलनार्थम् ॥
(जगतीभेदेषु ८८० तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा मम—

न. न. त. त. गु.

अनिश-मधिम--नश्चित्क-लाचिन्त-ने
। । ।, । । ।, ऽ ऽ ।, ऽ ऽ ।, ऽ.
स्वमपि परशिवं भावयन्मज्जति ॥
स रचयितुमलं भावनामात्रतो
जगदिदमखिलं तत्पुरः का क्षमा ॥
(अतिजगतीभेदेषु २३६८ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा छन्दोवृत्तौ—

चतुर्ग्रहैरतिरुचिरा जभस्जगाः ॥ ७१ ॥(१)
ज-भ-स-ज-गैश्चतुर्षु नवसु च यतावतिरुचिरा ॥ ७१ ॥
वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ॥ ७२ ॥(२)
वेदाश्चत्वारो रन्ध्राणि नव ॥ ७२ ॥
(उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत्) ॥ ७३ ॥(३)

म.	न.	ज.	र.	गु.
उत्तुङ्ग—स्तनक—लशद्ध—योन्नता--ङ्गी				
ऽ ऽ ऽ,	। । ।,	। ऽ ।,	ऽ । ऽ,	ऽ.

लोलाक्षी विपुलनितम्बशालिनी च ॥
बिम्बोष्ठी नरवरमुष्टिमेयमध्या
सा नारी भवति मनःप्रहर्षिणीति ॥
(अतिजगतीभेदेषु १४०१ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा भट्टीकाव्ये—

ज.	भ.	स.	ज.	गु.
अभून्नृ—पो विबु—धसखः परन्त—पः				
। ऽ ।,	ऽ । ।,	। । ऽ,	। ऽ ।,	ऽ.

श्रुतान्वयो दशरथ इत्युदाहृतः ॥
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ॥(भ. १-१)
(अतिजगतीभेदेषु २८०६ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म.	त.	य.	स.	गु.
व्यूढोर—स्कः सिंह-समानां-नतम--ध्यः				
ऽ ऽ ऽ,	ऽ ऽ ।,	। ऽ ऽ,	। । ऽ,	ऽ.

पीनस्कन्धो मांसलहस्तायतबाहुः ॥
कम्बुग्रीवः स्निग्धशरीरस्तनुलोमा
भुङ्क्ते राज्यं मत्तमयूराऽऽकृतिनेत्रः ॥
(अतिजगतीभेदेषु १६३३ तमोऽयं भेदः ।)

(३) कंसान्तर्गतो ग्रन्थः कपुस्तके नास्ति । अत एव नोदाहरणान्तरमस्य न्यासि मया ।

सजसा जगौ भवति मञ्जुभाषिणी ॥ ७४ ॥(१)

स्पष्टम्। पञ्चभिरष्टभिश्चात्र यतिः ॥ ७४ ॥

ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥ ७५ ॥(२)

अश्वाः सप्त, ऋतवः षट्। इयं क्षमैव आचार्यो मतभेदेन संज्ञान्तरार्थं पुनरूचे।

तथा—

यमौ रौ विख्याता चञ्चरीकावली गः ॥
जभौ स्रजगावतिरुचिराम्बुधिग्रहैः ॥
भरतमतेनेयमेव पूर्वं रुचिरोक्ता।
नसरयुगगैश्चन्द्रलेखर्तुलोकैः ॥
षड्भिः सप्तभिश्च यतिः ॥
ऋतुमुनियतिर्विद्युन्नौ तौ गुरुः ॥
अत्र वृत्तसङ्ख्या ८१९२ ॥ ७५ ॥

---

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

स. ज. स. ज. गु.

अमृतो—र्मिशीत—लकरे—ण लाल—यन्
। । ऽ, । ऽ ।, । । ऽ, । ऽ ।, ऽ.
तनुकान्तिरोचितविलोचनो हरे! ॥
नियतं कलानिधिरसीति बल्लवी-
मुदमच्युते व्यधित मञ्जुभाषिणी॥
(अतिजगतीभेदेषु २७६६ तमोऽयं भेदः।)

(२) उदाहरणान्तरं यथा—

न. न. त. त. गु.

शरद्—मृतरु—चन्द्रि-काक्षालि-ते
। । ।, । । ।, ऽ ऽ ।, ऽ ऽ ।, ऽ.
दिनकरतनयातीरदेशे हरिः ॥
विहरति रभसाद्बल्लवीभिः समं
त्रिदिवयुवतिभिः कोऽपि देवो यथा ॥
(अतिजगतीभेदेषु २३६८ तमोऽयं भेदः।)

अथ शक्करी(१४)—

म्तौ न्सौ गावक्षग्रहविरतिरसम्बाधा ॥ ७६ ॥(१)

म-त-न-स-गणैर्गुरुभ्यां चासम्बाधा नाम। अक्षैर्बाह्येन्द्रियैः पञ्चभिः, ग्रहैर्नवभिश्च यतिर्यत्र सा तथा ॥ ७६ ॥

ननरसलघुगैः स्वरैरपराजिता ॥ ७७ ॥(२)

स्वराश्च स्वराश्चेत्येकशेषे सप्तभिः सप्तभिश्च यातर्भवति ॥ ७७ ॥

ननभनलघुगैः प्रहरणकलिता ॥ ७८ ॥(३)

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. त. न. स. गु. गु.

भङ्क्त्वादु-र्गाणिदु—मवन—मखिलं-छि-त्त्वा
ऽ ऽ ऽ, ऽ ऽ ।, । । ।, । । ऽ, ऽ, ऽ.

हत्वा तत्सैन्यं करितुरगबलं हृत्वा ॥
येनाऽसम्बाधा स्थितिरजनि विपक्षाणां
सर्वोर्वीनाथः स जयति नृपातर्मुञ्जः ॥
(शक्करीभेदेषु २०१७ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. न. र. स. ल. गु.

फणिप—तिवल—यं|जटा—मुकुटो ज्ज्व-लं
। । ।, । । ।, ऽ । ऽ, । । ऽ. ।, ऽ.

मनसिजमथनं त्रिशूलविभूषितम् ॥
स्मरसि यदि सखे ! शिवं शशिशेखरं
भवति तव तनुः परैरपराजिता ॥
(शक्करीभेदेषु ५०८२ तमोऽयं भेदः ।)

(३) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न. न. भ. न. ल. गु.

सुरमु—निमनु—जरुप—चितच—र-णां
। । ।, । । ।, ऽ । ।, । । ।, । ऽ.

रिपुभयचकितत्रिभुवनशरणाम् ॥
प्रणमत महिषासुरवधकुपितां
प्रहरणकलितां पशुपतिदयिताम् ॥
(शक्वरीभेदेषु ८१२८ तमोऽयं भेदः ।)

पूर्वोक्तैव यतिः ॥ ७८ ॥

उक्ता वसन्ततिलका तभजा जगौ गः ॥ १० ॥(१)

त-भ-ज-जा गणा गुरू चेति वसन्ततिलका ॥ ७९ ॥

सिंहोन्नतेयमुदिता मुनिकाश्यपेन ॥ ८० ॥(२)

काश्यपेन मुनिनेयं वसन्ततिलकैव सिंहोन्नतोक्तेति संज्ञान्तरोक्तिः ॥८०॥

उद्धर्षिणीयमुदिता मुनिसैतवेन ॥ ८१ ॥(३)

सैतवेन त्वाचार्येणेयमुद्धर्षिणीत्युक्ता ॥ ८१ ॥

इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ ८२ ॥(४)

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

त. भ. ज. ज. गु. गु.

उद्धर्षि—णी जन--दृशां स्त-नभार—गु-र्वी
ऽ ऽ ।, ऽ । ।, । ऽ ।, । ऽ ।, ऽ, ऽ.
नीलोत्पलद्युतिमलिम्लुचलोचना च ॥
सिंहोन्नतत्रिकतटी कुटिलाऽलकान्ता
कान्ता वसन्ततिलका नृपवल्लभाऽसौ ॥
(शक्वरीभेदेषु २६३३ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं निरुक्तमेव । तथाऽपि रसिकजनमनोविनोदनाय पद्यान्तरं लिख्यते । यथा ध्वन्यालोकलोचने श्रीमदभिनवगुप्तपादाचार्य-गुरोः कविसहृदयचक्रवर्त्तिनो भट्टेन्दुराजस्य—

इन्दीवरद्युति यदा बिभृयां न लक्ष्म
स्युर्विस्मयैकसुहृदोऽस्य यदा विलासाः ॥
स्यान्नाम पुण्यपरिणामवशात्तदानीं
कीरीकपोलतलकोमलकान्तिरिन्दुः ॥

(३) एतस्याऽपिपूर्वोक्तमेव । तथाऽपीदं श्रुतिगोचरीक्रियताम् । यथा न्यायवाचस्पतिरुद्रकवेः—

कस्तूरिकाहरिण ! मुञ्च वनोपकण्ठं
मा सौरभेण ककुभः सुरभीकुरुष्व ॥
आस्तां यशो ननु किरातशराऽभिपाता-
त्त्राताऽपि हन्त भविता भवतो दुरापः ॥

(४) उदाहरणान्तरं यथा साहित्याचार्यखिस्तेनारायणशास्त्रिणाम्—

भ. ज. स. न. गु. गु.

इन्दुव—दनाक—मलको—मलश—री रा
ऽ । ।, । ऽ ।, । । ऽ, । । ।, ऽ, ऽ.

गुरुयुगलसहितैर्भ-ज-स-नैः ॥ ८२ ॥

द्विःसप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत् ॥८३॥(१)

द्विर्द्विवारं सप्तसु छित् छेदो यतिर्यस्याः साऽलोला नाम ॥

तथा—

ननतजगुरुगैः समयतिर्नदी स्यात् ॥
लक्ष्मीरन्तविरामा म्सौ तभौ गुरुयुग्मम् ॥
त्रिननगगिति वसुयति सुपवित्रम् ॥
मध्यक्षामा युगदशविरामा म्भौ न्यौ गौ ॥

इदमेव कुटिलमित्यन्ये ।

नजभजला गुरुश्च भवति प्रमदा ॥
सजसा यलौ गिति शरग्रहैर्मञ्जरी ।
नजभजगैर्गुरुश्च वसुषट् कुमारी ॥
नरनरैर्लगौ च रचितं सुकेशरम् ॥

अत्र वृत्तसङ्ख्या १६३८४ ॥ ८३ ॥

मञ्जुवचना मदनमोहनविलासा ॥
कं न वशयेन्मुनिवरं नयनलीला-
वीक्षणलवैरपि हठाच्चतुरवाचा ॥

यथा वा मम—

कुन्दरदना कुटिलकुन्तलकलापा
मन्दमृदुलस्मितपरा कमलनेत्रा ॥
सुन्दरसरःपरिसरे विहरमाणा
इन्दुवदना मनसि सा युवतिरास्ते ॥

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म. स. म. भ. गु.गु.

मुग्धे! यौ-वनल-क्ष्मीर्विद्यु-द्विभ्रम-लो-ला
ऽ ऽ ऽ, । । ऽ, ऽ ऽ ऽ, ऽ । । , ऽ, ऽ.
त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ॥
तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे
श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥
(शक्वरीभेदेषु ३०६७ तमो भेदोऽयम् ।)

अथाऽतिशक्करी (१५)—

द्विहतहयलघुरथ गिति शशिकला ॥ ८४ ॥(१)

द्विगुणता हयाः सप्त लघवो यत्र सा तथा । अथ तदनन्तरं गुरुर्गुर्वन्ताश्चतुर्दश लघवः शशिकलेत्यर्थः । इयमेव पैङ्गले नननसैश्चन्द्रावर्ता नामोक्ता । अत्र सप्तभिरष्टभिश्च यतिरिति सम्प्रदायः ॥ ८४ ॥

स्रगिति भवति रसनवकयतिरियम् ॥ ८५ ॥(२)

इयं शशिकलैव रसेषु षट्सु नवसु यतौ स्रगिति संज्ञिता मालेत्यर्थः॥८५॥

वसुहययतिरिह मणिगुणनिकरः ॥ ८६ ॥(३)

अष्टसु सप्तसु च यतावियमेव शशिकला मणिगुणनिकरसंज्ञितेति । यतिभेदेन संज्ञान्तरद्वयमुक्तम् ॥ ८६ ॥

ननमययुतेयं मालिनी भोगिलोकैः ॥ ८७ ॥(४)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न.	न.	न.	न.	स.
मलय—	जतिल—	कसमु—	दितश—	शिकला
।।।,	।।।,	।।।,	।।।,	।।ऽ.

व्रजयुवतिलसदलिकगगनगता ॥
सरसिजन्यनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम् ॥
(अतिशक्वरीभेदेषु १६३८४ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा तत्रैव—

अयि सहचरि ! रुचिरतरगुणमयी
भ्रदिमवसतिरनपगतपरिमला ॥
स्रगिव निवस विलसदनुपमरसा
सुमुखि ! मुदितदनुजदलनहृदये ॥

(३) एतदुदाहरणान्तरमपि तत्रैव—

नरकरिपुरवतु निखिलसुरगति-
रमितमहिमभरसहजनिवसतिः ॥
अनवधिमणिगुणनिकरपरिचितः
सरिदधिपतिरिव धृततनुविभवः ॥

(४) उदाहरणान्तरं यथा महाकविक्षेमेन्द्रस्य—

भोगिभिर्नागैरष्टभिर्लोकैर्भूरादिभिः समभर्यतावित शेषः। 'नाग-लोकैः' इति रुचिरः पाठः ॥ ८७ ॥

भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ ८८ ॥(१)

रसहितौ रगणयुक्तौ। सप्तस्वष्टसु च यतिः ॥ ८८ ॥

सजना नयौ शरदशयतिरियमेला ॥ ८९ ॥(२)

शरेषु पञ्चसु दशसु च यतौ स-ज-न-न-यैरेला नाम ॥ ८९ ॥

म्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा ॥ ९० ॥(३)

न. न. म. य. य.

ननन—नमय—वाणी म-खलाकृ-ष्टिकाल
।।।, ।।।, ऽऽऽ, ।ऽऽ, ।ऽऽ.
परिचलदिव शीलं नोत्सृजन्ती दुकूलम् ॥
तृणलवचलनेऽपि स्वैरिणी शङ्कमाना
दिशि दिशि कृतदृष्टिर्मालिनी कस्य नेष्टा ॥
(अतिशक्करीभेदेषु ४६७२ तमोऽयं भेदः।)

(१) उदाहरणान्तरं यथा साहित्याचार्यखिस्तेश्रीनारायण शास्त्रिणाम्-

न. ज. भ. ज. र.

भज भ—ज शङ्क—रं गिरि—जया स-मन्वितं
।।।, ।ऽ।, ऽ।।, ।ऽ।, ऽ।ऽ.
त्यज भवबन्धनं विरसताऽवसानकम् ॥
उपनिषदां मतं मनसि धेहि सन्ततं
गुरुकृपया सदा भवतु ते प्रभद्रकम् ॥
(अतिशक्करीभेदेषु १११८४ तमोऽयं भेदः।)

(२) उदाहरणान्तरं यथा पञ्चिकायाम्—

स. ज. न. न. य.

यदि को-पिनी प्र—भवसि मदुप—रि कान्ते !
।।ऽ, ।ऽ।, ।।।, ।।।, ।ऽऽ.
दृढबन्धनं घटय भुजलतिकया मे ॥
सहसा कुरु प्रखरनयनशरघातं
रदनच्छदावथ दश सुमुखि ! यथेच्छम् ॥
(अतिशक्करीभेदेषु ८१७२ तमोऽयं भेदः।)

(३) उदाहरणान्तरं यथा साहित्याचार्यखिस्तेश्रीनारायण शास्त्रिणाम्-

यान्तावन्ते यगणयुक्तौ ।

तथा—

मा वाणा स्युर्यस्यां सा कामक्रीडासंज्ञा ज्ञेया ॥
नजभजरैर्विराजितमिदं सुकेसरम् ॥
चन्द्रलेखाभिधा रौ म्यौ यो विरामः स्वराष्टौ ॥
ननतभरकृताङ्गैः स्वरैरुपमालिनी ॥

अत्र वृत्तानि ३२७६८ ॥ ६० ॥

अथाऽष्टिः (१६)—

भ्रत्रिनगैः स्वरात्खमृषभगजविलसितम् ॥ ६१ ॥(१)

भ्रौ च त्रयो नाश्च गुरुश्च तैरिति विग्रहः, स्वरात्सप्तमात्परं खं विरामो यदि तदेति शेषः । सप्तसु यतिः । पादान्ते च यतिः प्राप्तवति सा नोक्ता । स्वरात्परं खं शरीरच्छिद्रनवकं यतिस्थानमिति शेष इति वार्थः । ऋषभेत्यादि सर्वं नाम ॥ ६१ ॥

नजभजरैः सदा भवति वाणिनी गयुक्तैः ॥ ६२ ॥(२)

गयुक्तैर्गुरुयुक्तैः ॥

म. र. म. य. य.

जाह्नव्यो-ष्णीषशा-भा स्वाभा-रातशुभ्रां-शुकाभा
ऽ ऽ ऽ, ऽ । ऽ, ऽ ऽ ऽ, । ऽ ऽ, । ऽ ऽ.
दैत्यानां मुण्डजातैर्हारावली शोभते सा ॥
आशा वस्त्राण्यभूवन्भर्गस्य नेपथ्यकल्पे
शोभां भव्यां विधत्ते कांचिन्नवां चन्द्रलेखाम् ॥
(अतिशक्वरीभेदेषु ४६२५ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

भ. र. न. न. न. गु.

यो हरि—रुच्चखा—न खर—तरन—खशिख—रै-
ऽ । । , ऽ । ऽ , । । । , । । । , । । । , ऽ.
र्दुर्जयदत्यसिंहसुविकटहृदयतटम् ॥
किन्विह चित्रमेष यदखिलमपहृतवान्
कंसनिदेशदृप्यदृषभगजविलसितम् ॥
(अष्टिभेदेषु ३२७२७ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

तथा—

चिह्नसंज्ञमरिते रजौ रजौ रगौ च वृत्तम् ॥
जरौ जरौ ततो जगौ च पञ्चचामरं वदेत् ॥
सङ्कथिता भरौ नरनगाश्च धीरललिता ॥
पञ्चभकारयुतश्चगतिर्यदि चान्त्यगुरुः ॥

अत्र सङ्ख्या ६५५३६ ॥ ६२ ॥

अथाऽत्यष्टिः (१७)-

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ ६३ ॥(१)

रसैः षड्भी रुद्रैरेकादशभिश्छिन्ना यतिमती ॥ ६३ ॥

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ६४ ॥(२)

वसुभिरष्टभिर्ग्रहैर्नवभिश्च यतिमती ॥ ६४ ॥

न.	ज.	भ.	ज.	र.	गु.
स्फुरतु—ममाऽऽन—नऽद्य न—नु वाणि—नीतिर—म्यं					
।।।,	।ऽ ।,	ऽ।।,	।ऽ।,	ऽ।ऽ,	ऽ.

तव चरणप्रसादपरिपाकतः कविन्वम् ॥
भवजलराशिपारकरणक्षमं मुकुन्दं
सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥
(अष्टिभेदेषु ११११८४ तमोऽयं भेदः ।)

(१) अत्रोदाहरणान्तरं यथा जयदेवस्य—

य.	म.	न.	स.	भ.	ल.	गु.
दुरालो—कस्तोक—स्तबक—नवका—ऽशोकक—लि-का-						
।ऽऽ,	ऽऽऽ,	।।।,	।।ऽ,	ऽ।।,	।,	ऽ.

विकासः कासारोपवनपवनोऽपि व्यथयति ॥
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥
(अत्यष्टिभेदेषु ५६३३० तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा जयदेवस्यैव—

ज.	स.	ज.	स.	य.	ल.गु.
दृशौ त—व मदा—लसे व—दनमि—न्दुमत्या—स्प-दं					
।ऽ।,	।।ऽ,	।ऽ।,	।ऽऽ.	।ऽऽ,	।, ऽ.

गतिर्जनमनोरमा विजितरम्भमूरुद्वयम् ॥
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा—

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥९५॥(१)

दिशो दश, मुनयः सप्त । दिशो मुनयश्चेति समाहारे छन्दोविशेषणम् । यतिस्थानत्वेन च तत्सङ्ख्याकाक्षररूपता विवक्षिता । दिङ्मुनिभिर्वंशपत्रपतितमिति एकं वा पदम् । यतिपदस्य मध्यमस्य लोपेन वा समासः । तत्र यतिस्थानमिति वाऽध्याहारः । दिङ्मुनियतीति पदेऽन्त्यपदलोप इति केचित् । लुप्तविभक्त्यन्तमित्यन्ये । तदुभयं चिन्त्यम् ॥९५॥

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ ९६ ॥ (२)

षट्सु चतुर्षु सप्तसु च त्रिषु स्थानेषु यतौ हरिणी नाम ॥ ९६ ॥

मन्दाक्रान्ता जलधिषडगैर्भौ नतौ ताद्गुरू चेत् ॥ ९७ ॥ (३)

वहो विबुधयौवतं वहसि तन्वि ! पृथ्वीगता ॥
(अत्यष्टिभेदेषु ३८७५० तमो भेदोऽयम् ।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

भ.	र.	न.	भ.	न.	ल. गु.
अद्य कु—रुष्व क—र्म सुकृ—तं यदि परदि—व-से					
ऽ । ।, ऽ । ऽ, । । ।, ऽ । ।, । । ।, ।, ऽ.					

मित्र ! विधेयमस्ति भवतः किमु चिरयसि तत् ॥
जीवितमल्पकालकलनालघुतरतरलं
नश्यति वंशपत्रपतितं हिमसलिलमिव ॥
(अत्यष्टिभेदेषु ६४९८३ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा सुवृत्ततिलके—

न.	स.	म.	र.	स.	ल. गु.
न सम—रसनाः काल भा-गाश्चलं धनयौ—व नं					
। । ।, । । ऽ, ऽ ऽ ऽ, ऽ । ऽ, । । ऽ, ।, ऽ					

कुरुत सुकृतं यावन्नयं तनुः प्रविशीर्यते ॥
किमपि कलना कालस्येयं प्रधावति सत्वरा
तरुणहरिणीसन्त्रस्तेव प्लवप्रविसारिणी ॥
(अत्यष्टिभेदेषु ४६११२ तमो भेदोऽयम् ।)

(३) उदाहरणान्तरं यथा मम—

म.	भ.	न.	त.	त.	गु. गु.
नानाऽऽश्ले—षप्रक—रणच—णा चारु-वर्णोज्ज्व-ला-क्षी					
ऽ ऽ ऽ, ऽ । ।, । । ।, ऽ ऽ । , ऽ ऽ । , ऽ, ऽ					

म-भ-न त-त-ग-गैर्मन्दाक्रान्ता । जलधिषडगैश्चतुर्भिः षड्भिरगैः पर्वतैः सप्तभिः ॥ ९७ ॥

हयदशाभिर्नजौ भजजला गुरु नर्कुटकम् ॥ ९८ ॥ (१)

सप्तभिर्दशभिश्च यतिः ॥ ९८ ॥

मुनिगुहकार्णवैः कृतयति वद कोकिलकम् ॥ ९९ ॥ (२)

मुनयः सप्त, गुहस्य स्कन्दस्य कानि मुखानि षट्, अर्णवाश्चत्वारस्तैः कृता यतिर्यत्र तन्नर्कुटकमेव कोकिलकं वद ब्रूहीति शिष्योपदेशः । यतिभेदेन तस्यैवान्या संज्ञेति ज्ञेयम् ॥

तथा—

रसयुगहययुङ्नौ भ्रौ सो लगौ हि यदा हरिः ॥
भवेत्कान्ता युगरसहयैर्यभौ नरसा लगौ ॥
ससजा भजगा गु दिक्स्वरैर्भवति चित्रलेखा ॥

अत्र वृत्तसंख्या १३१०७२ ॥ ९९ ॥

नानाभावाकलितरसिकश्रेणिकान्ताऽन्तरङ्गा ॥
मुग्धस्निग्धैर्मृदुमृदुपदैः क्रीडमाना पुरस्तात्
मन्दाक्रान्ता भवति कविताकामिनी कौतुकाय ॥
(अत्यष्टिभेदेषु १८९२९ तमो भेदोऽयम् ।)

(१) उदाहरणान्तरं यथा सुवृत्ततिलके—

न. ज. भ. ज. ज. ल. गु.

निजभु—जजैर्वि--शालगु--णविक्र-मकीर्ति-भ-रैः
। । ।, । ऽ ।, ऽ । ।, । ऽ ।, । ऽ ।, ।, ऽ
प्रविदधता सुधांशुधवलं भवता भुवनम् ॥
कथय कथं कृतेयमतिरागवती जनता
चरितमपूर्वमेव तव कस्य न नर्कुटकृत् ॥
(अत्यष्टिभेदेषु ५६२४० तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न. ज. भ. ज. ज. ल. गु.

लसद—रुणे क्त--णं मधु--रभाष—ण मोद-क-रं
। । ।, । ऽ ।, ऽ । ।, । ऽ ।, । ऽ ।, ।, ऽ
मधुसमयागमे सरसकेलिभिरुल्लसितम् ॥
अलिललितद्युतिं रविसुतावनकोकिलकं
ननु कलयामि तं सखि ! सदा हृदि नन्दसुतम् ॥
(अत्यष्टिभेदेषु ५६२४० तमोऽयं भेदः ।)

अथ धृतिः (१८)—

स्याद् भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥१००॥(१)

भूतानि पञ्च, ऋतवः षट्, अश्वाः सप्त ॥

तथा—

मात्सौ जौ भरसंयुतौ करिवाणकैर्हरिणप्लुतम् ॥
यदिह नयुगलं ततो वेदरेफैर्महामालिका ॥
पञ्चभकारकृताश्वगतिर्यदि चान्तसरचिता ॥
सुधा तर्कैस्तर्कैर्भवति ऋतुभिर्यौ मो नसतसाः ॥

तर्काः षट् ।

वर्णाश्वैर्मननततमकैः कीर्तिता चित्रलेखेयम् ॥

वर्णाश्चत्वारः ।

भाद्रननासौ भ्रमरपदकमिदमभिहितम् ॥
शार्दूलं वद मासषट्कयति मः सौ जसौ रौ मश्चेत् ॥

मासा द्वादश ।

अर्थाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केशरम् ॥

अर्थाश्चत्वारः ।

म्भौ न्जौ भ्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः ॥
अत्र वृत्तानि २६२१४४ ॥ १०० ॥

अथाऽतिधृतिः (१९)—

मूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम् ॥ १०१ ॥(२)

---

(१) उदाहरणान्तरं यथा—

म.	त.	न.	य.	य.	य
धन्याना-	मेताः कु-	सुमित-	-लतावे-	ल्लितोत्फु-	ल्लवृक्षाः
ऽ ऽऽ,	ऽऽ ।,	।।।,	।ऽऽ,	।ऽऽ,	।ऽऽ,

सोत्कण्ठं कूजत्परभृतकलालापकोलाहलिन्यः ॥
मध्वादौ माद्यन्मधुकरकलोद्गीतझङ्काररम्या
ग्रामान्तस्रोतःपरिसरभुवः प्रीतिमुत्पादयन्ति ॥
(धृतिभेदेषु ३७८२७ तमो भेदोऽयम् ।)

(२) उदाहरणान्तरं यथा सिद्धान्तशिरोमणौ—

म.	स.	ज.	स.	त.	त,	गु,
ये याताऽ-	धिकमा-	सहीन—	दिवसा	येचाऽपि	तच्छेष-	-के
ऽ ऽऽ,	।।ऽ,	।ऽ।,	।।ऽ,	ऽऽ ।,	ऽ ऽ।,	ऽ

द्वादशभिः सप्तभिश्च यतिः ।
तथा—

नयुगललगुरु निरन्तरं यदा स पञ्चचामरः ॥
रसर्त्वश्वैर्यो न्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् ॥
भूताश्वाश्वान्तं मतनसररगैः कीर्तितं पुष्पदाम ॥
वृत्तं विम्बाख्यं शरमुनितुरगैर्म्तौ न्सौ ततौ चेद्गुरुः ॥
इयं छाया ख्याता ऋतुरसहयैर्यो मनसा भ्तौ गुरुः ॥
रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका ॥
इनाश्वैर्यायभनयजजगाः कीर्तिता मणिमञ्जरी ॥
गजाब्धितुरगैर्जसौ जसतभा गश्चेत्समुद्रतता ॥

अत्र वृत्तानि ५२४२८८ ॥ १०१ ॥

अथ कृतिः (२०)—

ज्ञेया सप्ताश्वषड्भिर्मरभनय-
युता भ्लौ गः सुवदना ॥ १०२ ॥(१)

सप्तभिः सप्तभिः षड्भिश्च यतिः ॥ १०२ ॥

त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥ १०३ ॥(२)

तेषामैक्यमवेक्ष्य यो दिनगणान्ब्रूतेऽत्र कल्पे गतान् ॥
संश्लिष्टस्फुटकुट्टकोद्भटबहुक्षुण्णैर्विद्रावणे
तस्याऽव्यक्तविदो विदो विजयते शार्दूलविक्रीडितम् ॥
(अतिधृतिभेदेषु १४९३३७ तमोऽयं भेदः)
(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

म. र. भ. न. य. भ. ल. गु.

प्रत्याहृ-त्येन्द्रिया-णि त्वदि--तरवि--षयान्ना--साग्रन-य-ना
ऽ ऽ ऽ, ऽ । ऽ, ऽ । । , । । । , । ऽ ऽ , ऽ । । , । , । ऽ
त्वां ध्यायन्ती निकुञ्जे परतरपुरुषं हर्षोत्थपुलका ॥
आनन्द्राश्रुप्लुताक्षी वसति सुवदना योगैकरसिका
कामार्त्तिं त्यक्तुकामा ननु नरकरिपो! राधा मम सखी ॥
(कृतिभेदेषु ४६६८३३ तमोऽयं भेदः ।)
(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

र. ज. र. ज. र. ज. गु. ल.

जन्तुमा--त्रदुःख-कारि क-र्म निर्म्मि—तं भव--त्यनर्थ--हे-तु.
ऽ । ऽ, । ऽ । , ऽ । ऽ, । ऽ । , ऽ । ऽ, । ऽ । , ऽ ।

त्रिवारं रगणजगणौ गुरुलघू चेदेतादृशेन लक्षणेन वृत्तं नाम । गुरुलघुक्रमेणेत्यर्थः । अत्र पादान्ते यतिः । "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (पा० सू०६-३-१११) इति त्रिरित्यत्र दीर्घः ॥

तथा—

रसैरश्वैरश्वैर्यमननततगैर्गेन शोभेयमुक्ता ॥

अत्र सङ्ख्या १०४८५७६ ॥ १०३ ॥

अथ प्रकृतिः (२१)—

स्रभ्नैर्यानां त्रयेण त्रिमुनि-

यतियुता स्रग्धरा कीर्तितेयम् ॥ १०४ ॥(१)

म-र-भ-नै-र्यगणत्रयेण च स्रग्धरा त्रिवारं मुनिषु यतियुक्ता । सप्तसु सप्तसु सप्तसु यतीमतीत्यर्थः ।

तथा—

सलिलनिधिर्भवेदिह नजौ भगणौ जगणास्त्रयश्च रः ॥

अन्येषां मते सिद्धकमिति संज्ञितमेतत् ।

अत्र सङ्ख्या २०६७१५२ ॥ १०४ ॥

अथाकृतिः (२२)—

भ्रौ नरना रनावथ गुरुर्दिगर्क-

विरमं हि भद्रकमिति ॥ १०५ ॥(२)

तेन सर्वमात्मतुल्यमीक्षमाण उत्तमं सुखं लभस्व ॥

विद्धि बुद्धिपूर्वकं ममोपदेशवाक्यमेतदादरेण

वृत्तमेतदुत्तमं महाकुलप्रसूतजन्मनां हिताय ॥

(कृतिभेदेषु ६६६०५१ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा सुवृत्ततिलके—

म. र. भ. न. य. य. य.

सारार-म्भानुभा-वप्रिय—परिच--यया स्व--र्गरङ्गा--ङ्गनानां

ऽ ऽ ऽ, ऽ । ऽ, ऽ । । , । । । , । ऽ ऽ, । ऽ ऽ, । ऽ ऽ,

लीलाकर्णावतंसश्रियमतनुगुणश्लेषया संश्रयन्त्या ॥

आभाति व्यक्तमुक्ताविचकिललवलीवृन्दकुन्देन्दुकान्त्या

त्वत्कीर्त्या भूषितेयं भुवनपरिवृढ ! स्रग्धरेव त्रिलोकी ॥

(प्रकृतिभेदेषु ३०२६६३ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

तथा—

सप्तभकारकृतावसितौ सगुरुः कविभिः कथिता मदिरा ॥

अत्र वृत्तानि ४१६४३०४ ॥ १०५ ॥

अथ विकृतिः (२३)—

यदिह नजौ भजौ भ्जभ्लगा-
स्तदश्वललितं हरार्कयतिमत् ॥ १०६ ॥(१)

हराः ११, अर्काः १२ ॥ १०६ ॥

मत्ताक्रीडा मौ त्रौ नौ नल्गिति
भवति वसुशरदशयतियुता ॥ १०७ ॥(२)

दिक्षु दशस्वर्केषु द्वादशसु च विरमो विरतिर्यस्य तत्तथा हीति-प्रसिद्धम् ।

भ.	र.	न.	र.	न.	र.	न.	गु.
भद्रक--गीतिभिः	सकृद-पि स्तुव--न्ति भव	ये भव—न्तमन--घं					
ऽ । ।,	ऽ । ऽ,	। । ।,	ऽ । ऽ,	। । ।,	ऽ । ऽ,	। । ।,	ऽ,

भक्तिभरावनम्रशिरसः प्रणम्य तव पादयोः सुकृतिनः ॥
ते परमेश्वरस्य पदवीमवाप्य सुखमाप्नुवन्ति विपुलं
मर्त्यभुवं स्पृशन्ति न पुनर्मनोहरसुराङ्गनापरिवृताः ॥
(आकृतिभेदेषु १९३०७११ तमोऽयं भेदः ।)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

न.	ज.	भ.	ज.	भ.	ज.	भ.	ल.गु.
पवन—विवृत-वीचिच--पलं वि-	लोकय-ति जीवि-तं तनु-भृ-तां						
। । ।,	। ऽ ।,	ऽ । ।,	। ऽ ।,	ऽ । ।,	। ऽ ।,	ऽ । ।,	।, ऽ

वपुरपि हीयमानमनिशं जरावनितया वशीकृतमिदम् ॥
सपदि निपीडनव्यतिकरं यमादिव नराधिपान्नरपशोः
परवनितामवेद्य कुरुते तथाऽपि हतबुद्धिरश्वललितम् ॥
(विकृतिभेदेषु ३८६१४२४ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा तत्रैव—

म.	म.	त.	न.	न.	न.	न.	ल.गु.
हृद्यं म-द्यं पीत्वा-नारीस्ख-लितग—तरति—शयर--सिकहृ--द्या							
ऽ ऽ ऽ,	ऽ ऽ ऽ,	ऽ ऽ ।,	। । ।,	। । ।,	। । ।,	। । ।,	।, ऽ,

मत्ताक्रीडा लोलैरङ्गैर्मुदमखिलविटजनमनसि कुरुते ॥

वसवोऽष्टौ पञ्चदश च तेषु यतिमती । अष्टमे पञ्चदशे च वर्णे यतिः कार्येत्यर्थः । न तु पञ्चसु दशसु चेत्यर्थः । "मत्ताक्रीडा मौ ल्गौ न्लौग् वसुपञ्चदशकौ" (पिं०सू०७-२८) इति सूत्रे द्विवचननिर्देशात् । अन्यथा हि बहुवचनं स्यात् । अन्यैस्तु वाजिवाहनमेतदुक्तम् ॥

अत्र सङ्ख्या ८३८८६०८ ॥ १०७ ॥

अथ सङ्कृतिः (२४)—

भूतमुनिर्नैर्यातिरिह भतनाः स्भौ
भनयाश्च यदि भवति तन्वी ॥ १०८ ॥(१)

भूतानि पञ्च, मुनयः सप्त, इनाः सूर्या द्वादश । अत्र पैङ्गले द्वादशसु द्वादशसु च यतिरुक्ता ॥

अत्र सङ्ख्या १६७७७२१६ ॥

अथाऽतिकृतिः (२५)—

क्रौञ्चपदा भौ स्भौ ननना न्गा-
विषुशरवसुमुनिविरतिरिह भवेत् ॥ १०९ ॥(२)

इषवः पञ्च, शराः पञ्च, वसवोऽष्टौ, मुनयः सप्त । एतेषु विरतिर्यस्याः सा तथा ।

वीतव्रीडाऽश्लीलालापैः श्रवणसुखसुभगसुललितवचना
नृत्यैर्गीतैभ्रूविक्षेपैः कलमणितविविधविहगकुलरुतैः ॥

(विकृतिभेदेषु ४१९४०४९ तमो भेदोऽयम् ।)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

भ. त. न. स. भ. भ. न. य.

माधव ! मुग्धैर्म--धुकर—विरुतः कोकिल--कूजत--मलय--समीरैः
ऽ ।।, ऽ ऽ ।, ।।।, ।।ऽ, ऽ।।, ऽ।।, ।।।, ।ऽऽ,
कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा ॥
पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूनै-
र्निःश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी ॥

(सङ्कृतिभेदेषु ४१५५३६३ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

भ. म. स. भ. न.

याकपि-लाक्षी पि-ङ्गलके—शीकलि-रुचिर-
ऽ ।।, ऽ ऽ ऽ, ।।ऽ, ऽ।।, ।।।,

अत्र सङ्ख्या ३३५५३४३२ ॥

अथोत्कृतिः (२६)—

वस्वीशाश्वच्छेदोपेतं ममतनयुगनर-
सलगैर्भुजङ्गविजृम्भितम् ॥ ११० ॥(१)

वसवः ८, ईशाः ११, अश्वाः सप्त । एतैश्छेदेन यत्या युक्तम् ॥११०॥

मो नाः षट् सगगिति यदि
नवरसरसशरयतियुतमपवाहाख्यम् ॥१११॥ (२)

न. न. न. गु.

नुदिन—मनुन—यकठि—ना
।।।, ।।।, ।।।, ऽ,

दीर्घतराभिः स्थूलशिराभिः परिवृतवपुरतिशयकुटिलगतिः ॥
आयतजङ्घा निम्नकपोला लघुतरकुचयुगपरिचितहृदया
सा परिहार्या क्रौञ्चपदा स्त्री ध्रुवमिह निरवधि सुखमभिलषता ॥
(अतिकृतिभेदेषु १६७७३६१ तमोऽयं भेदः ।)

(१)उदाहरणान्तरं यथा—

म. म. त. न. न.

हेलोद-ञ्चन्यञ्च-त्पादप्र-कटाव—कटन
ऽऽऽ, ऽऽऽ, ऽऽ।, ।।।, ।।।,

न. र. स. ल. ग.

टनभ—रोरण—त्करता-ल-कः
।।।, ऽ।ऽ, ।।ऽ, ।, ऽ

चारुप्रेङ्खच्चूडाबर्हः श्रुतितरलनवकिसलयस्तरक्षितहारधृत् ॥
त्रस्यन्नागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुगं कृतस्तुतिरच्युतः
पायाद्वश्छिन्दन्कालिन्दीह्रदकृतनिजवसतिबृहद्बुभुजङ्गविजृम्भितम् ॥
(उत्कृतिभेदेषु २३८५४८४९ तमोऽयं भेदः ।)

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. न. न. न. न.

श्रीकण्ठं त्रिपुर—दहन—ममृत—किरण-
ऽऽऽ, ।।। ।।।, ।।।, ।।।

मो मगणः, षट् नाः नगणाः, सगणः गो गुरुः पुनर्गुरुश्च नवभिः षड्भिः पुनः षड्भिः पञ्चभिश्च यत्या युतमपवाहकसंज्ञम् ॥

अत्र वृत्तसङ्ख्या ६७१०८८६४ ॥ १११ ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकाया-मुक्तादिप्रकरणम् ।

इदानीं समवृत्तप्रसङ्गेन समवृत्तरूपान्दण्डकानाह—

यदि ह नयुगलं ततः सप्तरेफा-
स्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥ ११० ॥

यदीति यदेत्यर्थेऽव्ययम् । हेति प्रसिद्धार्थेऽव्ययं वा । नयुगलं नगणद्वयं ततस्तदनन्तरं सप्त रगणाः, स चण्डवृष्टिप्रपातो नाम दण्डकः । इदमेवोदाहरणं पादे । इयं च संज्ञा रातमाण्डव्यव्यतिरिक्तपिङ्गलादिमतेन । ताभ्यां त्वेतस्य संज्ञान्तरमकारि ॥ ११० ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥ ११२ ॥

यद्यपि प्रतिचरणं विवृद्धो रेफो रगणो येषु ते तथेति व्युत्पत्त्या प्रथमे पादे नौ ततोऽष्टौ रेफाः, द्वितीये नव, तृतीये दश, चतुर्थे एकादशेति वृद्धिरित्यर्थः प्रतीयते, तथापि ग्रन्थान्तरविरोधात्प्रतिदण्डकं चरणेषु विवृद्धा रेफा येष्विति विग्रहेणोत्तरोत्तरदण्डकेषु चरणचतुष्टयेऽप्येकैकरेफवृद्धिरित्यर्थाश्रयणेन ग्रन्थान्तराऽविरोधः कार्यः । ततश्च नाभ्यां रगणाष्टकेन च घटितपादोऽर्णाख्यो दण्डकः, रगणनवकेनाऽर्णवः, दशभिर्व्यालः, एकादशभिर्जीमूतः, द्वादशभिर्लीलाकरः, त्रयोदशभिरुद्दामः, चतुर्दशभिः शङ्खः । सर्वत्रादौ नगणद्वयं कार्यम् । आदिशब्दात्पञ्चदशा-

न. न. स. गु.गु.
शकल—ललित—शिरसं—रु द्रं
।।।, ।।।, ।।ऽ, ऽ, ऽ.
भूतेशं हतमुनिमखमखिलभुवननमितचरणयुगमीशानम् ॥
सर्वज्ञं वृषभगमनमहिपतिकृतवलयरुचिरकरमाराध्यं
तं वन्दे भवभयभिदमभिमतफलवितरणगुरुमुमया युक्तम् ॥
(उत्कृतिभेदेषु १०३८८६०१ तमोऽयं भेदः ।)

दिरगणैरारामसङ्ग्राम-सुराम-वैकुण्ठ-सोत्कण्ठ-सार-कासार-विस्तार-संहार-नीहार-मन्दार-केदार-साधार-सत्कार-संस्कार-माकन्द-गोविन्द-सानन्द-सन्दोह-नन्देत्येवमादिनामका एकैकरगणवृद्ध्या नद्र-योत्तरैकत्रिंशदधिकशतत्रयरगणघटितैकोनसहस्राक्षरपादपर्यन्तं कविप्रयोगानुसारेण दण्डका ज्ञेयाः । यदाहुः—

एकोनसहस्राक्षरपर्यन्ता दण्डकाङ्घ्रयः प्रोक्ताः ।
वर्णत्रिकगणवृद्ध्या नद्रितयाद्या महामतिभिः ॥ इति ।

तथा च रगणघटितदण्डकाः पञ्चविंशत्यधिकशतत्रय(३२५) सङ्ख्याका भवन्ति । एवं यगणादिघटितदण्डका अपि । तत्र रीतिप्रदर्शनायोदाहरणं ममैव यथा—

त्रिभुवनसुखहेतवे धातृमुख्यामरप्रार्थनासार्थनादर्थिचिन्तामणे !
दशरथकृतयागसौभाग्यतस्तत्तनूजन्मतास्थापितश्रौतमार्गार्गल ! ॥
मुनिवनगतताटकाकण्टकीमूलकुद्दालितस्वीयबाणावले ! राघव !
कुशिकयजनसिद्धये व्योम कृत्वा शरैश्चण्डवृष्टिप्रपातोऽसि हन्तुं रिपून॥
एवमर्णादिष्वप्युदाहार्यम् ॥ ११३ ॥

प्रचितकसमभिधो धीरधीभिः स्मृतो
दण्डको नद्र्यादुत्तरैः सप्तभिर्यैः ॥ ११४ ॥

नगणद्र्यादुत्तरभाविभिः सप्तभिर्यगणैर्धीरबुद्धिभिः कविभिः प्रचितकसंज्ञको दण्डक उक्तः । प्रचितक इति समभिधा नाम यस्येति विग्रहः । अत्रापि पूर्ववदेकैकयगणवृद्ध्या दण्डकाः कार्याः । यैरित्युपलक्षणम् । अष्टभिरपि गणैः कविप्रयोगानुरोधाद्भोगावलीविरुदावल्यादिषु दण्डकानामिष्टत्वात् । यद्यपि "शेषः प्रचितः" (पिं०सू०७-३६) इति सूत्रं वृत्तिकृता रेफाष्टकादिरचितदण्डकपरं शेषशब्दमङ्गीकृत्य रगणघटितानामेव चण्डवृष्टिप्रपातोर्ध्वभाविनां 'प्रचित' इति सामान्यसंज्ञाभिधानार्थतया व्याख्यातम् । अत एव चाह सः—

प्रथमकथितदण्डकश्चण्डवृष्टिप्रपाताभिधानो मुनेः पिङ्गलाचार्यनाम्नो मतः,
प्रचित इति ततः परं दण्डकानामियं जातिरेकैकरेफाभिवृद्ध्या यथेष्टं भवेत्॥
स्वरुचिरचितसंज्ञया तद्विशेषैरशेषैः पुनः काममन्येऽपि कुर्वन्तु वागीश्वराः,
भवति यदि समानसङ्ख्यात्तरैस्तत्र पादव्यवस्था ततो दण्डकः पूज्यतेऽसौ जनैः ॥ इति ।

तथापि यगणादिदण्डकानामपि कविप्रयुक्तत्वादुक्तरगणरचितदण्डकव्यतिरिक्तयादिकृतदण्डकानामेव शेषशब्दोद्दिष्टानां प्रचितकसंज्ञा

ज्ञापनार्थतां सूत्रस्याभिप्रेत्य व्याख्यात्रन्तरकृतव्याख्यामनुसरतैवमवादि केदारेणेत्यदोषः । सर्वेषु दण्डकेषु पादान्ते यतिः । श्रुतिसौकर्येण अन्येऽपि दण्डका अन्यैरुक्ताः ।

यथा—

नयुगलगुरुयुगावेवं प्रकाराः कवीच्छानुरोधात्तदा यत्र
वक्ष्यन्त एषोऽपरो दण्डकः पण्डितैरीरितः सिंहविक्रान्तनामा ॥
यत्र रेफान्कविः स्वेच्छया पाठसौभाग्यसापेक्षया—
रोपयत्येष धीरैः स्मृतो दण्डको मत्तमातङ्गलीलाकरः ॥
लघुर्गुरुः क्रमेण यत्र बध्यते सुधीभिरिच्छया
स दण्डकस्त्वनङ्गशेखरः स्मृतः ॥
स्वेच्छया रजौ क्रमेण संनिवेशयत्युदारधीः
कविः स दण्डकः स्मृतो जगत्यशोकमञ्जरी ॥
सगणः सकलः खलु यत्र भवेत्तमिह
प्रवदन्ति बुधाः कुसुमस्तबकम् ॥
यकारैः कवीच्छानुरोधान्निबद्धैः प्रसिद्धो
विशुद्धोऽपरो दण्डकः सिंहविक्रान्तनामा ॥

एवं मेघमालाकुसुमस्तरणोत्तरकामबाणादयो दण्डकाः षड्विंशत्यक्षराधिकाक्षरपादाः कविप्रबन्धानुसारेण ज्ञेयाः । षड्विंशत्यक्षरन्यूनतायां तु पूर्वोक्तासु जातिष्वेवान्तर्भावो यथायोगं भवति ॥ ११४ ॥

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितायां
वृत्तरत्नाकरटीकायां समवृत्ताध्यायस्तृतीयः ॥

चतुर्थोऽध्यायः ।

एवं समवृत्तान्यभिधायाऽधुना अर्धसमान्याह—

विषमे यदि सौ सलगा दले
भौ युजि भाद्द गुरुकावुपचित्रम् ॥ १ ॥(१)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

स. स. स. ल. गु.
मुरव—रवपु—स्तनुतां मु—दं
।।ऽ, ।।ऽ, ।।ऽ, ।, ।.

विषमे दले प्रथमे तृतीये च पादे सौ सगणद्वयं सलगाश्च सगण-लघुगुरवः, युजि समे द्वितीये चतुर्थे च पादे भौ भगणौ पुनर्भगण-स्ततो द्वौ गुरू तदोपचित्रं नाम। अर्धसमत्वाद् द्वितीयार्धमप्येवमेवोदा-हार्यम्। एवमग्रेऽपि ॥ १ ॥

भत्रयमोजगतं गुरुणी चे-

द्युजि च नजौ ज्ययुतौ द्रुतमध्या ॥ २ ॥(१)

ओजगतं विषमपादगतं भगणत्रयं गुरुणी चेद् द्वे अक्षरे, युजि समपादे ज-य-गणपरौ न-गणज-गणौ चेत्सा द्रुतमध्या नाम। उपचित्रा-ऽऽपातलिकाऽपरान्तिकयम्। अत्रापरान्तिकासंनिवेशो भ्रान्तः ॥ २ ॥

सयुगात्सगुरू विषमे चे-

द्भाविह वेगवती युजि भाद्यौ ॥ ३ ॥(२)

विषमे पादे सत्रयं गुरुश्च, युजि समे पादे भगणत्रयं गुरू च, इह

भ. भ. भ. गु. गु.

हेमनि—भांशुक—चन्दन—लि प्तम् ॥
ऽ । । , ऽ । । , ऽ । । , ऽ , ऽ .
गगनं चपलामिलितं यथा
शारदनीरधरैरुपचित्रम् ॥

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ

भ. भ. भ. ग.ग.

व्यपि शीघ्रग—तिर्मृदु-गा मी
। । , ऽ । । , ऽ । । , ऽ , ऽ .

न. ज. ज. ज.

वहुध—नवान—ाप दुःख-मुपैति ॥
। । । , । ऽ । , । ऽ । , । ऽ ।,
नातिशयाचरिता न च मृद्वी
नृपतिगतिः कथिता द्रुतमध्या ॥

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

स. स. स. गु.

स्मरवे—गवती—व्रजरा—मा
। । ऽ. । । ऽ , । । ऽ , ऽ.

छन्दःशास्त्रे वेगवती नाम, आपातलिकैवेयम् ॥ ३ ॥

ओजे तपौ जरौ गुरुश्चे-
न्म्सौ जगौग्भद्रविराड् भवेदनोजे ॥ ४ ॥(१)

ओजे विषमे पादे तगणान्परौ जगणरगणौ गुरुश्च, अनोजेऽविषमे समे म-स-ज-गगुरवश्च भद्रविराड् भवेत् । औपच्छन्दसिकस्यैवेयं गण-निवेशविशेषे संज्ञा ॥ ४ ॥

असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद् गः ॥ ५ ॥(२)

भ.	भ.	भ.	गु.	गु.
केशव—वंशर—वैरति—मु—ग्धा				
ऽ । । ,	ऽ । । ,	ऽ । । ,	ऽ ,	ऽ .

रभसान्न गुरुन्गणयन्ती
केलिनिकुञ्जगृहाय जगाम ॥

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

त.	ज.	र.	गु.
यत्पाद—तले च—कास्ति च—क्रं			
ऽ ऽ । ,	। ऽ । ,	ऽ । ऽ ,	ऽ , ऽ

म.	स.	ज.	गु.गु.
हस्ते वा कुलिशं सरोरु हं वा ॥			
ऽ ऽ ऽ ,	। । ऽ ,	। ऽ । ,	ऽ , ऽ

राजा जगदेकचक्रवर्त्ती
स्याच्छं भद्रविराट् समश्नुतेऽसौ ॥

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स.	ज.	स.	गु.
हतभू—रिभूमि—पातचि—ह्नां			
। । ऽ ,	। ऽ । ,	। । ऽ ,	ऽ

भ.	र.	न.	गु.	गु.
युद्धस—हस्रल—ब्धजय—ल—क्ष्मीम् ॥				
ऽ । । ,	ऽ । ऽ ,	। । । ,	ऽ ,	ऽ .

सहते न कोऽपि वसुधायां
केतुमतीं नरेन्द्र ! तव सेनाम् ॥

विषमे दले पादे सजसा गणा गुरुश्च, समे भरना गणा गुरू च केतुमती नाम । भरनगादिति समाहारैकवचनम् ॥ ५ ॥

आख्यानकी तौ जगुरू ग ओजे
जतावनोजे जगुरू गुरुश्चेत् ॥ ६ ॥(१)

तौ तगणौ जगणगुरू गुरुश्चौजे विषमे पादे, अनोजे समे पादे ज-त-ज-गगुरवस्तदाख्यानकी नाम ॥ ६ ॥

जतौ जगौ गो विषमे समे चे-
त्तौ जगौ ग एषा विपरीतपूर्वा ॥ ७ ॥(२)

विषमे ज-त-ज-गगुरवः, समे त-त-ज-गगुरवस्तदैषा आख्यानकी विपरीतशब्दपूर्वा । विपरीताख्यानकीत्यर्थः । अनयोरुपजात्यन्तर्भावेऽपि विशेषसंज्ञाविधानार्थमर्धसमाध्याये पाठः ॥ ७ ॥

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

त. त. ज. गु.गु.
भृङ्गाव—लीमङ्ग—लगीत—ना—द
ऽ ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ, ऽ.

ज. त. ज. ग.गु.
र्जनस्य—चित्ते मु-दमाद -धा -ति ॥
। ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ, ऽ.

आख्यानकी च स्मरजन्मपाश
महोत्सवस्याश्रवणे क्वणन्ती ॥

(२) उदाहरणान्तरं यथा तत्रैव—

ज. त. ज. गु.गु.
अलं त -वालीक-वचोभि-रे-भिः
। ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ, ऽ.

त. त. ज. गु. गु.
स्वार्थं प्रि-ये! साध-यकार्य-म-न्यत्॥
ऽ ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ, ऽ

कथं कथावर्णनकौतुकं स्या-
दाख्यानकी चेद्विपरीतवृत्तिः ॥

सयुगात्सलघू विषमे गुरु-
र्युजि नभौ भरकौ हरिणप्लुता ॥ ८ ॥(१)

सगणद्वयात्सगणलघू गुरुश्च विषमपादे, युजि समे पादे न-भ-भ-र-गणा हरिणप्लुता नाम ॥ ८ ॥

अयुजि ननरला गुरुः समे-
न्जमपरवक्त्रमिदं ततो जरौ ॥ ९ ॥(२)

विषमे न-न-र-लगुरवः, समे न-ज-ज-र-ा अपरववत्रं नाम । अस्य वैतालीयान्तर्गतत्वेऽपि संज्ञान्तरविधानार्थमत्रोक्तिः ॥ ९ ॥

अयुजिनयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ १० ॥(३)

(१) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

स.	स.	स.	ल.गु.
स्फुटफे—नचया—हरिण—प्लु—ता			
।।ऽ,	।।ऽ,	।।ऽ,	।, ऽ.
न.	भ.	भ.	र.
वलिम—नोज्ञत—टा तर—णैः सुता ॥			
।।।,	ऽ।।,	ऽ।।,	ऽ।ऽ.

कलहंसकुलारवशालिनी
विहरतो हरति स्म हरेर्मनः ॥

(२) उदाहरणान्तरं यथा छन्दोमञ्जर्याम्—

न.	न.	र.	ल.	गु.
स्फुटसु—मधुर—वेणुगी—ति-भि-				
।।।,	।।।,	ऽ।ऽ,	।,	ऽ
न.	ज.	ज.	र.	
स्तमप—रवक्त्र—मवेत्य—माधवम् ॥				
।।।,	।ऽ।,	।ऽ।,	ऽ।ऽ.	

मृगयुवतिगणैः समं स्थिता
व्रजवनिता धृतचित्तविभ्रमाः ॥

(३) उदाहरणान्तरं यथा अघ्राङ्गहृदये—

विषमे नयुगरेफयकाराः, युजि समे न-ज-ज-र-गुरुवस्तदा पुष्पिताग्रा नाम । इयमप्यौपच्छन्दसिकान्तर्भूतैव विशेषसंज्ञार्थमिहोक्ता ॥ १० ॥

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः ।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा ॥ ११ ॥

विपश्चितः=पण्डिता अपरवक्त्राख्यं वैतालीयमेवेदं वदन्ति । पुष्पिताग्राभिधं छन्द औपछन्दसिकमेव केचिदाहुः । इदं स्वस्यापि सम्मतम् । भावस्तूक्त एव ॥ ११ ॥

स्यादयुग्मकेरजौ रयौ समे चे
ज्जरौ जरौ गुरुर्यवात्परा मतीयम् ॥ १२ ॥(१)

विषमपादे र-ज-र-याः, समे ज-र-ज-र-गाः, यवाद्यवशब्दात्परा मती । यवमतीत्यर्थः ।

तथा-

सौ लगौ विषमे यदि, सजजा गुरुर्ललिता समे ॥

न. न. र. य.
मधुमु—खमिव सोत्पलं प्रियायाः
। । ।, । । ।, ऽ । ऽ, । ऽ ऽ
न. ज. ज. र. गु.
कलर—णना प-रिवादि-नी प्रिये व॥
। । ।, । ऽ ।, । ऽ । ऽ । ऽ, ऽ
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥

(१) उदाहरणान्तरं यथा मम--

र. ज. र. य.
कामको टि पीठ-वासिनी मदीये
ऽ । ऽ, । ऽ ।, ऽ । ऽ, । ऽ ऽ
ज. र. ज. र. गु.
हृदम्बु—जेऽम्बुज-क्षणा चि-रं वस-न्ती ॥
। ऽ ।, ऽ । ऽ, । ऽ ।, ऽ । ऽ, ऽ
दुःखजालमाशु मूलतो निहत्य
स्वकीयपादपङ्कजे रतिं ददातु ॥

ओजे तपरौ भरौ जरौ गुरू समे जौ यौ,
कीर्तिता बुधैरियं तु षट्पदाख्या ॥
रो जरौ जसंयुतौ पदे पदेऽथ युग्मे तरौ जरौ गुरुर्मृगी यवानी ॥
अयुजि ननभाः समकेऽपि तु, नयुगरयुगलं तदा कौमुदी ॥
यदि विषमे भवतो नजौ जरौ, सजयाः समे जगुरू मञ्जुसौरभम् ॥

तथाऽष्टाविंशतिर्लघव एको गुरुरिति विषमः पादः, त्रिंशल्लघव एको गुरुश्चेति समः सा शिखा नाम। इयमेव विपर्यस्तपादा खञ्जा नाम। एते द्वे अपि द्विखण्डकप्रकरणोक्तशिखाखञ्जयोश्छन्दसोः षष्ट्यक्षरतामङ्गीकृत्य यथाश्रुतव्याख्यानेन तदतिरिक्ते अत्र ज्ञेये। यदा त्वस्मदुक्तप्रकारेण तत्र शकलशब्दं पादपरमाश्रित्य व्याख्यायते तदा तत्रैवैतयोरुक्तत्वान्नात्र वक्तव्यता भवति ॥ १२ ॥(१)

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितायां
वृत्तरत्नाकरव्याख्यायामर्धसमाध्यायश्चतुर्थः ॥

---

(१) अत्राऽध्याये यानि जातिद्वयसङ्करेणोत्पन्नानां वृत्तानां लक्षणानि प्रतिपादितानि तेष्वर्धसमत्वमेव। यत्र तु पुनर्जातिद्वयसङ्करो नास्ति तेषूपजातित्वम्। अत्रोक्तिस्तु अर्धसमवृत्तलक्षणकथनप्रसङ्गे अर्धसमसादृश्यहेतुना। यद्युच्येत 'उपजातीनामर्धसमवृत्तेष्वन्तर्भावात् वृत्तानामर्धसमत्वभेदस्वीकारेणैव कार्यनिर्वाहे, उपजातिषु वाऽर्धसमवृत्तानामन्तर्भावात् कार्यनिर्वाहे सति किमर्धसमत्वोपजातित्वस्तुद्वयस्वीकारेणेति। तत्रोच्यते। अयि छन्दःशास्त्रविदः! इदं हि पांशुपूरणं युष्माभिः स्थूलदृशां चक्षुष्षु विधातुं शक्यं न सूक्ष्मदृशाम्। यद्भवद्भिरुच्यते 'उपजातीनामर्धसमवृत्तेष्वन्तर्भावाद् वृत्तानामर्धसमत्वभेदस्वीकारेणैव कार्यनिर्वाहे'इति तदसत्, उपजातीनामर्धसमवृत्तेष्वनन्तर्भावात्। अर्धसमभेदस्वीकारेऽपि कार्याऽनिर्वाहात्। यद्यपि यत्रोपजातिषु पादद्वयमेकलक्षणलक्षितम्। अपरपादद्वयं च भिन्नैकलक्षणघटितं तासामुपजातीनामर्धसाम्यादर्धसमवृत्तेष्वन्तर्भावः सम्भवति। तथाऽपि यत्र चरणत्रयस्यैकं लक्षणं एकचरणस्य च भिन्नं लक्षणं तत्रार्धसाम्याभावात् नार्धसमत्वं वक्तुं शक्यते। सर्वेषां चरणानां भिन्नलक्षणलक्षितत्वाऽभावेन विषमत्वमपि न। चरणचतुष्टयस्यैकलक्षणलक्षितत्वाऽभावेन च युष्मन्मते समवृत्तत्वमपि नास्ति, तदेवं तत्र कयापि रीत्या भवतां पलायितुमशक्यतया उपजातिः शरणीकरणीयैव। तत्स्वीकारे च उपजातिलक्ष-

पञ्चमोऽध्यायः ।

अर्धसमान्यत्राभिधायोद्देशक्रममनुसृत्य विषमवृत्तानि लक्षयति—

मुखपादोऽष्टभिर्वर्णैः
परे स्युर्मकरालयैः क्रमाद्रुद्रैः ॥
सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यं
तदुदितममलमतिभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १ ॥

यस्य वृत्तस्य मुखपाद आद्यपादो वर्णाष्टकेन, परे द्वितीयाः पादा मकरालयैः समुद्रैश्चतुर्भिरक्षरैः क्रमाद्रुद्रैः सततं नैरन्तर्येण स्युस्तद् वृत्तं निर्मलबुद्धिभिः पिङ्गलादिभिः पदचतुरूर्ध्वाभिधमुदितमुक्तम् । किंविशिष्टं तत् । विचित्रैर्विलक्षणैः पादैर्जातं सौन्दर्यं यस्य तत् तादृशम् । अत्र वर्णैरिति सम्पन्नसौन्दर्यमिति च वदता गुरुलघुनिवेशनियमो नास्ति । किं तु श्रोतृश्रोत्रसौभाग्यार्थं वर्णवैचित्र्यं विधेयमिति सूचितम् । प्रथमपादोऽष्टाक्षरः, द्वितयो द्वादशाक्षरः, तृतीयः षोडशाक्षरः, चतुर्थो विंशत्यक्षरः कार्य इति फलितोऽर्थः । अत्र चैकद्वित्रिचतुरङ्कानां परस्परताडनया पादानां परस्परसङ्करे शङ्खचक्रगदापद्मानां परस्परसङ्करे केशवाद्या इव चतुर्विंशतिभेदा भवन्ति । तत्प्रस्तारतो यथा—

८	८	८	८	८	८	१२	१२	१२	१२	१२	१२	१६	१६	१६	१६	१६	१६	२०	२०	२०	२०	२०	२०
१२	१६	२०	१२	१६	२०	८	१६	२०	८	१६	२०	१२	८	२०	१२	८	२०	१२	८	१२	१६	१६	८
१६	१२	१६	२०	२०	१२	१६	८	१६	२०	२०	८	८	१२	८	२०	२०	१२	१६	१६	८	८	१२	१२
२०	२०	१२	१६	१२	१६	२०	२०	८	१६	८	१६	२०	२०	१२	८	१२	८	८	१२	१६	१२	८	१६
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४

णाक्रान्तेष्वेव केषुचिदर्धसमत्वं केषुचिच्चोपजातित्वमित्यर्धजरतीयत्वस्यानौचित्यात्, यत्रोपजातित्वं तत्रोपजातित्वमेव मन्तव्यमित्युचितम् । यच्चोच्यते "उपजातिषु वार्धसमत्वस्यान्तर्भावादुपजातिस्वीकारेणैव कार्यनिर्वाहे" इति तदप्यलीकमेव । जातिद्वयसम्मेलनसम्भूतेषु वृत्तेषु उपजातित्वस्य वक्तुमशक्यत्वात् । सुनिरूपितमेवेदं (पृ० ७२) पूर्वं टिप्पणयामिति नाऽत्र पुनर्निरूप्यते । अत एव पिङ्गलाचार्यैः "आद्यन्तावुपजातयः" (पिं० सू० ६-१८) इति "वृत्तम्" (पिं० सू० ५-१) इत्युपक्रमे "सममर्धसमं विषमं च" (पिं० सू० ५-२) इति च सूत्रितम् । यदि नाम परस्परस्य परस्परेऽन्तर्भावादेव कार्यनिर्वाहः समभविष्यत् तदा कथमेतत् सूत्रद्वयं समगंस्यत । तस्मान्मदुक्तमेव ज्यायः इत्यलं पल्लवितेन । विस्तरस्तु यथावसरं प्रकाशयिष्यते ।

अत्रैकैकपङ्क्तिस्थितकोष्ठकचतुष्टयस्थिताङ्कसमानाक्षरक्रमिकपादरचैकैको भेदो ज्ञेयः। तत्र प्रथमभेदे मूलस्थितमुदाहरणम्। द्वितीये तु ममैव यथा—

लोभं लम्भय विलयं (८)
लाभालाभावुभौ भावय समानौ भव धीरः (१६) ॥
यत्नाद् गुरुजनगौरवमाचर (१२)
यदि तवास्मिन्नमुष्मिंश्च लोके यशो विशालमाशास्यं स्यात् (२०) ॥

इदमेवोदाहरणं पादव्यत्ययेनेतरेषु द्वाविंशतिभेदेषु योज्यम् ॥ १ ॥

एतस्यैव प्रतिपादमन्ते गुरुद्वयनियमे संज्ञान्तरमाह—

प्रथममुदितवृत्ते
विरचितविषमचरणभाजि ॥
गुरुकयुगलनिधन इह सहित आङा
लघुविरचितपदवितितियातिरिति भवति पीडः ॥ २ ॥(१)

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

८ अक्ष.

गु. गु.

कुसुमितसहकारे
ऽ ऽ
१२ अक्ष.

गु. गु.

हतहिममहिमशुचिशशाङ्के
ऽ ऽ
१६ अक्ष.

गु. गु.

विकसितकमलसरसि मधुसमयेऽस्मिन्
ऽ ऽ
२० अक्ष.

गु. गु.

प्रवससि पथिकहतक ! यदि भवति तव विपात्तः ॥
ऽ ऽ।

विरचितान्विषमान्विषमसङ्ख्याकाक्षरांश्चरणान्भजति, एवंभूते प्रथमोक्ते पद्चतुरूर्ध्वाभिधे वृत्ते इति सर्वोऽनुवादः, गुरुयुग्मं निधनेऽन्ते यस्य तादृशे सति । स्वार्थे कः । इतीत्थं प्रकार आङा उपसर्गेण सहितः पीडः आपीडो भवतीत्यर्थः । कीदृक् । लघुकृतपदरचनया यतिर्यस्मिन्, अन्ते गुरुद्वयस्य नियतत्वादितरभागे लघुविरचितत्वम् । श्रुतिसुखकरी च स्वेच्छया यतिः कार्येति सूचनाय यतिग्रहणम् । विशिष्टानुवादश्चाष्टाद्यक्षरेष्वेव पादेष्वन्ते गुरुद्वयं कार्यम्, न तु ततोऽतिरिक्तमिति सूचनार्थः । आपीड इति संज्ञायाश्छन्दस्यप्रवेशादाङा सहित इत्युक्तिरीतिः । पूर्वोक्तरीत्यापीडे चतुर्विंशतिप्रकारप्रथमभेदोदाहरणमिदम् । आपीड एव सप्तभाष्टमैकादशान्भेदान्व्युत्पाद्यव्युत्पादनाय व्युत्पादयति प्रथमेति त्रिभिः ॥ २ ॥

प्रथममितरचरणसमुत्थं
श्रयति स यदि लक्ष्म ॥
इरतदितरगदितमपि यदि च तुर्यं
चरणयुगलकमविकृतमपरमिति कलिका सा ॥ ३ ॥

तुर्यशब्देन श्लोकचतुर्थांशः पाद उच्यते । ततश्च प्रथमं तुर्यं प्रथमश्चरणः इतरचरणसमुत्थं स्वाऽनन्तरद्वितीयचरणस्थं लक्ष्म लक्षणं श्रयति, अवलम्बते इतरत्तुर्यं द्वितीयपादे इतरगदितं स्वाऽव्यवहितप्रथमचरणगतं लक्षणं श्रयति, अपरं चरणद्वयं तृतीयचतुर्थरूपमविकृतं यथावस्थितमित्येवंविधा स आपीड एव सा प्रसिद्धा कलिका । यद्वा स आपीडः प्रथमं प्रथमस्थाने प्रथमपादे द्वितीयपादलक्षणं श्रयति सा कलिका । द्वादशाक्षराष्टाक्षरषोडशाक्षरविंशत्यक्षरैः पादैः क्रमेण घटितेति सम्पिण्डितार्थः । पैङ्गले त्वेतस्यो मञ्जरीति नाम ॥ ३ ॥

द्विगुरुयुतसकलचरणान्ता
मुखचरणगतमनुभवति च तृतीयः ॥
अपरमिह हि लक्ष्म
प्रकृतमखिलमपि यदिदमनुभवति लवली सा ॥ ४ ॥

तृतीयश्चरणो मुखचरणगतं प्रथमचरणस्थं लक्षणमनुभवत्यवलम्बते । अपरं पादत्रयं प्रकृतमखिलं लक्ष्म आपीडलक्षणं श्रयति तदा लवली नाम । क्रमेण द्वादशाक्षरषोडशाक्षरविंशत्यक्षरपादवतीत्यर्थः । गुरुद्वययुक्तचतुष्टयान्तेति वृत्तपूरणार्थं सामान्यलक्षणमेवानूदितम् ॥ ५ ॥

प्रथममधिवसति यदि तुर्यं, चरमचरणपदमवसितगुरुयुग्मम् ॥
निखिलमपरमुपरिगतमिति ललितपदयुक्ता, तादिदममृतधारा ॥ ५ ॥

प्रथमं तुर्यं प्रथमश्चरणश्चरमचरणपदं चतुर्थचरणस्थानं प्राप्नोति । चतुर्थो भवतीत्यर्थः । अ ररनिखिलं प्रथमादिचरणत्रयमापीडप्रथमपादोपरिगतद्वितीयादिपादसमं तदिदं छन्दोऽमृतधारा नाम । अवसितौ गुरुद्वययुक्तमिति इदमित्यस्य विशेषणं सत्पूर्ववत्स्वरूपकीर्तनार्थम् । ललितपदयुक्तेति वृत्तपूरणाय स्वरूपोक्तिः । द्वादशषोडशविंशत्यष्टाक्षरपादक्रमवती भवतीति सङ्गलितार्थः । यद्यपि वृत्तिकारेण प्रथमस्य तृतीयत्वे तृतीयस्य च प्रथमत्वे लवली, प्रथमस्य चतुर्थत्वे चतुर्थस्य च प्रथमत्वेऽमृतधारेति षोडशद्वादशाष्टाविंशत्यक्षरपादक्रमेण विंशतिद्वादशषोडशाष्टाक्षरपादक्रमेण च त्रयोदशैकोनविंशतिभेदयोरेते संज्ञे इति मञ्जर्यां विशेषाऽभावेऽपि उत्तरयोर्विशेष उक्तः, उदाहरणे च तथैव कृते, तथापि "प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधाराः" (पिं० सू० ५-२४) इति सूत्रस्य साधारणत्वात्प्रथमपादमात्रविपर्यासोक्तेरितरेषां क्रमाऽभ्यनुज्ञया वा सूत्रस्य मूलकारोक्त एवार्थे तात्पर्यादेवमुक्तम् । आपीडवत्पदचतुरूर्ध्वेऽपि पादव्यत्यासे मञ्जर्याद्या भेदा ज्ञेयाः । तथा आदावेव सकलपादेषु गुरुद्वययुतं पदचतुरूर्ध्वं प्रत्यापीडः । यथा वृत्तौ—

चित्तं मम रमयति
कान्तं वनमिदमुपगिरिणदि ॥
कूजन्मधुकरकलरवकृतजनधृति,
पुंस्कोकिलमुखरितसुरभिकुसुमचिततरुतति ॥

आदावन्ते च गुरुद्वयसहितं तदेवोभयापीडः । पैङ्गले त्वयमपि प्रत्यापीड एव यथा तत्रैव—

कान्तावदनसरोजं
हृद्यं घनसुरभिमधुरसाढ्यम् ॥
पातुं रहसि सततमभिलषति मनो मे
किंचिन्मुकुलितनयनमविरतभणितरमणीयम् ॥

अनयोः पूर्वोक्तविधया चतुर्विंशतित्वमूह्यम् । उदाहरणानि त्वतिविस्तरभयान्नोदाहृतानि स्वयमूह्यानि ॥ ५ ॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां
पदचतुरूर्ध्वप्रकरणम् ॥

विषमवृत्तान्तराण्याह—

सजसादिमे सलघुकौ च
नसजगुरुकैरथोद्गता ॥
त्र्यङ्घ्रिगतभनजला गयुताः
सजसा जगौ चरणमेकतः पठेत्(१) ॥ ६ ॥

पाद इति शेषः । आदिमे पादे स-ज-स-लघवः । अथाऽनन्तरम्, द्वितीयपादे इत्यर्थः।न-स-ज-गुरुषु सत्सु तृतीयेऽङ्घ्रौ पादे ये भ-न ज-लघवस्ते गयुता गुरुयुक्ताः कार्या इत्यर्थः । परिशेषाच्चतुर्थे स-ज-सा गणा ज-गुरू च चरणम्। एकवचननिर्देशात्प्रथममेकं चरणमेकत एकीकृत्य द्वितीयेनेत्यर्थात्पठेत् । प्रथमद्वितीयौ पादावविलम्बेन पठेत् । अत्यन्तयतिं न कुर्यादित्यर्थः । सजसमिति द्वन्द्वैकवद्भावः । स्वार्थे कौ । त्रयाणां पूरणेऽङ्घ्रौ गता ये भ-न ज-लास्ते गयुक्ताः कार्या इति । मध्यमपूरणपदलोपिसमासाश्रयणेन उद्देशविधानाद्वासर्वविधानाच्च तीयप्रत्ययोत्पत्तिरसामर्थ्यं च न भवतीति ज्ञेयम् । एकत इत्येकशब्दो भावप्रधानस्तृतीयार्थे च तसिः । तथा चैक्येनेत्यर्थः । ल्यब्लोपे पञ्चमी वा । प्रथमं द्वितीयेनैकं विधाय पठेदित्यर्थः ॥ ६ ॥

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स. ज. स. ल.
मृगलो—चना श शिमुखी च
। । ऽ, । ऽ । , । । ऽ, ।

न. स. ज. गु.
रुचिर—-दशना--नितम्बि-नी ॥
। । । , । । ऽ, । ऽ । , ऽ.

भ. न. ज. ल.गु.
हंसल— -लितग--मना ल-ल-ना
ऽ । । , । । । , । ऽ । , । , ऽ

स. ज. स. ज. ग.
परिणी—-यने य-दिभवे- -त्कुलोद्व-ता ॥
। । ऽ, । ऽ । , । । ऽ, । ऽ । , ऽ.

चरणत्रयं व्रजति लक्ष्म
यदि सकलमुद्गतागतम् ॥
नौ भगौ भवति सौरभकं
चरणे यदीह भवतस्तृतीयके ॥ ७ ॥ (१)

स्वार्थे कः । तृतीये चरणे नौ र-गणन-गणौ भ-गुरू च भवतः । चरण-त्रयपरिशेषात्प्रथमद्वितीयचतुर्थरूपं उद्गतास्थितं समग्रं लक्षणं भजति, तदेह शास्त्रे सौरभकं भवतीति व्यवहितान्वयाऽध्याहाराभ्यामर्थः ॥ ७ ॥

नयुगं सकारयुगलं च
भवति चरणे तृतीयके ॥
तदुदितमुरुमतिभिर्ललितं
यदि शेषमस्य खलु पूर्वतुल्यकम् ॥(२)

तृतीयपादे न-न-स-साः, शेषं तृतीयान्यच्चरणत्रयं पूर्वोक्तोद्गतावत्तदा

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स.	ज.	स.	ल.
विनिवा-	रितोऽपि-	नयने-	न
।।ऽ,	।ऽ।,	।।ऽ,	।

न.	स.	ज.	गु.
तदपि	किमिहा-	गतो भ-	-वान् ॥
।।।,	।।ऽ,	।ऽ।,	ऽ

र.	न.	भ.	गु.
एतदे-	-व तव	सौरभ-	कं
ऽ।ऽ,	।।।,	ऽ।।,	ऽ

स.	ज.	स.	च.	गु.
यदुदी-	-रितार्थ-	-मपिना-	ववुध्य-	-से ॥
।।ऽ,	।ऽ।,	।।ऽ,	।ऽ।,	ऽ,

(२) उदाहरणान्तरं यथा छन्दोवृत्तौ—

स.	ज.	स.	ल.
सततं-	-प्रियं व	-दमनू-	न-
।।ऽ,	।ऽ।,	।।ऽ,	।

बहुदर्शिभिर्ललितं नामोक्तम्। मतेर्विषयबाहुल्येनोरुता न तु स्वतः। अन्यथा स्थूलबुद्धित्वोक्त्या निन्दैव स्यात्। स्वार्थे कौ। तथोद्भतायाः प्रथमतृतीयपादव्यत्यये मन्थरा नाम। उदाहरणमूह्यमेव ॥ ८ ॥

इति वृत्तरत्नाकरटीकायामुद्भताप्रकरणम् ॥

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्य-
त्रितयं सनजरगास्ततो ननौ सः ॥
त्रिनपरिकलितजयौ
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ ९ ॥(१)

न. स. ज. गु.
मम्ल---हृदयं--गुणोत्त---रम् ॥
।।।, ।।ऽ, ।ऽ।, ऽ
न. न. स. स.
सुल्लि--तमति---कमनी--यतमं
।।।, ।।।, ।।ऽ, ।।ऽ,
स. ज. स. न. गु.
पुरुषं त्यजन्ति न तु जा-तुयोपि-तः ॥
।।ऽ, ।ऽ।, ।।ऽ, ।ऽ।, ऽ,

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. स. ज. भ. गु.गु.
रामा का-मकरे--णुका मृ-गायत--ने-त्रा
ऽऽऽ, ।।ऽ, ।ऽ।, ऽ।।, ऽ ऽ
स. न. ज. र. गु.
हृदयं हरति पयोध--रावन-म्रा ॥
।।ऽ, ।।।, ।ऽ।, ऽ।ऽ, ऽ,
न. न. स.
इयम--तिशय--सुभगा
।।।, ।।।, ।।ऽ,
न. न. न. ज. य.
बहुवि---धनिधु--वन कु--शला ल-लिताङ्गी ॥
।।।, ।।।, ।।।, ।ऽ।, ।ऽऽ,

म-स-ज-भ-गगुरवः प्रथमपादः । स चैकः पृथक्पठनीयः, न तृद्वतादिवद् द्वितीयेनैकीकृत्येत्यर्थः । प्रथमार्थे तसिः । अन्यच्चरणत्रयं कथ्यत इति शेषः । स-न-ज-र-गुरुभिर्द्वितीयः पादस्तदनन्तरं तृतीयपादे न-नौ स-गणश्च । त्रिभिर्नगणैः परिकलितौ सहितौ ज-यौ गणौ चतुर्थे पादे । इदं छन्द उपस्थितपदपूर्वं प्रचुपितम् । उपस्थितप्रचुपितमित्यर्थः । अन्यस्तु प्रथमोऽङ्घ्रिरेकः केवलः पठनीयः । अन्यत्तु चरणत्रयं पृथक्कथनाद्भिन्नत्वेनैकीकृत्य पठनीयम् । न तु तत्प्रतिचरणान्तं विरामः कार्यः, ततः "ऋाकार्धे तु विशेषतः" इत्यस्यापवादोऽयमिति व्याचख्यौ ॥ ६ ॥

नौ पादेऽथ तृतीयके सनौ नसयुक्तौ
प्रथमाङ्घ्रिकृतयतिस्तु वर्धमानम् ॥
त्रितयमपरमपि पूर्वसदृशमिह भवति
प्रततमतिभिरिति गदितं लघु वृत्तम् ॥१०॥(१)

तृतीयपादे नौ नगणौ, अथ ततः स-नौ सगणनगणौ नसगणाभ्यां युक्तौ एवं षड् गणा भवन्ति । अपरं पादत्रयं प्रथमद्वितीयचतुर्थरूपमुपस्थितप्रचुपिततुल्यमेव भवति । इत्यमुना प्रकारेण प्रसिद्धधीभिर्लघु सुन्दरं वर्धमानं नाम वृत्तमुदितमुक्तम् । प्रथमाङ्घ्रौ कृतया यत्या प्रस्तूयते प्रशस्यते प्रशस्ततया पठ्यते तत्तादृगिति वर्धमानविशेषणम् । तुगभावस्तु "आग-

---

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ —

म.	स.	ज.	भ.	गु.गु.
बिम्बोष्ठी–कठिनो–-नतस्त–नावन—ना-ङ्गी				
ऽ ऽ ऽ,	। । ऽ,	। ऽ ।,	ऽ । ।,	ऽ, ऽ

स.	न.	ज.	र.	गु.
हरिणी—शिशुन–-यना नि तम्बगु वीं ॥				
। । ऽ,	। । ।,	। ऽ ।,	ऽ । ऽ,	ऽ

न.	न.	स.	न.	न.	स.
मद्क-—लकरि—गमना परिण—तशशि–-वदना					
। । ।,	। । ।,	। । ऽ,	। । ।,	। । ।,	। । ऽ

न.	न.	न.	ज.	य.
जनय—-ति मम मनसि मुदं म–-दिराक्षी ॥				
। । ।,	। । ।,	। । ।,	। ऽ ।,	। ऽ ऽ,

मजमनित्यम्" इतिस्मरणात् । तु इति भिन्नपदे तु यतिरित्यन्तं पुल्लिङ्गं स्त्रीलिङ्गं वानन्वितं स्यात् । यतीहेति तु पाठो निर्दोषः । अयं च पूर्वोक्तानुवाद एवेति व्याख्याद्वयं तद्वदेव ज्ञेयम् ॥ १० ॥

अस्मिन्नेव तृतीयके यदा तजराः स्युः
प्रथमे च विरतिरार्षभं ब्रुवन्ति ॥
तच्छुद्धविराट् पुरः स्थितं
त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥११॥(१)

अस्मिन्वर्धमाने एव उपस्थितप्रचुपिते वा तृतीयपादे यदि त-ज-र-गणास्त्रयः स्युरपरं च चरणत्रयमुपस्थितप्रचुपितवत्स्यात्, तच्छुद्धविराडिदं पुरः स्थितं पूर्वं वर्तमानं यस्य तादृशमार्षभं शुद्धविराडार्षभं नाम ब्रुवन्ति वृद्धाः । संज्ञाया वृत्तेऽप्रवेशादुक्ते रीतिरियं प्रथमे पादे यतिरिति पूर्ववदेवार्थः । पैङ्गले तु शुद्धविराड्वृषभमिति संज्ञा । केचित्तु प्रथमे पादे यतावार्षभम् । यदा तु प्रतिपादं यतिस्तदा शुद्धविराडादिकं तदेव यतिभेदाच्छन्दोद्वयमेव पृथग्वदन्ति ॥ ११ ॥

इत्युपस्थितप्रचुपितप्रकरणम् ॥

(१) उदाहरणान्तरं यथा छन्दोवृत्तौ—

म. स. ज. भ. गु.गु.
कन्येयं कनको—ज्वला म-नोहर--दी-प्तिः
ऽ ऽ ऽ, । । ऽ, । ऽ ।, ऽ । ।, ऽ, ऽ

स. न. ज. र. गु.
शशिनि—र्म्मलव-दना वि -शालने-त्रा ॥
। । ऽ, । । ।, । ऽ ।, । । ऽ ऽ, ऽ

त. न. र.
पीनोरु--नितम्ब- -शालिनी
ऽ ऽ ।, । ऽ ।, ऽ । ऽ

न. न. न. ज. य.
सुखय--ति हृद--यमति--शयं त--रुणानाम्
। । ।, । । ।, । । ।, । ऽ ।, । ऽ ऽ

अत्र ग्रन्थेऽनुक्तानि च्छन्दांसि सामान्यसंज्ञया गृह्णाति—

विषमाक्षरपादं वा पादैरसमं दशधर्मवत् ।
यच्छन्दो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥ १२ ॥

विषमाण्यक्षराणि येषु तादृशाः पादा यस्य तत् । तथा अक्षराणां वैषम्यं च पादेषु गुरुलघुक्रमनियमसाम्याभावात्सङ्ख्यासाम्याभावाच्च । वा अथवा । पादैरसमं स्वीयैः पादैः कृत्वा चतुःसङ्ख्याकपादैरन्यवृत्तरतुल्यं त्रिपञ्चषडादिपादमिति यावत् । न तु समसङ्ख्याकपादरहितमित्यर्थः । षट्पदाद्यसङ्ग्रहापत्तेः । अत एव—

शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः । (वृ०र०१-१८)

इति प्रागुक्तम् । विषमाक्षरपादत्वं पदचतुरूर्ध्वादीनामप्यस्तीति तेषां गाथात्वं निवारयितुमाह—यदिति । अत्र यच्छन्दो विशेषतो नोक्तं तदित्यर्थः । इदं चावृत्त्या स्वातन्त्र्येणाऽपि योज्यम् । तेन समाक्षरपादानां समपादानां च कुड्मलदन्त्यादीनामपि गाथात्वं सिध्यति । अत एव "अत्रानुक्तं गाथा" (पि०सू०८-१) इति सम्मुग्धाकारेण सूत्रितं पिङ्गलेन । विषमाक्षरपादस्य गाथात्वेऽष्टदशसमनवाक्षरमूलकारिकैवोदाहरणम् । पादैरसमत्वे उदाहरणमाह—दशधर्मवदिति । दशधर्मशब्दयोगाल्लक्षणया भारतस्था षट्पदा गाथा दशधर्मशब्देनोच्यते । सा यथा—

दश धर्मं न जानन्ति धृतराष्ट्र ! निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ॥
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश । इति ।

असमपादानां दशाष्टादशादिपदानां नाटकादिस्थनान्द्यादीनामप्यनेन गाथात्वमुक्तं भवति । यथोक्तम्—

शब्दतो वार्थतो वापि मनाक्काव्यार्थसूचना ।
यत्राष्टभिर्वा दशभिरष्टादशभिरेव वा ॥
षड्विंशत्या पदैर्वापि सा नान्दी परिकीर्तिता । इति ।

'यच्छन्दो नोक्तम्' इत्यस्य स्वातन्त्र्येण व्याख्याने समानामपि गाथात्वं भवति । तत्र कियतीनां वृत्त्यादिपर्यालोचनयोदाहरणानि सलक्षणानि कथ्यन्ते । तत्र त्रिष्टुभि—'भतनगगुरुभिः कुड्मलदन्ती नाम' । यथा—

कुड्मलदन्ती विकटनितम्बा किन्नरकण्ठी लघुतरमध्या ।
बिम्बफलोष्ठी मृगशिशुनेत्रा मित्र ! भवन्तं सुखयतु कान्ता ॥

अत्र पञ्चभिः षड्भिश्च यतिः । जगत्याम्—'नजजरैर्वरतनुः' । यथा—

अयि ! विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु ! सम्प्रवदन्ति कुक्कुटाः ॥

षड्भिः षड्भिश्च यतिः । 'मभसमैर्जलधरमाला । यथा—

धत्ते शोभां कुवलयदामश्यामे शैलोत्सङ्गे जलधरमाला नीला ।
विद्युल्लेखा कनकधृतालङ्कारा क्रीडासुप्ता युवतिरिवाङ्के पत्युः ॥

चतुर्भिरष्टाभिश्च यतिः । "नौ रौ गौरी ।" यथा—

प्रणमत चरणारविन्दद्वयं त्रिभुवननमितस्य गौरीपतेः ।
सकृदपि मनसैव यः सेवितः प्रवितरति यथेष्टमष्टौ गुणान् ॥

एतस्या एव गौर्या दण्डकात्प्रागेकैकरेफवृद्धौ नामान्तराणि भवन्ति ॥

"भतनसा ललना ।" यथा—

या कुचगुर्वी मृगशिशुनयना पीननितम्बा मदकरिगमना ।
किन्नरकण्ठी सुललितदशना सा तव सौख्यं वितरतु ललना ॥

पञ्चभिः सप्तभिश्च यतिः । अतिजगत्याम्—"सजसजगैः कनकप्रभा" । यथा—

कनकप्रभा पृथुनितम्बशालिनी विपुलस्तनी हरिणशावकेक्षणा ।
इयमङ्गना नयनयोः पथि स्थिता कुरुते न कस्य मदनातुरं मनः ॥

"ननततगुरुभिः कुटिलगतिः" । यथा—

अधरकिसलये कान्तदन्तक्षते हरिणशिशुदृशां नृत्यति भ्रूयुगम् ।
ध्रुवमिदमुचितं यद्विपत्तौ सतामतिकुटिलमतेः स्यान्महानुत्सवः ॥

सप्तभिः षड्भिश्च यतिः । शक्वर्याम्—"भजसनैर्गुरुभ्यां च वरसुन्दरी" । यथा—

स्वादुशिशिरोज्ज्वलजलैः सुपरिपूर्णं
वीचिचयचञ्चलविचित्रशतपत्रम् ॥
हंसकलकूजितमनोहरतटान्तं
पश्य वरसुन्दरि ! सरोवरमुदारम् ॥

"मभनयगगैः कुटिलम्" । यथा—

अध्वन्यानां जनयति सुखमुच्चैः कूज-
न्दात्यूहोऽयं पथि निचुलिनि तोयोपान्ते ॥
कर्णाटस्त्रीरतिकुहरितुल्यच्छेदै-
र्नादैः कण्ठस्खलनकुटिलमन्दावर्तैः ॥

वेदै रसैः समुद्रैश्च यतिः । अष्टौ—"भरनभभगैः शैलशिखा ।" यथा—

शैलशिखानिकुञ्जशयितस्य हरेः श्रवणे
जीर्णतृणं करेण निदधाति कपिश्चपलः ॥
क्षुद्रवधापवादपरिहारविनीतरुष-
स्तस्य न तावतव लघुता द्विपयूथभिदः ॥

"भरयननगैर्वरयुवती ।"

कुञ्जरकुम्भपीठपीनोन्नतकुचयुगला
पार्वणशर्वरीशगर्वापहमुखकमला ॥
पीननितम्बबिम्बसम्वाहनशिथिलगति-
र्भुञ्जनराधिराज ! भूयात्तव वरयुवतिः ॥

अत्यष्टौ-"ससजभजगगैरतिशायिनी ।" यथा माघे—

इति धौतपुरन्ध्रिमत्सरान्सरसि मज्जनेन
श्रियमाप्नवतोऽतिशायिनीमपमलाङ्गभासः ॥
अवलोक्य तदैव यादवानपरवारिराशेः
शिशिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीशे ॥ (शि०८-७१)

दशभिः सप्तभिश्च यतिः । "नजभजजलगैरवितथम् ।" यथा—

श्रुतिपरिपूर्णवक्त्रमतिसुन्दरवाग्विभवं
तमखिलजैमिनीयमतसागरपारगतम् ॥
अवितथवृत्तविप्रजनपूजितपादयुगं
पितरमहं नमामि बहुरूपमुदारमतिम् ॥

एतदेवाष्टपञ्चचतुर्भिर्यतौ कोकिलकं नाम यथा—

नवसहकारपुष्पमधुनिष्कलकण्ठतया
मधुरतरस्वरेण परिकूजति कोकिलकः ॥
प्रथमककारविद्धवचनैर्धनलुब्धमते !
तव गमनस्य भङ्गमिव सम्प्रति कर्तुमनाः ॥

धृतौ—"रसजजभरैर्विबुधप्रिया" । यथा—

कुन्दकोमलकुड्मलद्युतिदन्तपङ्क्तिविराजिता
हंसगद्गदवादिनी वनिता भवेद्विबुधप्रिया ॥
पीनतुङ्गपयोधरद्वयभारमन्थरगामिनी
नेत्रकान्तिविनिर्जितश्रवणावतंसितकैरवा ॥

अष्टभिर्दशभिश्च यतिः । अतिधृतौ—"यमनसररगुरुभिर्विस्मिता" । यथा माघे—

श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षै-
र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय ॥
प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षै-
र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे ॥ (शि०२०-७१)

षड्भिः षड्भिः सप्तभिश्च यतिः । प्रकृतौ—"नजभजज जरैर्धृतश्रीः" ।

यथा माघे—

तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ॥
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-
श्चिरविगतश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥ (शि०३-८२)

त्रिःसमसु यतिः । एवमादीनि वृत्तानि प्रस्तारमहाकविप्रयोगेषु दृश्यमानानि गाथाख्यानि । यदा तु 'यच्छन्दो नोक्तमत्र' इति विषमाक्षरपादमित्यस्य विशेषणं तदा समच्छन्दसां गाथात्वाभावादेतानि त्रिष्टुबादिष्वेव द्रष्टव्यानि । एवमन्यान्यपि च्छन्दांसि कविप्रयोगानुरोधाज्ज्ञेयानि, समार्धसमविषमप्रस्तारेषु तेषामुपलम्भात् । विशेषसंज्ञाऽज्ञानात्तु नोदाहृतानि ।

एतज्जातिवृत्तात्मना द्विविधमपि च्छन्दो न केवलं संस्कृतविषयम् । किंतु प्राकृतदेशभाषास्वपि कवीच्छया भवति । तत्रार्यैव प्राकृतादिषु गाथेति संज्ञिता सा । तथा ममैव—

सअलसिणेहमिअङ्को तुइ गुणरअणाअरे उदिदो ।
नीलुप्पलप्पबोहे सिढिलो मा भोदु पच्छुणा एसा ॥
(सकलस्नेहमृगाङ्कस्त्वयि गुणरत्नाकरे उदितः ।
नीलोत्पलप्रबोधे शिथिलो मा भवतु प्रार्थनैषा ॥)

वैतालीये च शकुन्तलायां यथा—

सहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए ।
पशुमालणकम्मदालुणे अणुकम्पामिदुए व्व शोत्तिए ॥
(सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम् ।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः ॥)

एवं समादिष्वपि कर्पूरमञ्जर्यादौ ज्ञेयान्युदाहरणानि, भाषायामपि । तत्र महाराष्ट्रभाषायामुपजातौ यथा—

अगा ! मुरारी भवदुःख भारी कामादिवैरी मन हें थरारी ॥
मी मूढ देवा न करींच सेवा माझा कुठावा परि तां करावा ॥

गुर्जरभाषायामपि स्रग्विणी यथा—

वित्ततें संचवूं युक्ततें भोगवूं अग्नितें होमवूं विप्रतें आपवूं ॥
पापतें खण्डवूं कामतें दण्डवूं पुण्यतें संचवूं रामतें सेववूं ॥

कान्यकुब्जभाषायामपि वसन्ततिलका यथा—

कन्दर्परूप जबतें तुम लीह कृष्ण !
से कोप काम हमही बहु पीर छोडी ॥

तो भेटिकै विरहपीर नसाउ मोरी
यैं भांति दूति पठई कहि बात गोपी ॥

म्लेच्छसङ्करे मालिन्यां यथा कस्यचित्

हरनयनसमुत्थज्वालया वह जलाया
रतिनयनजलौघैः खाक बाकी बहाया ॥
तदपि दहति चेतो मामकं क्या करोंगी
मदनशिरसि भूयः क्या बला आन लागी ॥

एवं गौडादिभाषासु तत्तत्सङ्करे चोदाहरणानि ज्ञेयानि ।

अथ "शेषं गाथा" इति सामान्यत उपक्षिप्तानि विस्तरभीतेर्विशेषतो नोक्तानि प्राकृतादिषु प्रायः परिदृष्टानि च्छन्दांसि प्राकृतपिङ्गलशम्भुच्छन्दश्चूडामणयादिग्रन्थपर्यालोचनया व्युत्पित्सुव्युत्पत्त्यर्थमस्माभिरुच्यन्ते । तत्र मात्राच्छन्दःसूपयुक्ता गणभेदाः । तत्र द्विकलौ द्वौ । यथा—ऽ, । ।, त्रिकलास्त्रयः । ऽ, ऽ ।, । । । चतुष्कलाः "पञ्चार्यादिषु संस्थिताः" (वृ.र.१-८) इत्यत्र पञ्च मूल एव पूर्वमुक्ताः । पञ्चकला अष्टौ । ऽ ऽ, ऽ । ऽ, । । । ऽ, ऽ ऽ ।, । । ऽ ।, । ऽ । ।, ऽ । । ।, । । । । ।, षट्कलास्त्रयोदश यथा ऽ ऽ ऽ, । । ऽ ऽ, । ऽ । ऽ, ऽ । । ऽ, । । । । ऽ, । ऽ ऽ ।, ऽ । ऽ ।, । । । ऽ ।, ऽ ऽ । ।, । । ऽ । ।, । ऽ । । ।, ऽ । । । ।, । । । । । ।, एतेषां व्यवहारार्थं संज्ञास्तास्तास्तैस्तैः कृतास्ता अत्यन्तोपयोगाभावाद् द्विककलादिशब्दैरेव व्यवहारसिद्धेर्ग्रन्थविस्तरभयान्नोच्यन्ते । गौरवात्षट्कलस्य हरि-शशि-सूर्य-शक्र-शेष-अहि-कमल-ब्रह्म-कलि-चन्द्र-ध्रुव-धर्म-शालि-करसंज्ञाः ।

अथ गाथाप्रकरणम् । तत्र चतुःपञ्चाशद्भिर्मात्राभिर्गाहूः, सप्तपञ्चाशद्भिर्गाथा । विपरीतार्धघटिताभिस्तावतीभिरेव विगाथः । षष्टिमात्र उद्गाथः । द्विषष्टिमात्रा गाहिनी । सैव विपरीतार्धा द्विषष्टिमात्रा सिंहिनी । चतुःषष्टिमात्राभिः स्कन्धक इति सप्त भेदाः । तत्र यदार्धद्वयेऽपि सप्त सार्धाश्चतुर्मात्रिका गणाः षष्ठगणस्त्वेकलघुरूपस्तदा गाहूः । अत्र उदाहरणम्—

चन्दो चन्दणहारो तावअ रूअं पआसन्ति ।
चण्डेसरस्स कीती जावअ अप्पं न दंसेइ ॥
(चन्द्रश्चन्दनहारस्तावद्रूपं प्रकाशयतः ।
चण्डेश्वरस्य कीर्तिर्यावदात्मानं न दर्शयति ॥)

संस्कृते त्वियमुपगीतिः। आर्यैव प्राकृते गाथा। उदाहरणं ममैव प्रागुक्तम्। तदुक्तम्—

पढमं बारह मत्ता बीए अट्ठारहेहिं संजुत्ता।
जह पढमं तह तीअं दहपञ्चविहूसिआ गाहा॥
(प्रथमं द्वादश मात्रा द्वितीयेऽष्टादशभिः संयुक्ता।
यथा प्रथमं तथा तृतीयं दशपञ्चविभूषिता गाथा॥ इति।)

तत्र यदि सप्तविंशतिर्गुरवस्त्रयश्च लघव इत्येवं त्रिंशदक्षरा तदा लक्ष्मीनाम्नी। षड्विंशतिर्गुरवः पञ्च लघवस्तदा ऋद्धिः। एवमेकगुरुपञ्चपञ्चाशल्लघुपर्यन्तमेकैकगुरुह्रासे लघुद्वयद्वयवृद्धौ च त्रिंशदक्षरकं भेदमारभ्य षट्पञ्चाशदक्षरभेदपर्यन्तं सप्तविंशतिर्भेदाः। क्रमेण तन्नामानि—लक्ष्मी—ऋद्धि—वृद्धि—लज्जा—विद्या—क्षमा—गौरी—देही—रात्रि—पूर्णच्छाया—कान्ति—महामाया—कीर्ति—सिद्धा—मानी—रामा—गाहिनी—विश्वावासिता—शोभा—हरिणी—चक्री—सारसी—कुररी—सिंही—हंसी (२७) इति। त्रयोदशलघुपर्यन्तं विप्रा, तत एकविंशतिलघ्ववधि क्षत्रिया, ततः सप्तविंशत्यवधि लघुभिर्वैश्या, ततः सर्वा शूद्रेति गाथाजातिः। गाथान्तर्गतेनैकेन जगणेन कुलीना गाथा भवति। द्वाभ्यां कुलटा। बहुभिर्वैश्या जगणरहिता रण्डा। तत्रापि या प्रथमादिविषमादिस्थाने जगणयुक्ता सा गुर्विणीति संज्ञिता कर्तुर्नायकस्य च दुष्टा भवति। सर्वासां गाथानां प्रथमपादो हंसीवन्मन्थरः पठनीयः, द्वितीयः सिंहविक्रमवदुद्धतः, तृतीयो गजगतिवल्ललितः, चतुर्थः सर्पगतिवच्चञ्चल इति। गाथाद्वितीयार्धं यदि प्रथमं प्रथमं च द्वितीयं तदा विगाथः। इयं संस्कृते उद्गीतिः। यथा—

परिहर माणिणि! माणं पेक्खहि कुसुमाइं णीवस्स।
तुम्ह कए खरहिअओ गेण्हइ गुलिआइ धणुइ किर कामो॥
(परिहर मानिनि! मानं प्रेक्षस्व कुसुमानि नीपस्य।
तव कृते खरहृदयो गृह्णाति गुलिका धनुषि किल कामः॥)

तथा द्वयोरप्यर्धयोस्त्रिंशन्मात्रा गाथा प्रथमार्धवद्यदि भवति तदोद्गाथः। यथा—

सोऊण जस्स णामं अंसू णअणाइं सुमुहि! रुद्धन्ती।
भण वीरचेइवइणो पेक्खामि मुहं कहं जहिच्छं से॥
(श्रुत्वा यस्य नामाश्रूणि नयने सुमुखि! रुन्धन्ति।
भण वीरचेदिपतेः पश्यामि मुखं कथं यथेच्छं तस्य॥)

इयमेव संस्कृते गीतिः। तथा पूर्वार्धे त्रिंशन्मात्रा गाथावत् उत्तरार्धे

एकगुर्वाधिक्येन द्वात्रिंशत् तदा गाहिनी । अर्धवैपरीत्ये च सिंहिनी । क्रमेणोदाहरणे—

मुञ्चहि सुन्दरि ! पाअं अप्पहि हसिऊण सुमुहि ! खग्गं मे
कप्पिअ मेच्छसरीरं पेच्छिइ वअणाइ तुम्म धु अहं वीरो ॥
(मुञ्च सुन्दरि ! पादमर्पय हसित्वा सुमुखि ! खड्गं मे ।
कल्पयित्वा म्लेच्छशरीरं प्रेक्षिष्ये वदनं तव ध्रुवमहं वीरः ॥)
वरिसइ कणअह विट्टी तप्पइ भुअणे दिआणिसं जागन्तो ।
णीसङ्क साहसङ्को णिन्दइ इन्दं अ सूरबिम्बं अ ॥
(वर्षति कनकस्य वृष्टिं तपति भुवने दिवानिशं जाग्रत् ।
निःशङ्कं साहसाङ्को निन्दति इन्द्रं च सूरबिम्बं च ॥)

एते संस्कृते ललितावल्गु गीतिसंज्ञे । तथार्धद्वयेऽपि चतुर्मात्रिकाष्टगणघटितं स्कन्धकं सेतुकाव्ये यथा—

जं जं आणेइ गिरिं रइरहचक्कपडिघट्टणसहं हणुमा ।
तं तं लीलाइ णलो वामकरत्तोल्लिअं रएइ समुद्दे ॥
(यं यमानयति गिरिं रविरथचक्रपरिघट्टनसहं हनुमान् ।
तं तं लीलया न्लो वामकरोत्तोलितं रचयति समुद्रे ॥)

इयमेव संस्कृते आर्यागीतिः । अत्र यद्यष्टाविंशतिर्गुरवः, अष्टौ लघवस्तदा नन्दसंज्ञा । तत एकगुरुद्विपष्टिलघुपर्यन्तमेकैकगुरुह्रासे लघुद्वयद्वयवृद्धौ चाष्टाविंशतिर्भेदाः । तेषां क्रमेण संज्ञाः—नन्द-भद्र-शेष-सारङ्ग-शिव-ब्रह्म-चारण-वरुण-नील-मदन-तालङ्क-शेखर-शर-गगन-शरभ-विमति-क्षीर-नगर-नर-स्निग्ध-स्नेहन-मदकल-लोभ-शुद्ध-सरित्-कुम्भ-कलश-शशधराख्याः । तत्र नन्दोदाहरणम्—

चन्दा कुन्दा कासा हारा हंसा तिलोअणा केलासा ।
जेत्ता जेत्ता सेत्ता तेत्ता कासीस जिणिअ ते कित्ती ॥
(चन्द्रः कुन्दः काशो हारो हंसस्त्रिलोचनः कैलासः ।
यावद्यावच्छ्वेतं तावत्काशीश जितं ते कीर्त्या ॥)

एवमन्येष्वपि भेदेषु ज्ञेयम् ।

इति गाथाप्रकरणम् ॥

अथ दोहा ।

यस्याः प्रथमतृतीययोः पादयोः प्रथमं षट्कलो गणः, ततश्चतुष्कलः, ततस्त्रिकल इत्येवं त्रयोदश मात्राः, द्वितीयचतुर्थयोः षट्कलचतुष्कलौ समानौ त्रिकलस्थाने एको लघुरेवेत्येकादशमात्रास्तदिदमष्टाचत्वारिंशन्मात्राभिर्दोहाच्छन्दः । यथा—

सुरअरु सुरही परसमणि णहि वीरेससमाण ।

ओ वक्कल ओ कठिणतणु ओ पसु ओ पाखाण ॥
(सुरतरुः सुरभिः स्पर्शमणिर्नहि वोरेशसमानः ।
स वल्कलः स कठिनतनुः स पशुः पाषाणः ॥)

अत्र द्वाविंशतिर्गुरवश्चत्वारो लघवो यत्र तद् भ्रमरम् । तत एकगुरुपर्यन्तमेकैकगुरुहासे लघुह्रयह्रयवृद्धौ च त्रयोविंशतिर्नामानि । यथा—भ्रमर-भ्रामर-शरभ-श्येन-मण्डूक-मर्कट-करभ-नर-मराल-मदकल-पयोधर-बल-वानर-त्रिकल-कच्छप-मत्स्य-शार्दूल-अहिवर-व्याघ्र-बिडाल-श्व-उन्दुर-सर्पेति । सर्पे अष्टाचत्वारिंशल्लघव एव । तत्र भ्रमरोदाहरणम्—

जा अद्धङ्गे पव्वई सीसे गङ्गा जासु ।
जो देआणं वल्लहो वन्दे आअं तासु ॥
(यस्यार्धाङ्गे पार्वती शीर्षे गङ्गा यस्य ।
यो देवानां वल्लभो वन्दे पादौ तस्य ॥)

तत्रापि द्वादशावधिलघुका विप्रा । ततो द्वाविंशत्यवधिलघुका क्षत्रिया । द्वात्रिंशदवधिलघुका वैश्या । इतरा शूद्रेति । तथा यस्याः प्रतिपादं प्रथमे तृतीये च चरणे जगणः सा दुष्टा दोहेति।

इति दोहाप्रकरणम् ॥

अथोत्कृष्टा ।

प्रथमं चतुष्कलौ द्वौ गणौ, ततस्त्रिकल एकः, एवमेकादशमात्रारचितपादषट्कयुक्तोत्कृष्टा । तत्रापि सर्वैर्लघुभिर्लौहाङ्गिनीनाम । ततश्चतुश्चतुर्गुरुवृद्धौ अष्टाष्टलघुह्रासे दशपर्यन्तं हंस्यादीनि । लौहाङ्गिनी लघवः ६६, हंसी गुरु, ४ लघवः ५८ रेखा गुरु ८ लघवः ५०, तालङ्गिनी गुरु १२ लघवः ४२, कम्पी गुरु १६ लघवः ३४, गम्भीरा गुरु २० लघवः २६, काली गुरु २४ लघवः १८, कालरुद्राणी गुरु २८ लघवः १०, एवमष्टौ भेदाः । तत्र लौहाङ्गिनी यथा—

विमुहचलिअ रण अचलु
परिहरिअ हअगअबलु ।
हलहलिअ मलअणिवइ
जसु जस तिहुअण पिवइ ।
वणरसिणरबइ लुलिअ
सअल उवरि जस फुरिअ ॥
(विमुखचलितो रणेऽचलः
परिहृत्य हयगजबलम् ।
हलहलितो मलयनृपति-
र्यस्य यशस्त्रिभुवनं पिबति ।

वाराणसीनरपतिर्लुलितः
सकलोपरि यशः स्फुरितम्
एवं सर्वेषूह्यम् ।

इत्युत्कृष्टा ॥

अथ रोला ।

यथेच्छं गुरुलघुभिश्चतुर्विंशतिमात्राः प्रतिचरणं भवन्ति, एवं पादचतुष्टययुता रोला । यथा—

पअभरदरदरु धरणी तरणिरह धुलिहिं झम्पिअ ।
कमठपीठ धरपडिअ मेरुमन्दरसिर कम्पिअ ॥
कोहे चलिअ हम्मीरवीर गअजूहजुत्तो ।
कट्ठे किअउ आक्कन्द मुच्छि मेच्छकं पुत्तो ॥
(पदभरदरदरिता धरणी तरणिरथो धूलिभिराच्छादितः ।
कमठपीठं धरापतितं मेरुमन्दरशिरः कम्पितम् ॥
क्रोधेन चलितो हम्मीरवीरो गजयूथयुक्तः ।
कष्टेन कृत आक्रन्दो मूर्च्छितो म्लेच्छपुत्रः ॥)

अत्र एकादश गुरवो द्वौ लघू यदि पादे तदा रोला शुद्धा । प्रतिपादमेकैकगुरुह्रासे लघुद्वयवृद्धौ च करतालादिसंज्ञा भेदा द्वादश । यथा—कुन्द-करताल-मेघ-तालङ्क-काल-रुद्र-कोकिल-कमल-इन्द्र-शंभु-चामर-गणेश्वरेति ।

इति रोला ॥

अथ गन्धा ।

प्रथमपादे सप्तदशवर्णाः, द्वितीयेऽष्टादश । मात्रासु त्वनियमः द्वितीयार्धमपि तादृगेव सा गन्धा ।

कण्ण चलन्ते कुम्म चलइ पुणवि असरणा ।
कुम्म चलन्ते महि चलइ भुअणभअकरणा ॥
महिअ चलन्ते महिहरु तह अ सुरअणा ।
चक्कवइ चलन्ते चलइ चक्क जह,तिहुअणा ॥
(कर्णे चलति कूर्मश्चलति पुनरप्यशरणे ।
कूर्मे चलति मही चलति भुवनभयकरणी ॥
मह्यां चलन्त्यां महीधरस्तथा च सुरगणाः ।
चक्रवर्तिनि चलति चलति चक्रं यथा त्रिभुवनम् ॥)

इति गन्धा ॥

अथ चतुष्पदा ।

चतुर्मात्राः सप्तगणा गुरुश्चेति त्रिंशन्मात्र एकः पादः, तादृशा एवान्ये त्रयः, एवं विंशत्यधिकशतं मात्रा भवन्ति । एवं चतुर्भिः पादैरेकः पादस्तादृशैश्चतुर्भिः पादैश्चतुःशतान्यशीत्यधिकानी मात्राः । एतावता चतुष्पदा भवति । तत्र लाघवाय एकपादोदाहरणम्—

जसु सीसइ गङ्गा गोरि अधङ्गा गिम पिन्धिअ फणिहारा ।
कण्ठे ठ्ठिअ वीसा पिन्धण दीसा संतारिअ संसारा ॥
किरणावलिकन्दा वन्दिअ चन्दा णअणहि अणल फुरन्ता ।
सो मङ्गल दिज्जउ बहुसुह किज्जउ तुज्झ भवाणीकन्ता ॥
(यस्य शीर्षे गङ्गा गौरी अर्धाङ्गे ग्रीवायां पिनद्धः फणिहारः ।
कण्ठे स्थितं विषं परिधानं दिशः सन्तारितसंसारः ॥
किरणावलिकन्दो वन्दितश्चन्द्रः नयनेऽनलः स्फुरति ।
स मङ्गलं ददातु बहु सुखं करोतु तव भवानीकान्तः ॥)

एतस्यानन्ता एव भेदाः ।

इति चतुष्पदा ॥

अथ घत्ता ।

चतुर्मात्रैः सप्तभिर्गणैस्त्रिभिर्लघुभिश्चैकः पादः । तत्र प्रथमं दशमात्रासु विरतिः, ततोऽष्टसु, ततस्त्रयोदशसु, एवंप्रकारकपादचतुष्टयेन घत्ता नाम । यथा—

रण दक्ख दक्ख हणु जिणु कुसुमधणु
अन्धअगन्धविणासकरु ।
सो रक्खउ सङ्करु असुरभअङ्करु
गोरिनारि अद्धङ्गधरु ॥
(रणे दक्षो दक्षो हतो जितः कुसुमधनु-
रन्धकगन्धविनाशकरः ।
स रक्षतु शङ्करः असुरभयङ्करो
गौरीनार्यर्धाङ्गधरः ॥)

इति घत्ता ॥

अथ घत्तानन्दः ।

षट्कल आदौ, ततस्त्रिकलास्त्रयः, ततः पञ्चकलः, ततः षट्कलः, ततो लघुद्वयम् । एवंप्रकारकपादचतुष्टयेन द्विषष्टिमात्रको घत्तानन्दः । एकादशसु सप्तसु त्रयोदशसु च यतिः । यथा—

जे बन्दिअ सिर गङ्ग हणिअ अणङ्ग
अद्धङ्गे परिकर धरणु ।

सो जोईजणमित्त हरेउ दुरित्त
सङ्काहरु सङ्करचरणु ॥
(येन वन्दिता शिरसि गङ्गा हतोऽनङ्गोऽर्धाङ्गे परिकरं धरति ।
स योगिजनमित्रं हरतु दुरितं शङ्काहरः शङ्करचरणः ॥'
इति घत्तानन्दः ॥

अथ षट्पदप्रकरणम् ।

काव्यनाम्नश्छन्दसः पादचतुष्टयेनोल्लालनाम्नः पादद्वयेन च षट्पदं भवति । प्रथमं द्वे मात्रे, ततः पञ्च चतुर्मात्रा गणाः, ततो द्वे मात्रे, इति चतुर्विंशतिमात्राभिः काव्यपदचतुष्टयम् । तत्रैकादशसु त्रयोदशसु च यतिः, उल्लालस्य पादे अष्टाविंशतिर्मात्राः, पञ्चदशसु त्रयोदशसु च यतिः । एवं पदद्वयम् । एतादृक् षट्पदम् । यथा—

पिन्धउ दिढसण्णाह वाहउप्पर पक्खर दइ ।
बन्धुसमदि रण धसउ सामिहम्मीर वअण लइ ।
उड्डउ णहपह भमउ खग्ग रिउसीस डालउ ।
पक्खर पक्खर ठेल्लि पेल्लि पव्वअ उप्फालउ ।
हम्मीरकज्ज जज्जल भणइ कोहाणल मुहमह जलउ ।
सुरताणसीस करवाल दइ तेज्जि कलेवर दिउ चलउ ॥
(परिधाय दृढसन्नाहं वाहोपरि पक्षरं दत्त्वा ।
बन्धूनां सम्मत्या रणं धर्षयामि स्वामिहम्मीरवचनं गृहीत्वा ।
उड्डयामि नभःपथं भ्रमामि खड्गं रिपुशिरसि पातयामि ।
पक्षरे पक्षरं ठेलयित्वा पेलयित्वा पर्वतमुत्फालयामि ।
हम्मीरकार्यं जज्जलो भणति क्रोधानलो मुखमध्ये ज्वलति ।
सुलतानशिरसि करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलति॥)

प्रकारान्तरमपि षट्पदे भवति । आदौ षट्कलो गणः, ततश्चत्वारश्चतुःकलाः, ततोऽन्ते द्विकलः, एवंविधैश्चतुर्भिश्चरणैः षण्णवतिमात्रा भवन्ति । तत उल्लालपदद्वयं पूर्ववदेव । उभयथापि द्विपञ्चाशदधिकं शतं मात्राणां षट्पदे भवति । अत्रोदाहरणम्—

जहा सरअससिबिम्ब जहा हरहारहंसा ठिअ ।
जहा फुल्लसिअकमल जहा सिरिखण्ड-खण्डकिअ ॥
जहा गङ्गकल्लोल जहा रोसाणिअ रुप्पइ ।
जहा दुद्धवरसुद्धफेण फम्फाइतलुप्पइ ॥
पिअपाअपसाअदिट्ठिपलु णिहुअ हसइ जहा तरुणिजण ।
वरमन्ति चण्डेसर तह तुअ कित्ति देक्खु हरिबम्भ भणा ॥
(यथा शरच्छशिबिम्बं यथा हरहारहंसाः स्थिताः ।

यथा फुल्लसितकमलं यथा श्रीखण्डः खण्डीकृतः ॥
यथा गङ्गाकल्लोलो यथा रोपाणितं रूप्यम् ।
यथा दुग्धवरशुद्धफेनं उद्गम्य तपति ॥
प्रियपादप्रसादद्दृष्टिपतितो निभृतं हसति यथा तरुणीजनः ।
वरमन्त्रिन् ! चण्डेश्वर ! तथा तव कीर्तिं द्दृष्ट्वा हरिब्रह्मा भणति ॥)

काव्यस्वरूपं त्वादावन्ते च षट्कलो मध्ये त्रयश्चतुष्कलास्तृतीयो जो न्लौ वेति । इदं स्वतन्त्रस्य काव्यच्छन्दसः करणे । षट्पदे तूक्तैव विधा ज्ञेयाः । काव्यस्य भेदाः पञ्चचत्वारिंशत् । तत्र यत्र षण्णवतिर्लघूनां न तु गुरुः स शक्रः । तत एकैकगुरुप्रक्षेपेण लघुद्वयद्वयह्रासे च शम्भ्वाद्या भृङ्गान्ता भेदा भवन्ति । तथा च भृङ्गे अष्टौ लघवः प्रतिपादमेकादश लघुप्रकारेण समुदिते चतुश्चत्वारिंशद् गुरवस्ततो न ह्रासः । यथा— शक्र-शम्भु-शूर-गण्ड-स्कन्ध-विजय-दर्प-ताराङ्क-समर-सिंह-शौर्य-उत्तेज-फणि-रक्षः-प्रतिधर्म-मराल-मृगेन्द्र-दण्ड-मर्कट-अनुबन्ध-वासण्ठ-कण्ठ-मयूर-बन्ध-भ्रमर-भिन्न-महाराष्ट्र-बलभद्र-राज-वलित-मयूख-मन्थान-बलिमोह-सहस्राक्ष-वाल-दर्पित-सरभ-दम्भ-उद्दम्भ-वलिताङ्ग-तुरग-हार-हरिण-अन्ध-भृङ्गेति । तत्र शक्रस्योदाहरणम्—

जसु कर फणिबइ वलअ तरुणिवर तणुमह बिलसइ ।
णअण अणल गल गरल विमल ससहर सिर णिवसइ ॥
सुरसरि सिरमह वहइ सअलमणदुरितदलणकर ।
हसि ससहरहर हरउ दुरित तुअ दिसउ अभअवर ॥
(यस्य करे फणिपतिर्वलयस्तरुणीवरा तनुमध्ये विलसति ।
नयने अनलो गले गरलं विमलः शशधरः शिरसि निवसति ॥
सुरसरिच्छिरोमध्ये वहति सकलमनोदुरितदलनकरः ।
हसित्वा शशधरधरो हरतु दुरितं तव दिशत्वभयवरम् ॥)

षट्पदे गणाशुद्ध्यादौ पङ्क्त्यादया दोषा ग्रन्थान्तरादवसेयाः, विस्तरभयात्तु न प्रपञ्च्यन्ते । द्वात्रिंशल्लघ्ववधिकस्य काव्यस्य विप्रजातिः, ततश्चत्वारिंशल्लघ्ववधि क्षत्रियजातिः, ततोऽष्टाचत्वारिंशल्लघ्ववधि वैश्यजातिः अवशिष्टः शूद्र इति जातिभेदः । उल्लालल्क्षणं तु—

त्रयश्चतुष्कला आदौ त्रिकलः षट्कलस्ततः ।
चतुष्कलोऽयं त्रिकल उल्लाले लक्षणं सदा ॥ इति ।

तत्र सर्वगुरुः षट्पदो यथा—

जाआ जा अद्धङ्ग सीस गङ्गा लोलन्ती ।
सव्वासा पूरन्ति सव्व दुक्खा तोलन्ती ॥
णाआराआहार दीस बासा बासन्ता ।
वेआला जा सङ्ग णट्ट दुट्ठा णासन्ता ॥

णाचन्ता कन्ता उच्छुब्बे ताले भूमीकम्पले ।
जा दिट्ठे मोक्खा पाविज्ज सो तुह्माणं सुक्ख दे ॥
(जाया यस्यार्धाङ्गे शीर्षे गङ्गा लोलते ।
सर्वाशाः पूरयन्ती सर्वदुःखानि त्रोटयन्ती ॥
नागराजहारो दिशो वासांसि वसानः ।
वेताला यत्सङ्गे नष्टदुष्टान् नाशयन्तः ॥
नृत्यन्तः कान्तं तालकम्पितभूमयः ।
यद्दृष्टे मोक्षः प्राप्यते स युष्माकं सुखं ददातु ॥

अथ षट्पदभेदाः । तत्र काव्ये चतुश्चत्वारिंशद् गुरवः, उल्लाले च षड्विंशतिः । एवं मिलित्वा सप्ततिर्गुरवो द्वादश च लघवो यत्र स द्व्यशीत्यक्षरो अजयनामा प्रथमो भेदः, ततः सर्वलघुपर्यन्तमेकैकगुरुह्रासे लघुद्वयप्रक्षेपेणैकैकवर्णवृद्धौ एकसप्ततिरजयाद्या भेदा भवन्ति । यथा—अजय-विजय-वलि-वर्ण-वीर-वेताल-बृहन्नल-मर्कट-हरि-हर-ब्रह्म-इन्दु-चन्दन-शुभंकर-शाल-सिंह-शार्दूल-कूर्म-कोकिल-खर-कुञ्जर-मदन-मत्स्य-सारङ्ग-शेष-सारस-पयोधर-कुन्द-कमल-कुन्द-वारण-शरभ-जङ्गम-शर-सुशर-मसर-सारस-सरस--मेरु-सकल-मृग-सिद्ध-बुद्धि--कलकल--कमलाकर-धवल-मृतक-ध्रुव-वलय-किंनर-शक-जन-मेघाकर-ग्रीष्म-गरुड-शशि-सूर्य-शल्य-नर-तुरग-मनोहर-गगन-रत्न-नव-हीर-भ्रमर-शेखर-कुसुमाकर-दीप-शङ्ख-वसु-शब्दाः । तथा च अजये वर्णाः ८२, गुरवः ७० लघवः १२। अन्त्ये शब्दे लघवः १५२ ।

इति षट्पदप्रकरणम् ॥

अथ पज्झटिका ।

प्रतिपादं चत्वारश्चतुष्कला गणास्तत्रान्तिमो जगण एव । एवं चतुर्भिः पादैश्चतुःषष्टिमात्राकं पज्झटिकाच्छन्दः । यथा—

जे गञ्जिअ गोलाहिवइ राउ
उद्दण्ड ओड्डु जसु भअ पलाउ ।
उरु विक्कम विक्कम जिणिअ जुज्झ
ताकरण परक्कम को ण बुज्झ ॥
(येन गंजितो गौडाधिपती राजा
उद्दण्ड ओड्रो यस्य भयेन पलायितः ॥
गुरुविक्रमो विक्रमो जितो युद्धे
तत्कर्णपराक्रमं को न बुद्ध्यते ॥)

इति पज्झटिका ॥

अथालिल्लिहः ।

प्रतिपादं षोडशमात्राः, अन्ते च मात्राद्वयं लघुद्वयात्मकं पादे च जगणो न भवति तच्छन्दोऽलिल्लिहसंज्ञम् । यथा—

जहि आसामविदेहाकिल्लउ,
सुत्थिर डाहररज्जा जिणि लिउ ।
कालिञ्जर जिणिह कित्ती थप्पिअ,
धण आरज्जिअ धम्मे अप्पिअ ॥
(येनासामविदेहदुर्गाणि,
सुस्थिरडाहरराज्यं जित्वा गृहीतम् ।
कालिञ्जरं जित्वा कीर्तिं स्थापयित्वा,
धनमर्जयित्वा धर्मे अर्पितम् ॥)

इत्यलिल्लिहः ॥

अथ नवपदप्रकरणम् ।

अनियतगुरुलघुक्रमाः षोडशमात्राः प्रतिपादं भवन्ति, तच्चतुःषष्टिमात्रं पादाकुलकम् । पञ्चदशमात्राभिः प्रथमतृतीयपञ्चमपादाः । पञ्चदशमात्राः, द्वितीये द्वादशमात्राः, चतुर्थे एकादश मात्राः, एवमष्टषष्टिमात्रा भवन्ति । एतदनन्तरं दोहाच्छन्दः समस्तमित्येवं नवपदं छन्दो रड्डा नाम । तत्र विषमपादेष्वादौ त्रिकलस्ततस्त्रयश्चतुष्कलाः, तत्रापि प्रथमेऽन्ते जगणश्चतुर्लघुर्वा, तृतीयपञ्चमयोर्भगणोऽन्ते द्वितीयपादे सर्वलघवन्तास्त्रयश्चतुष्कलाः, चतुर्थे द्वौ चतुष्कलौ, ततस्त्रयो लघव इति । ततउक्तलक्षणं दोहाच्छन्दः । यथा—

भमइ महुअर फुल्ल अरविन्द,
णवकेसु काणण फुलिअ
सव्वदेस पिकराव चुल्लिअ,
सिअल पवण लहु वहइ,
मलअकुहर णववेल्लि पेल्लिअ ।
चित्त मणोभव सर हणइ,
दूर दिगन्तर कन्त ।
के परि अप्प उबारिहउ,
एपरि मिलिअ दुरन्त ॥
(भ्रमति मधुकरः फुल्लारविन्दे,
नवकिंशुकैः काननं फुल्लम् ।
सर्वदेशः पिकरावश्चुलुकितः ।
शीतलपवनो लघु वहति,

मलयकुहरे नववल्लीं क्षिप्त्वा ।
चित्तं मनोभूः शरैर्हन्ति,
दूरदिगन्तरे कान्तः
केन प्रकारेणात्मानमुद्धारयामि,
एवं परिमिलितो दुरन्तः ॥)

एतद्भेदाः सप्त । तत्र प्रथमतृतीयपञ्चमपादेषु चतुर्दशमात्रा कलभी (१), द्वितीयचतुर्थयोरेकादश सा नन्दा(२)प्रथमतृतीयपञ्चमपादेषूनविंशतिर्द्वितीयचतुर्थयोरेकादश सा मोहिनी(३),विषमपादेषु पञ्चदश समयोरेकादश सा चारुसेनी(४),विषमेषु पञ्चदश समयोर्द्वादश सा भद्रा(५) विषमेषु पञ्चदश द्वितीये द्वादश चतुर्थे एकादश स राजसेनः(६), विषमेषु षोडश समयोरेकादश द्वादश वा सा तालङ्किनी(७)इति ।

इति नवपदप्रकरणम् ॥

अथ पद्मावती ।

द्विगुरुरन्तगुरुरादिगुरुः सर्वलघुरित्येतैश्चतुर्मात्रैः गणैः यथासम्भवं गणाष्टकघटितपादचतुष्टया पद्मावती । अत्र जगणो नायकपीडादिदोषदाता अतश्चगडाल इत्युच्यतेऽतो न शुभः । यथा—

भअभङ्गिअ वङ्गा भग्गु कलिङ्गा तेलङ्गा रण मुक्कि चले ।
मरहट्ठा धिट्ठा लग्गिअ कट्ठा सोरट्ठा भअपाअ पले ॥
चम्पा रण कम्पा पव्वअ कम्पा ऊत्थाउत्थी जीउ हरे ।
कासीसर राणा किअउ पआणा बिज्जाहर भण मन्तिबरे ॥
(भयभग्ना वङ्गा भग्नाः कलिङ्गास्तैलङ्गा रणं मुक्त्वा चलिताः ।
महाराष्ट्रा धृष्टा लग्नाः काष्ठासु सौराष्ट्रा भयेन पादे पतिताः ॥
चम्पा रणे कम्पिता पर्वताः कम्पिता उत्थायोत्थाय जीवं हरन्ति ।
काशीश्वरे राजनि कृतप्रयाणे विद्याधरो भणति मन्त्रिवरः ॥)

इति पद्मावती ॥

अथ कुण्डलिका ।

पूर्वोक्ताया दोहाया यद्येकमर्धमपरं चार्धं पूर्वोक्तलक्षणकाव्येन युक्तं तदिदं चतुश्चत्वारिंशदधिकशतमात्राभिः शृङ्खलायमकानुप्रासवद् गुणालङ्कारवत्कुण्डलिकाख्यं छन्दः । अत्र चाविरम्य कुण्डलिकारेण पठनात्कुण्डलिकेति संज्ञा । यन्मते दोहा द्विपदा तन्मतेनेयं षट्पदा, यन्मते दोहा चतुष्पदा तन्मते कुण्डलिकाष्टपदेति । यथा—

ढोल्ला मारिअ ढिल्लिमह मुच्छिअ मेच्छसरीर ।
पुर जज्जल्ला मन्तिबर चलिअ वीर हम्मीर ।

चलिअ वीर हम्मीर पाअभर मेइणि कम्पइ ॥
दिग मग णह अन्धार धूलि सूरजरह झम्पइ ।
दिग मग णह अन्धार आणु खुरसाणक ओल्ला ।
दमलिदअसु विपक्ख मारु ढिल्लीमह ढोल्ला ॥
(ढोलं ताडयित्वा दिल्लीमध्ये मूर्छयित्वा म्लेच्छशरीराणि ।
पुरो जज्जलो मन्त्रिवरश्चलति वीरो हम्मीरः ।
चलिते वीरे हम्मीरे पादभरेण मेदिनी कम्पते ॥
दिङ्मार्गनभःस्वन्धकारे धूली सूर्यरथं झम्पयति ।
दिङ्मार्गनभःस्वन्धकारे आनीताः खुरसानकाः पुरुषाः ।
दलितासुर्विपक्षस्ताड्यते दिल्लीमध्ये ढोलः ॥)

इति कुण्डलिका ॥

अथ मदनान्तकः ।

यत्र प्रतिपादे विंशत्यक्षराणि पञ्चविंशतिश्च मात्राः, तत्रापि प्रथममध्यतुर्मात्रिको गणः, अन्ते एको गुरुः, मध्ये यथासुखमिश्रिता गुरुलघवो स मदनान्तकः । यथा—

भञ्जिअ मलअ चोलवइ णिवलिअ गञ्जिअ गुज्जरा ।
मालवराअ मलअगिरिअ लुक्कि परिहरि कुञ्जरा ॥
खुरसाणा खलिअ रणमह अहिअ लङ्घिअसाअरा ।
हम्मीर चलिअ हारव पलिअ रिउगणह काअरा ॥
(भग्नो मलयश्चोलपतिर्निर्बलीकृतो गञ्जिता गुर्जराः ।
मालवराजो मलयगिरौ निलीनः परिहृत्य कुञ्जरान् ॥
खुरसानाः स्खलिताः रणमध्येऽहिता लङ्घितसागराः ।
हम्मीरे चलिते हारवाः पलायिता रिपुगणाः कातराः ॥)

इति मदनान्तकः ॥

अथ द्विपदी ।

आद्यन्तयोः षट्कलो गणो मध्ये चतुष्कलाश्चत्वारः । एवंविधपदद्वयरचिता द्विपदी । आदौ षट्कलस्ततः पञ्च चतुष्कलास्ततो गुरुरिति वा । यथा—

दाणव देव बेवि दुक्कन्तउ गिरिबरसिहर कम्पिअ ।
हअगअपाअघाअ उट्ठन्तउ धूलिहिं गअण झम्पिअ ॥
(दानवदेवाभ्यां द्वाभ्यामपि ढौक्यमानं गिरिवरशिखरं कम्पितम् ।
हयगजपादघातोत्थितधूलिभिर्गगनमाच्छादितम् ॥)

इति द्विपदी ॥

अथ खञ्जा ।

नव चतुर्लघवस्ततो रगण एवं दशभिर्गणैरेकोनचत्वारिंशदक्षरैरेकचत्वारिंशन्मात्राभिरर्धं यस्याः सा खञ्जा । द्वितीयमप्यर्धं तादृक् । यथा—

अहि ललइ महि चलइ गिरि खसइ हर खलइ
ससि घुमइ अमिअ वमइ मुअल जिवि उट्ठए ॥
पुणु धसइ पुणु खसइ पुणु ललइ पुणु घुमइ
पुणु वमइ जिविअ विविह समर परिदिट्ठए ॥
(अहिर्ललयति मही चलति गिरिः पतति हरः स्खलति
शशी घूर्णते अमृतं वमति मृता जीवित्वोत्तिष्ठन्ति ॥
पुनर्धर्षति पुनः स्खलति पुनर्ललति पुनर्घूर्णते
पुनर्वमति जीविता विविधं समरे परिदृश्यते ॥)

इति खञ्जा ॥

अथ शिखा ।

यत्र प्रथमार्धे षट् चतुर्लघवो द्वितीयार्धे सप्त उभयोरप्यन्ते जगणो भवति सा शिखा । यथा—

फुलिअ महु भमर वहु रअणि-
पहु किरणबहु अवअरु वसन्त ॥
मलअगिरिकुसुमधरि पवण वह
सहव कह सहि भण णिलअ णहु कन्त ॥
(पुष्पितमधुके भ्रमरवध्वो रजनीप्रभुः
किरणबहुरवतरति वसन्तः ॥
मलयगिरिकुसुमधरः पवनो वहति
सहे कथं सखि ! भण निलये न हि कान्तः ॥)

इति शिखा ॥

अथ माला ।

आद्यार्धे नव चतुर्लघवस्ततो रगणास्ततो द्वौ गुरू इत्येवं पञ्चचत्वारिंशन्मात्राः गाथोत्तरार्धेन द्वितीयार्धं सैषा माला । यथा—

वरिस जल भमइ घण मलअ सिअल पवण मणहरण
कणअ पिअरि णचइ बिजुरि फुल्लिआ णीवा ।
पच्छरविच्छुर हिअओ पिअओ णिलअं ण आवेइ ॥
(वर्षति जलं भ्रमति घनो मलयशीतलः पवनो मनोहरणः
पीता नृत्यति विद्युत्फुल्ला नीपाः ।
प्रस्तरविस्तरहृदयः प्रियो निलये नायाति ॥)

इति माला ॥

अथ चलिका ।

यदि दोहाच्छन्दसि प्रत्यर्धं लघुगुरुद्वयरूपाः पञ्चकला अधिका दीयन्ते, तथा दोहाच्छन्दसो मात्राः ४८ अधिकाश्च १०, एवं अष्टपञ्चाशन्मात्रा भवन्ति तदा चूलिका नामच्छन्दः । यथा—

राआ लुद्ध समाज खल बहु कलहारिणि सेबक धुत्तउ ।
जीबण चाहसि सुक्ख जइ परिहर घरजण बहुगुणजुत्तउ ॥
(राजा लुब्धः समाजः खलः वधूः कलहकारिणी सेवको धूर्तः ।
जीवने वाञ्छसि सुखं यदि परिहर गृहजनं बहुगुणयुक्तमपि ॥)

इति चूलिका ॥

अथ सौराष्ट्रा ।

अत्यस्तार्धा दोहैव सौराष्ट्रा । यथा—

सो माणिअ पुणमन्त जासु भत्त पण्डिअ तनअ ।
जासु घरिणि गुणमन्ति सो वि पुहवि सगाहणिलअ ॥
(स मान्यः पुण्यवान्यस्य भक्तः पण्डितस्तनयः ।
यस्य गृहणी गुणवती सोऽपि पृथिव्यां स्वर्गनिलयः ॥)

इति सौराष्ट्रा ॥

अथ काहलिः ।

सगणभगणचतुर्लघवो गणा गुरुश्चैको यत्र प्रतिपदं एकादशाक्षरश्चतुर्दशमात्रकश्च स काहलिः । यथा—

उचउत्थाणअ बिमलघरा तरुणी घरिणी बिणअपरा ।
बित्तकपूरलमुद्दघरा वरिसा समआ सुक्खकरा ॥
(उच्चोत्थानकं विमलं गृहं तरुणी गृहिणी विनयपरा ।
वित्तपूरितं मुद्रागृहं वर्षासमयः सुखकरः ॥)

इति काहलिः ॥

अथ मधुभारतम् ।

यत्र जगणान्तौ चतुर्मात्रौ (गणौ) प्रतिपादं तन्मधुभारतम् । यथा—

जसु चन्द सीस पिन्धणअ दीस ।
सो संभु पेउ महासुख देउ ॥
(यस्य चन्द्रः शीर्षे परिधानं च दिशः ।
स शंभुः पातु महासुखं ददातु ॥)

इति मधुभारतम् ॥

अथाभीरः ।

यत्र पादे जगणान्ता एकादशमात्राः स आभीरः । यथा—

सुन्दरि गुज्जरणारि लोअण दीहबिसारि ।
पीणपओहरभार लुल्लइ मोत्तिअहार ॥
(सुन्दरी गुर्जरनारी लोचनं दीर्घविसारि ।
पीनस्तनभारे लोलते मौक्तिकहारः ॥)

इत्याभीरः ॥

अथ दण्डकाहलः ।

चत्वारश्चतुर्मात्रास्ततः षण्मात्रस्ततश्चतुष्कलौ गुरुश्चेति द्वात्रिंशन्मात्रा यदोहण्डकाहलः । सर्वा अस्मिन्मात्राः १२८ । यथा—

राअह भग्गन्ता दिगन्तलगन्त परिहरि हअगअघररमणी,
लोरहि भरु सरबरु पअपरुपरिकरु लोटइ पडिअतनु धरणी ।
पुणु उट्ठइ संभरि करदत्तग्गुलिबालतणअकरजमलकरे,
कासीसर राआ णेहलुकाआ करु माआ पुण थप्पि धरे ॥
(राजानो भग्ना दिगन्तरलग्नाः परिहृत्य हयगजगृहरमणीः,
रोदनैर्भृत्वा सरोवरं पादपतितपरिकरा लोटन्ते पतिततनवो धरण्याम् ।
पुनरुत्तिष्ठन्ति सम्भृत्य करदत्ताङ्गुलिबालतनयकरयमलधराः,
काशीश्वरो राजा स्नेहलकायः कृत्वा मायां पुनः स्थापयित्वा धृतवान्॥)

इति दण्डकाहलः ॥

अथ दीपकम् ।

आदौ गुर्वन्तश्चतुष्कलस्ततो गुर्वन्तः पञ्चकलस्तत एको लघुरित्येवं पादघटितं दीपकम् । यथा—

जसु हत्थ करवाल बीपक्खकुलकाल ।
सिर सोह बरछत्त संपुण्ण ससिमत्त ॥
(यस्य हस्ते करवालो बिपक्षकुलकालः ।
शिरसि शोभते वरच्छत्रं सम्पूर्णशशिवत् ॥)

इति दीपकम् ॥

अथ सिंहावलोकः ।

यद्यादौ चतुष्कलसगणौ ततः षट्कला गुरुश्चेति षोडशमात्रापादः सिंहावलोकः । यथा—

हणु उज्जरगुज्जरराअ दलं
दलदलिअ चलिअ मरहट्ठबलम् ॥

बलमोलिश्रमालश्रराश्रकुला
कुलउज्जलकलचुलिकरणफुला ॥
(हतमुज्ज्वलगुर्जरराजदलं,
दरदलितचलितं महाराष्ट्रबलम् ।
बलमोटितमालवराजकुलः
कुलोज्ज्वलः कलचूरिः कर्णः स्फुरति ॥) इत्यलम् ।

इति सिंहावलोकः ॥

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः ।

एवं समादिवृत्तत्रयमभिधायेदानीं तेषामुत्पत्तिप्रदर्शनायाऽनुक्तानां च वृत्तानां कविप्रयोगेषु दृश्यमानानां सद्भावोपपत्तये प्रस्तारादयः षट्प्रत्यया व्याख्यातव्याः । प्रतीयते सङ्ख्यादिकमेभिस्ते प्रत्ययाः । सम्भावितेषु वृत्तेषु विश्वासापरपर्यायप्रत्ययख्यापकत्वाद्वा । ते च प्रस्तारायाः षट् । तदुक्तम्—

प्रस्तारो नष्टमुद्दिष्टमेकद्यादिलगक्रिया ॥
सङ्ख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १ ॥

तत्र नष्टोद्दिष्टादीनां प्रस्तारज्ञानाधीनत्वात्प्रस्तारं तावदाह—

पादे सर्वगुरावाद्यान्न्यूनं न्यस्य गुरोरधः ॥
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ॥

प्रस्तार्यवृत्तिजातिपादस्थवर्णसङ्ख्याकसर्वगुरौ पादे लिखिते सति तत्राद्यान्प्रथमाद् गुरोरधो लघुं स्थापयेत् । प्रथमत्वं च गुर्वपेक्षया न तु वर्णाऽपेक्षया । तथात्वे हि द्वितीयभेदे आद्यगुरोरभावात् तृतीयभेदानुपपत्तेः । तं लघुं न्यस्य यथोपरि पङ्क्तौ तथैवाधस्तनाधस्तनपङ्क्तौ, शेषं पादवर्णसङ्ख्यापूर्त्यवधि द्वितीयादिकं गुरुं लघुं वा लिखेत्, यत्रोपरि गुरुस्तत्राधस्तादपि गुरुर्यत्रोपरि लघुस्तत्राधस्तादपि लघुरित्यर्थः । भूयः पुनरमुं पूर्वोक्तं विधिं लेखनरूपं कुर्यात्तृतीयादिपङ्क्तौ गुरुमध्ये आद्यगुरोरधो लघुः शेषं चोपरिवदेवेत्यर्थः ॥ २ ॥

एवं सति तृतीये भेदे आद्यस्थानस्य शून्यत्वात् तत्र किं लेख्यमित्यत

आह—

ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत् ॥
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥ ३ ॥

ऊने न्यूने स्थाने गुरूनेव दद्याल्लिखेत् । बहुवचनमुत्तरोत्तरपङ्क्तावपि न्यूने गुरूणां प्राप्त्यर्थम् । ततश्च भूयःशब्दोऽपि वीप्सार्थो ज्ञेयः । तेन पुनः पुनर्गुर्वपेक्षया आद्याद् गुरोरधो लघुं लिखित्वा शेषमुपरिवदेव सम्पाद्य ऊने स्थाने गुरवो देया इत्यर्थः ।प्रस्तारकरणेऽवधिमाह-यावदिति । सर्वलघुः पादः प्रस्तारो वा यावद्भवमिति तावदेवं कुर्यात् । प्रस्तारोक्तिमुपसंहरति-प्रस्तारोयमिति । प्रस्तार्यते इति प्रस्तारः । प्रस्तार्यतेऽनेन च्छन्द इति वा । छन्दोविचितिश्छन्दःशास्त्रम् । तदुक्तम्—

स्थापयेल्लघुमधो गुरोः पुरः
स्याद्यथोपरि तथैव पूरयेत् ॥
पश्चिमं च गुरुभिः पुनः पुनः
सर्वलघ्ववधिरित्ययं विधिः ॥ इति ।

तदिदमुक्तादौ योज्यते । तत्रोक्तायां यथा—S, ।, (२) तस्या द्विविधविकल्पत्वात् । अत्युक्तायां यथा—SS, ।S, S।, ॥ (४) । मध्यायां यथा—SSS, ।SS, S।S, ॥S, SS।, ।S।, S॥, ॥। (८)। एते मगणादय एव सिद्ध्यन्ति । चतुरक्षरायां प्रतिष्ठायां यथा—SSSS, ।SSS, S।SS, ॥SS, SS।S, ।S।S, S॥S, ॥।S. SSS।, ।SS।, S।S।, ॥S।, SS॥, ।S॥, S।॥, ॥॥, (१६) एवं सर्वेषां समवृत्तानां प्रस्तारे कृते पूर्वपूर्वापेक्षया उत्तरोत्तरस्य द्विगुणा भेदा भवन्ति(१) । अत्र मामकः सङ्ग्रहश्लोकः—

पादं सर्वगुरुं लिखेन्मुखगुरोश्चाधो लघुं पूर्ववत्—
च्छेषं मूलगुरोः पुनर्लघुमधो शेषं पुनः पूर्ववत् ॥
ऊने न्यस्य गुरूनशेषलघुकं पादं च यावत्पुनः
कार्योऽयं विधिरित्यचीकलृपदमूं नारायणः प्रस्तुतिम् ॥

इति समप्रस्तारः ॥

---

(१) वर्णप्रस्तारज्ञानोपयोगिकोष्ठकानि ।

(१) उक्तायां यथा—

S, प्रथमो भेदः ।
।, द्वितीयो भेदः ।

(२) अत्युक्तायां यथा—

SS, प्रथमः ।
।S, द्वितीयः ।
S।, तृतीयः ।
।।, चतुर्थः ।

अथार्धसमप्रस्तारः ।

अर्धसमेषु त्वर्धस्यैव पादतां प्रकल्प्य प्रस्तारः कार्यः, पाद इत्यस्योपलक्षणत्वात् । तदुक्तम्—'अर्धसमस्य प्रस्तारेऽर्धप्रस्तारः कार्यः' इति । तद्यथा—द्यक्षरपादे च्छन्दसि पादद्वयरूपस्यार्धस्य पादताकल्पनया चतुरक्षरपूर्वोक्तप्रस्तारवत्प्रस्तारे द्यक्षरच्छन्दसः षोडश भेदाः । तत्र प्रथम ऽ ए १६ १६
ऽऽऽऽ. षष्ठ । ऽ।ऽ, एकादश ऽ।ऽ।, ।।।।, षोडशानां भेदानां समवृत्तभेदत्वेनार्धसमभेदकत्वात्तान्परित्यज्य शुद्धार्धसमप्रस्तारः सिद्धो भवति । तदुक्तम्-"प्रस्तुतभेदकारी विकल्पः प्रस्तारक्रमायातोऽपि वर्जनीयः" इति। सङ्ख्यायां तु गणना कार्यैव । अन्यथा नष्टोद्दिष्टाद्यसिद्धेः । ततश्च द्वादश १।२ २।३ ३।४ ४।५ ५।७ ६।८ ७।९
शुद्धार्धसमभेदाः । यथा—।ऽऽऽ, ऽ।ऽऽ, ॥ऽऽ, ऽऽ।ऽ, ऽ॥ऽ, ॥।ऽ, ऽऽऽ।, ८।१० ९।१२ १०।१३ ११।१४ १२।१५
।ऽऽ।, ॥ऽ।, ऽऽ॥, ।ऽ॥, ऽ।॥, एवमन्यत्रापि योज्यम् ।

इत्यर्धसमप्रस्तारः ॥

---

(३) मध्यायां यथा—

ऽऽऽ, प्रथमः ।
।ऽऽ, द्वितीयः ।
ऽ।ऽ, तृतीयः ।
।।ऽ, चतुर्थः ।
ऽऽ।, पञ्चमः ।
।ऽ।, षष्ठः ।
ऽ।।, सप्तमः ।
।।।, अष्टमः ।

(४) प्रतिष्ठायां यथा—

ऽऽऽऽ, प्रथमः ।
।ऽऽऽ, द्वितीयः ।
ऽ।ऽऽ, तृतीयः ।
।।ऽऽ, चतुर्थः ।
ऽऽ।ऽ, पञ्चमः ।
।ऽ।ऽ, षष्ठः ।
ऽ।।ऽ, सप्तमः ।
।।।ऽ, अष्टमः ।
ऽऽऽ।, नवमः ।
।ऽऽ।, दशमः ।
ऽ।ऽ।, एकादशः ।
।।ऽ।, द्वादशः ।
ऽऽ।।, त्रयोदशः ।
।ऽ।।, चतुर्दशः ।
ऽ।।।, पञ्चदशः ।
।।।।, षोडशः ।

अथ विषमप्रस्तारः ।

विषमाणां तु प्रस्तारे पादचतुष्टयात्मकस्य छन्दसः पादस्थानीयत्वं प्रकल्प्य प्रस्तारः कार्यः । उक्तं हि—"विषमप्रस्तारे पादचतुष्टयस्य प्रस्तारः कार्यः" इति । यथा-द्व्यक्षरस्य विषमवृत्तस्य पादकल्पनायां सर्वगुरोः SSSSSSSSपूर्ववदाद्यगुरोरधो लघुं विन्यस्य यथोपरीति गुरुसप्तकं लिखित्वा भूयः कुर्यादिति द्वितीयप्रस्ताराद्यगुरोरधो लघुः परतो यथोपरीति कृत्वा ऊने गुरून्दद्यात् । एवं सर्वलघुप्रस्तारं यावत्कृते षट्पञ्चाशदधिकं शतद्वयं भेदाः । तेषां मध्ये पूर्ववत्समार्धसमरूपत्वेन प्रस्तुतविषमप्रस्तारभेदकारित्वात्प्रथमः द्वितीयाच्च सप्तदशः सप्तदशोऽन्त्यं यावद्वर्जनीयाः । ते च यथा—प्रथमः S S S S S S S S, अष्टादशः I S S SIS S S, पञ्चत्रिंशः SISSSISS, द्विपञ्चाशः IISS II SS, एकोनसप्ततिः SS I SSS I S, षडशीतिः ISISISIS, त्र्यधिकशतं SIISSIIS, त्रिंशत्यधिकशतं IISIIISI, सप्तत्रिंशदधिकशतं SSSI SSSI, चतुःपञ्चाशदधिकशतं ISSIISSI, एकसप्तत्युत्तरशतं SISISISI, अष्टाशीत्यधिकशतं IISIIISI, पञ्चोत्तरद्विशतं SSIISSII, द्वाविंशत्युत्तरद्विशतं ISIIISII, एकोनचत्वारिंशदधिकद्विशतं SIIISIII, षट्पञ्चाशदधिकद्विशतसङ्ख्या I I I I I I I I, एवं षोडश । एषां मध्ये प्रथम SSSSSSSS, षष्ठ ISISISIS, एकादश SISISISI, षोडशाः I I I I I I I I समभेदाः । अन्ये द्वादशार्धसमभेदाः । शेषाश्चत्वारिंशदधिकशतद्वयं शुद्धविषमभेदाः । एवं सर्वत्र विषमेषु प्रस्तारभेदो ज्ञेयः ।

इति विषमप्रस्तारः ॥

अथ मात्राप्रस्तारः ॥

मात्राप्रस्तारे तूपरिपङ्क्तौ यथायोग्यं मात्राद्वयद्वयस्थाने एकैकगुरुक्रमेण गुरूंल्लिखित्वा प्रथमगुरोरधो लघुं लिखित्वा शेषमुपरिपङ्क्तिवत्कुर्यात् । एवं सत्येका मात्रा न्यूना भवति, सा लघोः पूर्वं लघुरूपेण देया । तृतीयपङ्क्तौ प्रथमगुरोर्लघुं दत्त्वा शेषमुपरिवल्लिखित्वा न्यूनास्तिस्रो मात्राः, ता लघुगुरुरूपेण लघोः पूर्वं देयाः । एवंक्रमेणाद्यगुरोरधो लघौ दत्ते उपरिवच्छेषे लिखिते शेषा मात्रैका चेदाद्यलघोः पूर्वं लघुरूपेण देया । द्वे चेच्छेषे तदा तत एव पूर्वं गुरुरूपेणैव । एवं युग्मा गुरुरूपेणवेति । तिस्रश्चेत्तदा एको लघुरेको गुरुश्चेति । पञ्च चेत्तदा एको लघुर्द्वौ गुरू चेत्येवंक्रमेण सर्वलघुप्रस्तारपर्यन्तं लिखेत् अत्रैवं कृते पूर्वोक्तषट्कलत्रयोदशगणप्रस्तारः । यथा—[1]SSS, [2]IISS, [3]ISIS, [4]SIIS, [5]IIIIS, [6]ISSI, [7]SISI, [8]IIISI, [9]SSII, [10]IISII, [11]ISIII, [12]SIIII, [13]IIIIII (१३)

पञ्चकलस्य सर्वगुरुभेदाभावादादिलघ्वाद्या एव भेदाः । यथा—[1]ISS,

२ ३ ४ ५ ६ ७ ८
ऽ।ऽ, । । ।ऽ, ऽऽ।, ।।ऽ।, ।ऽ।।, ऽ। । ।, । । । । । एवमन्यत्रापि । विषम कलप्रस्तारेष्वादौ लघुं दत्त्वा प्रस्तारः कार्य इति(१) ॥ ३ ॥

इति प्रस्तारः ॥

अथ नष्टम् ।

अथ प्रस्तारपरिशोधनोपयोगि नष्टमाह—

नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धे समे च लः ॥
विषमे चैकमाधाय स्यादर्धेऽर्धे गुरुर्भवेत् ॥ ४ ॥

अङ्क इत्यतः परं तत्रेत्यध्याहार्यम् । ततश्च नष्टस्य वृत्तस्य योऽङ्कस्तत्र समे सति लो लघुर्लेख्यः, तस्य चार्धेऽर्धे कृतेऽर्धाङ्के समे सति लघुर्विषमे त्वर्धीकरणाशक्तेरेकमधिकं क्षिप्त्वार्धयेत् । नष्टस्याङ्के विषमे सति गुरुर्भवेल्लेख्य इत्यर्थः, तदनन्तरं तस्मिन्विषमे एकमधिकमाधाय संयोज्य योऽङ्को जातस्तस्यार्धे विषमे सति गुरुः, समे तु लघुः । विषमे त्वर्धीकरणाशक्तेरेकमधिकं प्रक्षिप्यार्धयेत् । तस्मिन्नप्यर्धे विषमे गुरुः समे लघुरित्येवं विवक्षितनष्टवृत्ताक्षरसङ्ख्यापूरणं यावत्कुर्यात् । अर्धेऽर्धे इत्युभयत्र वीप्सया पुनः पुनः करणं सूचितम् । यथा व्यक्षरे पञ्चमं वृत्तं की-

---

(१) मात्राप्रस्तारज्ञानोपयुक्तं कोष्ठकम् ।

पञ्चकलपर्यन्तं यथा—

१	२	३	४	५	मात्राः
।	ऽ	।ऽ	ऽऽ	।ऽऽ	१
	।।	ऽ।	।।ऽ	ऽ।ऽ	२
		।।।	।ऽ।	।।।ऽ	३
			ऽ।।	ऽऽ।	४
			।।।।	।।ऽ।	५
				।ऽ।।	६
				ऽ।।।	७
				।।।।।	८

षट्कलप्रस्तारो यथा—

ऽऽऽ	१	।।।ऽ	५	ऽऽ।।	९
।ऽऽ	२	।ऽऽ।	६	।।ऽ।।	१०
।ऽ।ऽ	३	ऽ।ऽ।	७	।ऽ।।।	११
ऽ।।ऽ	४	।।।ऽ।	८	ऽ।।।।	१२
				।।।।।	१३

द्वगिति प्रश्ने कृते पञ्चमाङ्कस्य विषमत्वाद् गुरुं विन्यस्य सैकस्यार्धे त्र्यङ्कस्य विषमत्वाद् गुरुरेव। पुनः सैकस्यार्धे द्व्यङ्कस्य समत्वाल्लघुरिति। यथा—ऽऽ।. सोऽयं पञ्चमस्तगणः(१)। समोदाहरणं यथा चतुरुत्तरप्रस्तारे चतुर्थं वृत्तं कीदृगिति प्रश्ने समत्वाल्लघुस्तदर्धेऽङ्के द्व्यङ्के पुनर्लघुः शिष्टे द्व्यङ्केऽर्धित एकस्याऽसमत्वाद् गुरुः शिष्टैकाङ्के सैकेऽर्धिते पुनर्गुरुर्यथा—॥ऽऽ. एवं सर्वत्र (२)प्रथमे भेदे प्रथमाङ्कस्य विषमत्वात्सकार्धतायामपि विषमत्वात्सर्वगुरुता।

इति समनष्टम्॥

अथार्धसमनष्टम्।

अर्धसमानां तु नष्टे पूर्वोदाहृतद्व्यक्षरपादार्धसमप्रस्तारे पञ्चमो भेदः कीदृगिति प्रश्ने पञ्चानां विषमत्वाद् गुरुः, सैकेऽर्धे त्रयाणां विषमत्वात्पुनर्गुरुः, सैकेऽर्धे द्वयोः समत्वाल्लघुर्द्वयोरर्धे विषमत्वाद् गुरुरिति सिद्धमर्धम् ऽऽ।ऽ द्वितीयार्धेऽप्येवमेव। अत्र यदि समार्धसमयोः संसृष्टत्वं तदा पञ्चमत्वम्, यदा तु शुद्धार्धसमगणना तदा प्रथमस्य सर्वगुरोः सम-

---

(१) यथा—

वृत्तजातिः	पृष्टो भेदः
३ अक्षरा	५ मः

५ अस्याङ्कस्य विषमत्वाद् गुरुं विन्यस्य

५+१=६ सैके

३ अर्धिते तस्य विषमत्वाद् गुरुं विन्यस्य

३+१=४ सैके

२ अर्धिते तस्य समत्वाल्लघुं विन्यस्य अविशिष्टे द्व्यङ्के न क्रिया जातेस्त्र्यक्षरात्वात्। एवं च जातं पञ्चमरूपं ऽ ऽ।, इति।

(२) यथा—

वृत्तजातिः	पृष्टो भेदः
४ अक्षरा	४ र्थः

४ अङ्कस्य समत्वाल्लघुं विन्यस्य

२ तस्मिन्नर्धिते तस्य समत्वाल्लघुं विन्यस्य

१ तस्मिन्नर्धिते तस्य विषमत्वाद् गुरुं विन्यस्य

१+१=२ सैके

१ अर्धिते तस्य विषमत्वाद् गुरुं विन्यसेत्।

एवं च जातं चतुर्थं रूपं।। ऽ ऽ इति।

त्वात्यागे चतुर्थता। नष्टसिद्धिस्तु संवलितसङ्ख्ययैवेत्युक्तं प्राक्, एवं सर्वत्रापि।

इत्यर्धसमनष्टम्॥

अथ विषमनष्टम्।

विषमाणां नष्टे तु द्व्यक्षरविषमवृत्तस्य चतुर्थो भेदः कीदृगिति प्रश्ने उक्तविधाविधाने ॥SSSSSS अयं चतुर्थः। अत्रापि समार्धसमसंवलनेन चतुर्थता, शुद्धविषमभेदेषु तु प्रथमस्य समार्धसमतया त्यक्तत्वात्तृतीयता। एवं सर्वेष्वर्धसमविषमेषु योज्यम्।

इति विषमनष्टम्॥

अत्र मदीयः सङ्ग्रहश्लोकः—

पृष्टाङ्के विषमे समे गुरुलघू युग्मे तथैकाधिका
युग्मेऽर्धे विषमे समे गुरुलघू भूयोऽवशिष्टेऽर्धिते॥
तद्वन्न्यस्य विवक्षितान्गुरुलघून्यावद्विदध्यादिदं
श्रीरामेश्वरभट्टसूनुरकरोन्नष्टे विधामीदृशीम्॥

अथ मात्रावृत्ते नष्टम्।

तत्र लाघवार्थं षण्मात्रप्रस्तारे उदाहरणमुच्यते। षण्मात्रप्रस्तारेषु सप्तमस्थाने कीदृशो गणोऽस्तीति प्रश्ने षडपि कलास्तावत्पृथक्स्थापनीयाः। तत्र प्रथमकलोपर्येकाङ्कं देयः, द्वितीयकलायां द्व्यङ्क एव, एकाङ्कात्पूर्वं कस्यचिदङ्कस्याभावेनैकीकरणासम्भवात्। एककलोपर्यङ्कं द्वितीयकलोपर्यङ्कं चैकीकृत्य त्र्यङ्कं तृतीयकलोपरि, द्व्यङ्कत्र्यङ्कावेकीकृत्य पञ्चाङ्कं चतुर्थोपरि, त्र्यङ्कपञ्चाङ्कावेकीकृत्याष्टाङ्कं पञ्चमोपरि, पञ्चाष्टौ चैकीकृत्य त्रयोदशाङ्कं षष्ठोपरि विन्यसेत्। यथा—

१	२	३	५	८	१३
।	।	।	।	।	।

एवं सर्वत्र पूर्वपूर्वकलाद्वयोपरिस्थाङ्कमेकीकृत्य परपरकलासु न्यसेत्। एवं कृते पृष्टाङ्कमन्तिमकलोपर्यङ्कं लोपयेत्। अवशिष्टाङ्कऽस्य वहितपूर्वापूर्वतरमेवाङ्कं यथासम्भवं लुम्पेत्। तत्र यस्य यस्याङ्कस्य लोपो भवति तत्तदधस्तनकलास्वग्रिमकलामादाय गुरुतामेति। एवं यावत्सम्भवं कुर्यात्। प्रस्तुते पृष्टं सप्ताङ्कं त्रयोदशाङ्के विलोप्यावशिष्टषडङ्केऽष्टौ न लुप्यन्त इति पञ्च लोपयेत्, अवशिष्टे एकाङ्के त्रयो द्वौ वा न लुप्येते इति एकाङ्कस्य लोपे शून्यता। एवं कृते पञ्चमैकाङ्कलुप्तत्वात्तदधस्तने मात्रे चतुर्थप्रथमे पञ्चमद्वितीयमात्रे आदाय गुरुतां गच्छतः। एवं कृते सिद्धः षट्कलः सप्तमप्रस्तारः।

१	३	५	१३
ऽ	।	ऽ	।
२		८	

एवं मात्रावृत्तेषु सर्वेषु ज्ञेयम् । वह्वङ्कवृद्धिप्रसङ्गात्तु नोदाहृतमस्माभिः । यदाहुः—

नष्टे सर्वाः कलाः कार्या अङ्कन्यासस्तु पूर्ववत् ।
पृष्ठोऽङ्कः शेषके लोप्यः परोऽप्यङ्कोऽत्र लुप्यते ॥
यस्य यस्य भवेल्लोपो व्युत्क्रमेण पुनः पुनः ।
तदधो गुरुतामेति परया कलया सह ॥ इति ।

उद्दिष्टस्य रीतेः पूर्वमुक्त्वापूर्ववदिति । उद्दिष्टवदित्यर्थः । आर्याया मात्रावृत्तत्वादनया रीत्या नष्टसिद्धावपि तन्मात्रविषयो लघुरुपाय आर्याप्रकरणे प्रसङ्गादस्माभिरुक्तः ॥ ४ ॥

इति नष्टम् ॥

अथोद्दिष्टम् ।

अथ प्रस्तारशोधनायोपयुक्तमुद्दिशति—

उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान्समालिखेत् ॥
लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ५ ॥

आद्यादक्षरादारभ्योपर्याद्यादेकाङ्कादारभ्य द्विगुणान्द्विगुणानङ्कानुत्तरोत्तरं लिखेत् । तत्र लेखने कृते सति लघुलेखोपरिस्था येऽङ्कास्तैर्मिश्रितैर्यथास्थानं योजितैरेकेनाधिकेन सहितरुद्दिष्टं भवेदिति आद्यद्विगुणशब्दयोरावृत्त्या व्यवहितान्वयेन च व्याख्येयम् । उपरीत्युपलक्षणम् । अधोलेखनेऽप्यक्षतेः । यथा—त्र्यक्षरे प्रस्तारेऽन्तगुरुभेदः कतिथ इति प्रश्ने न्यासः—

१	२	४
।	।	ऽ

अत्र लघुस्थैकाङ्कद्वयङ्कमेलने त्रय एकसहिताश्चत्वारो भवन्ति, ततश्च तुर्थभेदं कथयेत् । एवं चतुरक्षरे आद्यन्तगुरुः कतिथ इति प्रश्ने न्यासः—

१	२	४	८
ऽ	।	।	ऽ

अत्र लघुस्थाभ्यां द्व्यङ्कचतुरङ्काभ्यां सैकाभ्यां सप्त भवन्ति, ततः सप्तमोऽयं भेदः । एवं सर्वत्र ।

इति समोद्दिष्टम् ॥

अथार्धसमोद्दिष्टम् ।

अर्धसमेऽपि चतुरक्षरार्धे ऽ ऽ । ऽ. अयं प्रस्तारः किंसङ्ख्याक इति प्रश्ने न्यासः—

१	२	४	५
ऽ	ऽ	।	ऽ

लघुस्थे चतुरङ्के सैके पञ्चमो भेदः समार्धसमसंसृष्टतायाम्, शुद्धार्धसमेषु पूर्वन्यायेन चतुर्थः । एवं सर्वत्र ।

इत्यर्धसमोद्दिष्टम् ॥

अथ विषमोद्दिष्टम् ।

विषमेष्वपि द्व्यक्षरपादकविषमवृत्ते । । ऽ ऽ ऽ ऽ ऽ ऽ. अयं भेदः
१ २ ४ ८ १६ ३२ ६४ १२८
कतम इति प्रश्ने न्यासः । यथा । । ऽ ऽ ऽ ऽ ऽ ऽ. अत्र लघुस्थावेक-द्व्यङ्कौ सैकौ चत्वारस्तावत्सङ्ख्याकं समार्धसममेलनेन जानीयात्, शुद्धविषमेषु तु तृतीयम् । एवं सर्वेषु विषमेषु ज्ञेयम् । अत्र सङ्ग्रहश्लोकः—

प्रथमाद् द्विगुणानङ्कान्प्रस्ताराद्यादुपर्यधो वास्येत् ।
लघुगरङ्कः सैकैर्मिलितैरुद्दिष्टमुद्दिष्टम् ॥

इति विषमोद्दिष्टम् ॥

अथ सूत्रोक्तोद्दिष्टप्रकारः ।

सूत्रे तृद्दिष्टे प्रकारान्तरमुक्तम् । यद्वृत्तं जिज्ञासेत्तत्तद्भूमौ प्रस्तार्य तन्मध्यस्थलघुषु योऽन्त्यो लघुस्तदुपर्यधो वैकाङ्कं लिखित्वा तत्रैव तं द्विगुणयेत् । ततस्तत्पूर्वस्मिन्गुरौ लघौ वा तमङ्कं द्विगुणितं कृत्वा पूर्ववन्न्यसेत् । यदा त्वेवंप्रकारे क्रियमाणे गुरुमापद्यते सङ्ख्या तदा तन्मध्ये एकं त्यक्त्वा पुनरुत्तरोत्तरं द्विगुणितं कृत्वा गुरुस्थाने एकं त्यक्त्वा पुनर्द्विगुणनादिक्रमेण यावत्प्रस्तारपूर्ति कुर्यात्, एवं कृते या सङ्ख्या सम्पद्यते तावतिथं तद् वृत्तं जानीयात् । यथा चतुरक्षरे गुरूलघू द्वौ गुरू चेति वृत्तं कतिथमिति प्रश्ने न्यासः—

३	२		
ऽ	।	ऽ	ऽ
४	१		

अत्र लघ्वधःसङ्ख्याङ्कं द्विगुणयेत्, तं च पूर्वस्मादुरोरधो द्विगुणितं चतुरङ्कं विलिख्य गुरुस्थसङ्ख्यान्वादेकं जह्यात् । अवशिष्टस्त्र्यङ्कस्तावतिथं वृत्तमिति ।

इति सूत्रोक्तोद्दिष्टप्रकारः ॥

अथ मात्रावृत्ते उद्दिष्टम्।

उद्दिष्टवृत्तप्रस्तारं कृत्वा प्रथमकलायां प्रथमाङ्कं दद्यात्, द्वितीयकलायां नष्टन्यायेन द्व्यङ्कम्, ततस्तृतीयकलायामेकद्व्यङ्कौ मेलयित्वा त्र्यङ्कम्, चतुर्थ्यां द्वित्र्यङ्कौ मेलयित्वा पञ्चाङ्कमित्येवं पूर्वपूर्वाङ्कद्वयमेलनं कृत्वोत्तरोत्तरकलायां न्यसेन्नष्टवत्। गुरौ तु मात्राद्वयस्य वर्तमानत्वादङ्कासङ्करार्थमेकोऽङ्क उपरि देयो द्वितीयस्त्वध इति विशेषः। एवमङ्केषु स्थापितेष्वन्यकलायां योऽङ्कस्तन्मध्ये गुरुशिरसि स्थिता येऽङ्कास्तानेकीकृत्य पातयेत्, अवशिष्टाङ्कसङ्ख्यां पृष्टवृत्तस्य जानीयात्। यथा—आद्यन्तगुरुः षट्कलप्रस्तारः कतिथ इति पृष्टे न्यासः—

१	३	५	८
ऽ	।	।	ऽ
२			१३

अत्र गुरुशिरस्येकाङ्काष्टाङ्कौ मिलितौ नव तेऽन्यकलास्थत्रयोदशस्वपनेयाः, अवशिष्टाश्चत्वारः। सा सङ्ख्योद्दिष्टप्रस्तारस्य। एवं सर्वेषु मात्रावृत्तेष्वपि ज्ञेयम्।

इति मात्रोद्दिष्टम्॥

तदुक्तम्—

पूर्वस्यां प्रथमः समोऽङ्क उपरि स्थाप्यो युगायां द्वयं
संयुज्यकयुगौ त्रयं त्रिषु कलामूर्ध्नि द्वयेन त्रयम्॥
एकीकृत्य च पञ्चकं जलनिधावेवं कृते लुप्यते
शिष्टे तद्गुरुमूर्धकाङ्क इह चेदुद्दिष्टबोधस्तदा॥ इति।
आर्यासु तु प्रकारान्तरमपि तत्प्रकरण एवाभ्यधायि॥ ५॥

इत्युद्दिष्टप्रकरणम्॥

अथैकद्व्यादिलगक्रिया।

अथोक्तादिषु सर्वगुर्वेकलघुद्विलघुत्रिलघ्वादिपादकवृत्तकथनद्वारा प्रस्तारशोधनायैकद्व्यादिलगक्रियामाह—

वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितान्॥
एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत्॥ ६॥
उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः॥
उपर्याद्याद्गुरोरेकमेकद्व्यादिलगक्रिया॥ ७॥


उक्तादिवृत्तनिष्ठान्वर्णान्वर्णसङ्ख्याकानङ्कान्सैकानेकेनाधिकेन सहितानौत्तराधर्यत उत्तराधरभावेन स्थितान्कुर्यादित्यध्याहारः। औत्तराधर्यत इति "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (पा०स०५-१-१२४)

इति ब्राह्मणादित्वाद्भावे ष्यञ्। ततस्तसिः। एतान्पूर्वस्थापितानङ्कानेकद्व्यादिक्रमेणोपर्युपर्यङ्के निक्षिपेन्मेलयेत्। मेल्यमानाङ्कसमसङ्ख्याया उपरि क्षेपो मेलनं, न तु स्वस्यैव। स्वरूपतस्तत्स्थाने शून्यताप्रसक्त्या द्वितीयादिमेलनावृत्त्यभावापत्तेः। अधस्तनमेकाङ्कं तदुपर्येकाङ्के मेलयित्वा द्व्यङ्कं कुर्यात्, तं तृतीयैकाङ्के संयोज्य त्र्यङ्कं कुर्यादित्येवमुत्तरोत्तरं कुर्यादित्यर्थः। उपान्त्यस्याप्यन्तमेलने प्रसक्तेऽपवादमाह—उपान्त्यत इति। उपान्त्यपर्यन्तं मेलनं कृत्वा तमन्त्येऽमेलयित्वैवं प्रत्यावृत्त्येकैकं त्यजन्निवर्तेत विरमेत्। अन्त्यश्च प्रथममेलने सर्वोपरितनः, द्वितीयमेलनावृत्तौ तदधोभावी द्वितीयः, तृतीयावृत्तौ तदधोभावी तृतीय इत्येवमुत्तरोत्तरो ज्ञेयः। उपान्त्यश्चान्त्याधोभावी। प्रतिमेलनावृत्तकमेकमङ्कं त्यक्त्वाऽधस्तनान्मेलयेदिति फलितार्थः। एकैकमिति वीप्सया सर्वाधस्तनाङ्कपर्यन्तं पुनःपुनर्मेलनावृत्तिः कार्येत्यसूसुचत्। सिद्धमाह—उपरीति। एवं कृत आद्यात्प्रथमाद् गुरोः सर्वगुरोर्भेदादुपर्यनन्तरमेकद्व्यादीनां लघूनां क्रिया ज्ञेयेति शेषः। प्रथममेकः सर्वगुरुस्तदधस्तनाङ्कसङ्ख्या एकलघवः तदधोऽङ्कसङ्ख्या द्विलघवः, चतुर्थाङ्कसङ्ख्यास्त्रिलघवः, एवमधोभाव्यङ्कसङ्ख्याश्चतुर्लघ्वादिभेदा ज्ञेया इत्यर्थः। एवं प्रथमः सर्वगुरुः, द्वितीयाङ्के एकगुरवः, तृतीयाङ्के द्विगुरवः, चतुर्थाङ्के त्रिगुरवः, इत्यादिप्रकारेण गुरुक्रिया। अत्र त्र्यक्षरे उदाहरणं १. १. १. १. एवं सैकान्वृत्तवर्णसङ्ख्यानेकाङ्कान्न्यसेत्। चतुरक्षरे च यथा—१. १. १. १. १. ततोऽधस्तनमेकाङ्कं तदुपरिस्थैकाङ्के संयोज्य द्व्यङ्कं कुर्यात्। यथा—त्र्यक्षरे १. १. २. १ चतुरक्षरे च यथा—१. १. १. २. १. द्वितीयं तृतीये मेलयेत्। आद्ये यथा—१.३.२.१. द्वितीये यथा—१. १. ३. २. १. तृतीयं चतुर्थे मेलयेत्। चतुरक्षरोदाहरणे १. ४. ६. ३. २. १.। त्र्यक्षरे तु न मेलयेत्। उपान्त्यतो निवर्तेतेत्युक्तेः। पुनस्त्र्यक्षरेऽधस्तनं द्वितीये मेलयेत्। यथा—१.३.३.१. त्र्यक्षरे एतावतैव सिद्धिः चतुरक्षरे त्वधस्तनं द्वितीये मेलयेत्। यथा-१. ३. ३. ४. १. द्वितीयं तृतीये यथा-१.४. ६. ४. १. ततो मेलनं नास्ति। एवं त्र्यक्षरे एकः सर्वगुरुर्भेदः, त्रय एकलघवः, त्रयो द्विलघवः, एकः सर्वलघुरिति। गुरुक्रियायां त्वेकः सर्वगुरुः, त्रय एकगुरवः, त्रयो द्विगुरवः, एकः सर्वलघुरिति सिद्धम्। चतुरक्षरे एकः सर्वगुरुः--ऽ ऽ ऽ ऽ. चत्वार एकलघवः—। ऽ ऽ ऽ (१), ऽ । ऽ ऽ (२), ऽ ऽ । ऽ (३), ऽ ऽ ऽ । (४), षट् द्विलघवः—।। ऽ ऽ (१), । ऽ । ऽ (२), ऽ ।। ऽ (३), । ऽ ऽ । (४), ऽ । ऽ । (५), ऽ ऽ ।। (६), चत्वारस्त्रिलघवः—।।। ऽ (१), ऽ ।।। (२), । ऽ ।। (३), ।। ऽ । (४), एकः सर्वलघु भेदः—।।।।. एवं गुरुभेदा अपि। एवं सर्वत्र।


इति समलगक्रिया॥

समवृत्तलगक्रियाज्ञानोपयुक्तानि कोष्ठकानि । तत्रोक्तायां द्विमात्रविकल्पतया न कोष्ठकापेक्षा । अग्रे च गायत्रीपर्यन्तं दिङ्मात्रदर्शनाय कोष्ठकानि लिखितानि । उष्णिगादिष्वप्येवमेवोन्नेयानि ।


अत्युक्तायां यथा-




मध्यायां यथा-




प्रतिष्ठायां यथा-



सुप्रतिष्ठायां यथा-



गायत्र्यां यथा



अथार्धसमलगक्रिया।

अर्धसमे तु विशेषः। द्व्यक्षरार्धसमानां षोडश भेदाः पूर्वोक्तरीत्या। तन्मध्ये प्रथमषष्ठैकादशषोडशांश्चतुरो भेदान्हापयेत्। यथा—चतुरक्षरप्रस्तारे एकद्व्यादिलगक्रियायां कृतायां प्रथमान्त्यौ त्याज्यौ समत्वात्, षष्ठैकादशौ द्विलघुत्ववृत्तसङ्ख्याबोधके षडङ्के त्याज्यौ। एवं कृते न्यासः ४ ४ ४, ततश्चत्वार्येकलघूनि, चत्वारि द्विलघूनि, चत्वारि त्रिलघूनि वृत्तानीति द्व्यक्षरार्धसमभेदा द्वादश। एवमन्यत्राप्येकद्व्यादिलघुकान्समभेदानेकद्व्यादिलघुकवृत्तसङ्ख्याबोधकाङ्के पातयित्वाद्यान्त्यौ च भेदौ त्यक्त्वाऽवशिष्टाङ्कैरेकद्व्यादिलगक्रियाऽर्धसमेपूह्या।

इत्यर्धसमलगक्रिया॥

अथ विषमलगक्रिया।

विषमेषु तु द्व्यक्षरपादस्य कथ्यते। अष्टाक्षरजातेस्तावदेकद्व्यादिलगक्रियायां पूर्वोक्तरीत्या कृतायां न्यासः। १। ८। २८। ५६। ७०। ५६। २८। ८। १। अत्र समार्धसमरूपत्वात्प्रस्तारकरणोक्तप्रकारेण षोडश भेदा यथास्थानं पात्याः। यथा एकलघवो हेयेषु न सन्ति, द्विलघवश्चत्वारस्तदीयेऽष्टाविंशत्यङ्के हेयाः, त्रिलघवो हेयेषु न सन्त्येव, चतुर्लघवः षट् सप्तत्यङ्के हेयाः, पञ्चलघवस्तु हेयेषु न सन्त्येव, षट्लघवश्चत्वारोऽष्टाविंशत्यङ्के हेयाः, सप्त लघवो न सन्तीति आद्यान्त्यौ चैकाङ्कौ त्याज्यौ। एवं कृते द्व्यक्षरविषमस्य एकद्व्यादिलगक्रियाङ्कन्यासः—८। २४। ५६। ६४। ५६। २४। ८। अत्राष्टावेकलघवश्चतुर्विंशतिः द्विलघव इत्यादि पूर्ववत्कथनीयम्। एवमन्येष्वपि विषमेष्वपि ज्ञेयम्।

इति विषमलगक्रिया॥

सङ्ग्रहश्लोकः—

छन्दोवर्णमितानुपर्यधरगान्सैकान्मुखाङ्कांल्लिखे-
देकैकं शिरसि त्यजन्नधरगानूर्ध्वेषु संयोजयेत्॥
भेदः सर्वगुरुर्मुखे तदनु चैकद्व्यादिलघ्वन्विता
प्रान्ते सर्वलघुः क्रिया लघुगतैवं स्याद् गुरूणामपि॥

अथ भास्कराचार्योक्तो लगक्रियाप्रकारः।

भास्कराचार्यैस्तु लीलावत्यां लघुगुरुक्रियायां प्रकारान्तरमभ्यधायि। तदुच्यते—वृत्तपादाक्षरसङ्ख्याङ्कानेकाद्यङ्कानुपरि व्युत्क्रमेण विन्यस्य

११३	सुशर (टी०)	१३५
११४	सूर्य (टी०)	१३५
११५	सोत्कण्ठ (टी०)	१०६
५१६	सौरभक (टी०)	११६
५१७	सौराष्ट्रा (टी०)	१४०
५१८	संस्कार (टी०)	१०६
५१६	संहार (टी०)	१०६
५२०	स्कन्ध (टी०)	१३४
५२१	स्कन्धक (टी०)	१२७
५२२	स्त्री	५९
५२३	स्रक्	९३
५२४	स्रग्धरा	१०१
५२५	स्रग्विणी	८३
५२६	स्वागता	७५
	ह	
५२७	हर (टी०)	१५३
५२८	हरि (टी०)	९८
५२९	हरि (टी०)	१३५
५३०	हरिण (टी०)	१३८
५३१	हरिणप्लुत (टी०)	९९
५३२	हरिणप्लुता	१११
५३३	हरिणी	९७
५३४	हरिणी (टी०)	१२८
५३५	हलमुखी	६४
५३६	हार (टी०)	१३४
५३७	हीर (टी०)	१३९
५३८	हंसमाला (टी०)	६२
५३९	हंसरुत	६३
५४०	हंसी (टी०)	१२८
५४१	हंसी (टी०)	१३०

परिशिष्टम्। ६

वृत्तरत्नाकरटिप्पणे समुपात्तानां ग्रन्थानां ग्रन्थकर्त्तृणां च नामानि।

सं०	नामानि	पृ० पं०
१	अभिनवगुप्तपादाचार्य	६१-१८.
२	अमृतवर्धन	७०-३०.
३	अष्टाङ्गहृदय	१११-२६.
४	उत्पलराज	६९-१५.
५	कुमारसम्भव	६६-१०. ७०-१०. ७९-१४. ८०-१२.
६	छन्दोमञ्जरी	२४ २५. ३४-१५. ५९ २३, २८. ६०-११, १५, २०. ६१-१३, १९, ३१. ६३-२१. ६६-२३, २९. ६७-१५. ७३-२५. ७५-१२. ७८-७. ८१-१२. ८२-१८. ८३-७, १५. ८४ ७. ८५ १६, २४. ८६-२२. ८६-१४. ९२-२३. ९३-१२. ९५-२३, ३१. ९८-२६. १००-२१, २९. १०३-२०. १०७-२६. १०८-२७. १११-११, २०.
७	छन्दोवृत्ति	२६ २४. ३१-२४. ३३-१९. ३७-२२. ३८ २५. ३९-१६. ४०-१३, २०. ४१-१८. २५. ४३-२४. ४४-२०. ४६-१३, २६. ५१-१६. ५२-२३. ५६-३०. ५७-२४. ६२-१७. ६३ १५. ६४-२७. ६५-१४, २०. ६६-१२. ६७-२१. ७४ १०, २६. ७६-१२, २७. ८०-२८. ८१ २०. ८२ १०. ८४-२३. ८६ ९. ८७-३३. ८८-२१. ९० ८, १६ २४. ९४-९. ९७-१२. १०१-३३. १०२-१६ १०३ २८. १०८-१८. १०९ १३, २२. ११०-१२. ११५-१३. ११८-१७, ११६-१३, २७. १२०-१८.
८	जयदेव	९६-१८, २६.
९	जयवर्धन	७० २५.
१०	जल्हण	७० २०.
११	ध्वन्यालोक	६६-२०.

सं०	नामानि	पृ० पं०
१२	ध्वन्यालोकलोचन	६१-१८.
१३	नाट्यशास्त्र	७५-२०.
१४	नारायणशास्त्रीखिस्ते	८७-१५. ६१-३१. ९४-१५, ३१.
१५	न्यायवाचस्पतिरुद्रकवि	९१-२५.
१६	पञ्जिका	२-३२. ६४-२३.
१७	पञ्जिकाकार	१-२४.
१८	पारिजातहरणचम्पू	७२-२०.
१९	प्रक्रियाप्रकाश	७२-१६.
२०	भट्टीकाव्य	८८-१३.
२१	भट्टेन्दुराज	६१ १९.
२२	भट्टोजीदीक्षित	७२-१८.
२३	भारवि	४८-३०. १२१-१८. १२२—१६.
२४	मङ्क	६९ ५.
२५	मल्लिनाथ	७२ ५.
२६	महाकविक्षेमेन्द्र	९३-३०.
२७	माघ	७२-१०. ८०-३. ८१-८.
२८	रघुवंश	६८-२६. ६९ २५.
२९	वरकलवैद्यनाथ	२३-१८.
३०	वाणीभूषण	९-२९. ५८ ३०. ८२ २६.
३१	शेषकृष्णपण्डित	७२-२०.
३२	सामुद्रिकतिलक	२८-३२.
३३	सिद्धान्तशिरोमणि	९९-२९.
३४	सुभाषितवाली	६८-३१. ६६-३०. ७०-५.
३५	सुवृत्ततिलक	६०-२५. ६२-२४. ६३-२७. ६६-१७.
३६	सौन्दरानन्द	८०-८.

परिशिष्टम् । ७

वृत्तरत्नाकरटिप्पणे समुपात्तानां पद्यानाम-कारादिवर्णानुक्रमसूची ।

सं०	पद्यानि	पृ०	पं०
	अ		
१	अजमजरममरमेकं	३५,	१३.
२	अतिसुरभिरभाजि पुष्पश्रियां	८१,	३०.
३	अथ प्रजानामधिपः प्रभाते	१२,	३०.
४	अथ वासवस्य वचनेन	७,	३०.
५	अद्य कुरुष्व कर्म सुकृतं	९७,	१०.
६	अधिहृदयमनाहतसारसं	८५,	१०.
७	अनिशमधिमनश्चित्कलाचिन्तने	८७,	२६.
८	अभिनवतामरसं कमलायाः	८७,	१८.
९	अभून्नृपो विबुधसखः परन्तपः	८८,	१५.
१०	अभ्यागामिशशिलक्ष्मी	६३,	१७.
११	अमृतोर्मिशीतलकरेण लालयन्	८९,	१६
१२	अयि सहचरि रुचिरतरगुणमयी	९३,	२१.
१३	अरुणाऽरुणकिरणाली	२३,	२१.
१४	अर्च्चामन्येषां त्वं विहायामराणां	८५,	१८.
१५	अलं तवालीकवचोभिरेभिः	११०,	२३.
१६	अवाचकमनूर्जिताक्षरं	४०,	१५.
१७	अश्मश्रुमुखो विरलैर्दन्तैः	४९,	२४.
१८	अस्त्युत्तरस्यां दिशि देवतात्मा	७०,	११.
	इ		
१९	इदं भरतवंशभूभृतां	४१,	२०.
२०	इन्दीवरद्युति यदा बिभृयां न लक्ष्म	९१,	२०.
२१	इन्दुवदना कमलकोमलशरीरा	९१,	३२.
२२	इन्द्रनीलोपलेनेव या निर्मिता	८३,	१७.
२३	इयमधिकतरं रम्या	६५,	१६.
२४	इह कलयाऽच्युत ! केलिकानने	८६,	२४.

सं०	पद्यानि	पृ०	पं०
२५	उत्तुङ्गस्तनकलशद्वयोन्नताङ्गी	८८,	७.
२६	उत्साहसम्पन्नमदीर्घसूत्रं	६६,	१.
२७	उद्धर्षिणी जनदृशां स्तनभारगुर्वी	६१,	११.
	ए		
२८	एषा जगदेकमनोहरा	६७,	१७.
	क		
२९	कन्येयं कनकोज्ज्वला मनोहरदीप्तिः	१२२,	१८.
३०	करमूले यवमाला	२९,	१६.
३१	कस्तूरिकाहरिण ! मुञ्च वनोपकण्ठं	६१,	२६.
३२	कामकोटिपीठवासिनी मदीये	११२,	२४.
३३	किं त्वया सुभट ! दूरवर्जितं	७५,	२२.
३४	किं भीमाद् गुरुदक्षिणां	१५,	२७.
३५	कुन्दरदना कुटिलकुन्तलकलापा	९२,	१६.
३६	कुर्वीत यो देवगुरुद्विजन्मनाम्	७८,	२५.
३७	कुलेन कान्त्या वयसा नवेन	६६,	२६.
३८	कुसुमितसहकारे	११५,	१४.
३९	कृष्णसनाथा तर्णकपङ्क्तिः	६०,	२३.
४०	क्रूरदृष्टिरायताग्रनासिका	७६,	३०.
४१	क्षीयमाणाग्रदशन	४५,	२६.
४२	क्षुत्क्षीणशरीरसञ्चया	३७,	२४.
	ग		
४३	गण्डयोरतिशयकृशं	६४,	२०.
४४	गान्धर्वं मकरध्वज	३३,	२१.
४५	गुणा गुणज्ञेषु गुणीभवन्ति	७०,	६.
४६	गुरुस्तु द्विकलो ज्ञेयः	९,	३०.
४७	गोपस्त्रीणां मुख्या	६१,	२१.
४८	गोपस्त्रीभिः	५६,	२५.
४९	गोपानां नारीभिः	५६,	३०.
	च		
५०	चन्द्रवर्त्म पिहितं घनतिमिरैः	७८,	९.
५१	चमूप्रभुं मन्मथमर्दनात्मजं	७९,	१५,

सं०	पद्यानि	पृ०	पं०
	ज		
५२	जगज्जननि ! विद्वच्चित्तसंस्थे !	७७,	२५,
५३	जनस्य तीव्रातपजार्तिवारणा	७८,	१७.
५४	जन्तुमात्रदुःखकारि कर्म्म	१००,	३१,
५५	जाह्नव्योष्णीषशोभा स्वाभाति	९५,	१७.
५६	जितो जगत्येष भवभ्रमस्तैः	६८,	५.
	त		
५७	तराणजातटे विहारिणी	६७,	११.
५८	तरणिजापुलिने नवबल्लवी	८१,	१४.
५९	तरणिसुतातटकुञ्जगृहे	७३,	२८.
६०	तस्याः खुरन्यासपवित्रपांसुम्	८,	२३.
६१	तस्याः पातुं सुरगज इव व्योम्नि	१५,	२२.
६२	तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः	१४,	३०.
६३	ततः क्रुधा विस्फुरिताऽधराऽधरः	७९,	२५.
६४	ततः सुनन्दावचनाऽवसाने	६८,	२७.
६५	तां कस्यां चिद्भवनबलभौ	१७,	३०.
६६	तीरे राजति नदीनां	६३,	२३.
६७	तेन प्रविभक्ता	६०,	२८.
६८	त्यज तोटकमर्थनियोगकरं	८०,	३०.
	द		
६९	दासीकृताऽशेषजगत्त्रयं न मां	८०,	२४.
७०	दीपाः स्थितं वस्तु विभावयन्ति	७१,	१६.
७१	दुरालोकस्तोकस्तबकनवकाऽशोक	९६,	२१.
७२	दृशौ तव मदालसे वदनमिन्दुमत्यास्पदं	९६,	२९.
७३	दोधकमर्थविरोधकमुग्रं	७४,	१२.
७४	द्विजगुरुपरिभवकारी यो	७६,	१४.
	ध		
७५	धन्यानामेताः कुसुमितलता	९९,	२३,
७६	धवलयशोंशुकेन परिवीता	८६,	११.
७७	धूमज्योतिःसलिलमरुताम्	१६,	२०.
	न		
७८	नननमयवाणी मेखलाकृष्टिकाले	९४,	९.
७९	नरकरिपुरवतु निखिलसुरगतिः	९३,	२६.

सं०	पद्यानि	पृ०	पं०
८०	नवधाराम्बुसंसिक्तं	४३,	२६.
८१	न विचलति कथंचिन्न्यायमार्गात्	८१,	२३.
८२	न समरसनाः काले	९७,	२२.
८३	नाक्षराणि पठता किमपाठि	१६,	३०.
८४	नानाऽऽश्लेषप्रकरणचणा	९७,	३०.
८५	नारायणस्य सन्तत	३४,	१६.
८६	निजभुजजैर्विशाल	६८,	२०.
८७	नित्यं नीतिनिपुणस्य	४४,	२२.
८८	निपीय यस्य क्षितिरक्षिणः कथाः	१६,	२५.
	प		
८९	परिशुद्धवाक्यरचनातिशयं	८४,	२५.
९०	पवनविधूतवीचिचपलं	१०२,	२१.
९१	पिङ्गलकेशी कपिलाक्षी	३९,	१८.
९२	पीत्वा मत्ता मधु मधुपाली	६६,	२६.
९३	पुष्पं प्रवालोपहितं यदि स्यात्	६९,	११.
९४	प्रतीयमानं पुनरन्यदेव	६९,	२१.
९५	प्रत्याहृत्येन्द्रियाणि	१००,	२३.
९६	प्रयान्ति मन्त्रैः प्रशमं भुजङ्गमा	८०,	९,
९७	प्रह्लामरमौलौ रत्नोपलक्लृप्ते	८४,	९.
९८	प्राप्य नाभिह्रदमज्जनमाशु	११,	३०,
	फ		
९९	फणिपतिवलयं जटामुकुटोज्ज्वलं	९०,	१८.
	ब		
१००	बली बलारातिबलाऽतिशातनं	८०,	१९.
१०१	बालार्ककोटिवर्णं	३०,	२२.
१०२	बिम्बोष्ठी कठिनोन्नतस्तनाऽवनताङ्गी	१२१,	२०.
१०३	ब्रह्मनिष्ठमकनिष्ठचेष्टितं	७२.	२१.
	भ		
१०४	भक्ता ये शरणमुपागताः	६५,	२८.
१०५	भङ्क्त्वा दुर्गाणि द्रुमवनमखिलं	९०,	१०.
१०६	भगवति ! पुरमथनमहिषि !	५५,	१८.
१०७	भग्नप्रसभ्यैः कायसहस्रैः	६६,	२०.

सं०	पद्यानि	पृ०	पं०
११८	भज भज शङ्करं गिरिजया समन्वितं	९४,	१७.
११९	भद्रकगीतिभिः सकृदपि	१०२,	१३.
११०	भर्तुराज्ञानुवर्त्तिनी	४४,	२९.
१११	भास्वत्कन्या	६०,	१८.
११२	भृङ्गावलीमङ्गलगीतनादः	११०,	१४.
	म		
११३	मत्ता गोष्ठीगर्भमूढप्रलापा	७४,	२०.
११४	मदकलखगकुलकलरवमुखरिणि	४२,	१४.
११५	मनाक्प्रसृतदन्तदीधितिः	४२,	२४.
११६	मन्दः कवियशःप्रार्थी	८,	३१.
११७	मधुमुखमिव सोत्पलं प्रियायाः	११२.	१५.
११८	मया तव किंचिदकारि कदापि	८२,	२८.
११९	मलयजतिलकसमुदितशशिकला	९३,	१४.
१२०	माणवकाक्रीडितकं	६३,	११.
१२१	माधव ! मुग्धैर्मधुकरविरुतैः	१०३,	२२.
१२२	मुग्धे ! मानं परिहर न चिरात्	७५,	१४.
१२३	मुग्धे ! यौवनलक्ष्मीविद्युद्विभ्रमलोला	९२,	२५.
१२४	मुरधैरिवपुस्तनुतां मुदं	१०७,	२७.
१२५	मृगलोचना शशिमुखी च	११८,	१९.
१२६	मौनं ध्यानं भूमौ शय्या	६२,	२६.
	य		
१२७	यच्चित्तं गुरुसक्तमुदारं	५२,	२६.
१२८	यत्पादतले चकास्ति चक्रं	१०९,	१५.
१२९	यत्पादस्य कनिष्ठा	३१.	२६.
१३०	यदि कोपिनी प्रभवसि मदुपरि कान्ते !	९४,	२५.
१३१	यदि वाञ्छसि परपदमारोढुं	५१,	२१.
१३२	यदीयपादाब्जचिन्तया	३९,	२५.
१३३	यदीयहलतो विलोक्य विपदं	८२,	२०,
१३४	यद्यपि शीघ्रगतिर्मृदुगामी	१०८,	२०.
१३५	यस्य कृष्णपादपद्मं	६३,	२७.
१३६	यस्य मुखे प्रियवाणी	६२,	२०.
१३७	यस्याः पादे प्रथमे	१०,	३२.

सं०	पद्यानि	पृ०	पं०
१३८	या कपिलाक्षी पिङ्गलकेशी	१०३,	३०.
१३९	याचे वाचे ! तुभ्यं	३२,	२७.
१४०	यात्युत्सेकं सपदि प्राप्य किंचित्	७४,	२८.
१४१	या निजभर्त्तुर्हिताय नित्यं	५१,	१४.
१४२	या भक्तानां कलिदुरितोत्तप्तानां	८५,	२६.
१४३	या वनान्तराण्युपति रन्तुं	६८,	१४.
१४४	या स्त्री कुचकलशनितम्ब	२९,	२४.
१४५	ये दुष्टलोका इह भूमिलोके	६७,	२३.
१४६	ये याताऽधिकमासहीनदिवसा	६९,	३१.
१४७	यो न ददाति न भुङ्क्ते	१०,	३०.
१४८	यो नव चिन्तयेत्ते पादौ	५०,	२४.
१४९	यो हरिरुज्जखान खरतरनखशिखरैः	९५,	२५.
	र		
१५०	रघूणामन्वयं वक्ष्ये	८,	२८.
१५१	रङ्के बाहुविरुग्णात्	६२,	१४.
१५२	रतिकरमलयमरुति	५७,	३६.
१५३	रत्नभङ्गविमलैर्गुणतुङ्गैः	७५,	३०.
१५४	राजीवनयना	६१,	२९.
१५५	रामा कामकरेणुका मृगायतनेत्रा	१२०,	२०.
१५६	रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं	१७,	२५.
	ल		
१५७	लघु श्रुतं मदोद्धतं	६३,	३३.
१५८	लसदरुणेक्षणं	९८,	२८.
	व		
१५९	वन्द्यः स पुंसां त्रिदशाऽभिनन्द्यः	७०,	१.
१६०	वाक्यैर्मधुरैः प्रतार्य पूर्वं	३८,	२७.
१६१	विगलितहारा सुकुसुममाला	८२,	१२.
१६२	वितीर्णशिक्षा इव हृत्पदस्थ	७०,	१६.
१६३	विना न साहित्यविदाऽपरत्र	६९,	६.
१६४	विनिवारितोऽपि नयनेन	११६,	१५.
१६५	विपुलार्थसुवाचकाक्षराः	४०,	२२.
१६६	विश्वप्रकाशहेतुः	३०,	२९.

सं०	पद्यानि	पृ०	पं०
१६७	विश्वं तिष्ठति कुक्षिकोटरे	६५,	२२.
१६८	विष्णुं वन्दे	५९,	२८.
१६९	वृन्दावने सलीलं	२४,	२७.
१७०	व्यालाश्च राहुश्च सुधाप्रसादात्	७०,	२१.
१७१	व्यूढोरस्कः सिंहसमानानतमध्यः	८८,	२३.
	श		
१७२	शरदमृतरुचश्चन्द्रिकाक्षालिते	८६,	२४.
१७३	शशधरमुखि ! मुखमपन्य	५७,	२९.
१७४	शशिवदनानां	६१,	१५.
१७५	शोभनवर्णा सुविशदजातिः	७७,	१७.
१७६	श्रीकण्ठं त्रिपुरदहन	१०४,	२८.
१७७	श्रुत्वेतिवाचं वियतो गरीयसीं	८०,	१४.
	स		
१७८	सकलदुरितनाशकारिणी	७६,	२२.
१७९	सङ्गेन वो गर्भतपस्विनः शिशुः	७२,	२०.
१८०	स जामदग्न्यः क्षयकालरात्रिकृत्	७९,	३०.
१८१	सततं प्रियम्वदमनून	१११,	२८.
१८२	सदारात्मजज्ञातिभृत्यो विहाय	८३,	९.
१८३	साध्वी माध्वीक ! चिन्ता	१८,	२७.
१८४	सा मङ्गलस्नानविशुद्धगात्री	११,	२५.
१८५	सा मृगीलोचना	६०,	१३.
१८६	सारारम्भानुभावप्रियपरिचयया	१०१,	२५.
१८७	साऽवश्यमुन्मील्य विलोचने सकृत्	८०,	४.
१८८	सास्ते पुरत्रयमतीत्य सुन्दरी	८४,	१७.
१८९	सुरमुनिमनुजैरुपचितचरणां	९०,	२६.
१९०	सौम्यां दृष्टिं देहि स्नेहात्	५७,	१५.
१९१	स्फुटफेनचया हरिणप्लुता	१११,	१३.
१९२	स्फुटसुमधुरवेणुगीतिभिः	१११,	२२.
१९३	स्फुरतु ममाननेऽद्य ननु वाणि !	९६,	१३.
१९४	स्मरवेगवती व्रजरामा	१०८,	२९.
१९५	स्थिरविलासनतमौक्तिकावली	४१,	२७.

सं०	पद्यानि	पृ०	पं०
	ह		
१९६	हतभूरिभूमिपतिचिह्नं	१०९,	२४
१९७	हसिततामरसनेत्रसारसा	८३,	२०
१९८	हताञ्जनश्यामरुचस्तवैते	६९,	१६
१९९	हतोऽङ्गरागस्तिलकं विमृष्टं	७०,	२०
२००	हृद्यं मद्यं पीत्वा नारी स्खलित	१०२,	२०
२०१	हेलोद्भिन्नश्चुत्पाद	१०१,	१७

॥ श्रीः ॥

महाकविकालिदासप्रणीतः ।

श्रुतबोधः ।



छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ॥
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥
संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् ॥
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ॥
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ॥ ३ ॥
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ॥
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ ४ ॥
आर्यापूर्वार्धसमं द्वितीयमपि भवति यत्र हंसगते ! ॥
छन्दोविदस्तदानीं गीतिं तामामृतवाणि ! भाषन्ते ॥ ५ ॥
आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ॥
कामिनि ! तामुपगीतिं प्रकाशयन्ते महाकवयः ॥ ६ ॥
आद्यचतुर्थं पञ्चमकं चेत् ॥
यत्र गुरुः स्यात्साक्षरपङ्क्तिः ॥ ७ ॥
अगुरुचतुष्कं भवति गुरू द्वौ ॥
घनकुचयुग्मे ! शशिवदनासौ ॥ ८ ॥
तुर्यं पञ्चमकं चेद्यत्र स्याल्लघु बाले ! ॥
विद्वद्भिर्मृगनेत्रे ! प्रोक्ता सा मदलेखा ॥ ९ ॥
श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ॥
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १० ॥

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥ ११ ॥
आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् ॥
स्याद् गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥ १२ ॥

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥ १३ ॥
सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ॥
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला ॥ १४ ॥

तन्वि ! गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम् ॥
इन्द्रियबाणैर्यत्र विरामः सा कथनीया चम्पकमाला ॥ १५ ॥
चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे ! ॥
छन्दसि दक्षा ये कवयस्तन्मणिबन्धं ते ब्रुवते ॥ १६ ॥
मन्दाक्रान्ताऽन्त्ययतिरहिता सालङ्कारे ! यदि भवति सा ॥
तद्विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ! ॥ १७ ॥

ह्रस्वो वर्णो जायते यत्र षष्ठः
कम्बुग्रीवे ! तद्वदेवाष्टमान्त्यः ॥
विश्रामः स्यात्तन्वि ! वेदैस्तुरङ्गै-
स्तां भाषन्ते शालिनीं छान्दसीयाः ॥ १८ ॥

आद्यचतुर्थमहीनानितम्बे !
सप्तमकं दशमं च तथान्त्यम् ॥
यत्र गुरु प्रकटस्मरसारे !
तत्कथितं ननु दोधकवृत्तम् ॥ १९ ॥

यस्यास्त्रिषट्सप्तममक्षरं स्याद्
ह्रस्वं सुजङ्घे ! नवमं च तद्वत् ॥
गत्या विलज्जीकृतहंसकान्ते !
तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥ २० ॥

यदीन्द्रवज्राचरणेषु पूर्वे
भवन्ति वर्णा लघवः सुवर्णे ! ॥
अमन्दमाद्यन्मदने ! तदानी-
मुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥ २१ ॥
यत्र द्वयोरप्यनयोस्तु पादा
भवन्ति सीमन्तिनि ! चन्द्रकान्ते ! ॥
विद्वद्भिराद्यैः परिकीर्तिता सा
प्रयुज्यतामित्युपजातिरेषा ॥ २२ ॥
आख्यानकी सा प्रकृटीकृतार्थे !
यदीन्द्रवज्राचरणः पुरस्तात् ॥
उपेन्द्रवज्राचरणास्त्रयोऽन्ये
मनीषिणोक्ता विपरीतपूर्वा ॥ २३ ॥
आद्यमक्षरमतस्तृतीयकं
सप्तमं च नवमं तथान्तिमम् ॥
दीर्घमिन्दुमुखि ! यत्र जायते
तां वदन्ति कवयो रथोद्धताम् ॥ २४ ॥
अक्षरं च नवमं दशमं चेत्
व्यत्ययाद्भवति यत्र विनीते ! ॥
प्रोक्तमेणनयने ! यदि सैव
स्वागतेति कविभिः कथिताऽसौ ॥ २५ ॥
ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले !
तद्बिम्बोष्ठि ! न्यस्त एकादशाद्यः ॥
बाणैर्विश्रामस्तत्र चेद्वा तुरङ्गै-
र्नाम्ना निर्दिष्टा सुभ्रु ! सा वैश्वदेवी ॥ २६ ॥
सतृतीयकषष्ठमनङ्गरते !
नवमं विरतिप्रभवं गुरु चेत् ॥

घनपीनपयोधरभारनते !
ननु तोटकवृत्तमिदं कथितम् ॥ २७ ॥
यदाद्यं चतुर्थं तथा सप्तमं स्या-
त्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ॥
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे !
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥ २८ ॥
अयि ! कृशोदरि ! यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा ॥
विरतिगं च तथैव विचक्षणै-
र्द्रुतविलम्बितमित्युपदिश्यते ॥ २९ ॥
यदि तोटकस्य गुरु पञ्चमकं
विहितं विलासिनि ! तदक्षरकम् ॥
रससङ्ख्यकं गुरु न चेदबले !
प्रमिताक्षरेति कविभिः कथिता ॥ ३० ॥
प्रथमाक्षरमाद्यतृतीययो-
र्द्रुतविलम्बितकस्य हि पादयोः ॥
यदि नास्ति तदा कमलेक्षणे !
भवति सुन्दरि ! सा हरिणीप्लुता ॥ ३१ ॥
उपेन्द्रवज्राचरणेषु सन्ति चे-
द्युपान्त्यवर्णा लघवः परे कृताः ॥
मदोल्लसद्भ्रूजितकामकार्मुके !
वदन्ति वंशस्थविलं बुधास्तदा ॥ ३२ ॥
यस्यामशोकाङ्कुरपाणिपल्लवे !
वंशस्थपादा गुरुपूर्ववर्णकाः ॥
तारुण्यहेलारतिरङ्गलालसे !
तामिन्द्रवंशां कवयः प्रचक्षते ॥ ३३ ॥

यस्यां प्रिये ! प्रथमकमक्षरद्वयं
तुर्यं तथा गुरु नवमं दशान्तिमम् ॥
सान्त्यं भवेद्यतिरपि चेद्युगग्रहैः
सालक्ष्यतामृतलते ! प्रभावती ॥ ३४ ॥
आद्यं चेत्रितयमथाष्टमं नवान्त्यं
द्वावन्त्यौ गुरुविरतौ सुभाषिते ! स्यात् ॥
विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुदति ! प्रहर्षिणी सा ॥ ३५ ॥
आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थं
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ॥
अष्टाभिरिन्दुवदने ! विरतिश्च षड्भिः
कान्ते ! वसन्ततिलकां किल तां वदन्ति ॥ ३६ ॥
प्रथममगुरुषट्कं विद्यते यत्र कान्ते !
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ॥
करिभिरथ तुरङ्गैर्यत्र कान्ते ! विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥ ३७ ॥
सुमुखि ! लघवः पञ्च प्राच्यास्ततो दशमान्तिकं
तदनु ललितालापे ! वर्णौ तृतीयचतुर्थकौ ॥
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे !
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥३८॥
यदि प्राच्यो ह्रस्वः कमलनयने ! पञ्च गुरव-
स्ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि ! लघवः ॥
त्रयोऽन्ये चोपान्त्याः सुतनु ! जघनाभोगसुभगे !
रसैरुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥३९॥
द्वितीयमलिकुन्तले ! गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये ! गुरु गभीरनाभिह्रदे ! ॥

सप्तभ्यदशमान्तिमं तदनु यत्र कान्ते ! यति-
गिरीन्द्रफणिभृत्कुलैर्भवति सुभ्रु ! पृथ्वी हि सा ॥४०॥

चत्वारः प्राक्सुतनु ! गुरवो द्वादशैकादशौ चे-
न्मुग्धे ! वर्णौ तदनु कुमुदामोदिनि ! द्वादशान्त्यौ ॥
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते ! विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि ! तां सङ्गिरन्ते ॥४१॥

आद्यं यत्र गुरु त्रयं प्रियतमे ! षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः ॥
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने !
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितम् ॥४२॥

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत्षोडशाद्यौ मृगमदतिलके ! षोडशान्त्यौ तथान्त्यौ ॥
रम्भास्तम्भोरुकान्ते ! मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले ! वन्द्यैः कवीन्द्रैः सुतनु ! निगदिता स्रग्धरा सा प्रसिद्धा ॥४३॥

इति श्रीकालिदासविरचितः श्रुतबोधः सम्पूर्णः ।



॥ श्रीः ॥

गङ्गादासप्रणीता ।

छन्दोमञ्जरी ।

प्रथमः स्तबकः ।

देवं प्रणम्य गोपालं वैद्यगोपालदासजः॥
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यदः ॥ १ ॥
सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम् ॥
तथापि सारमाकृष्य नवकार्थो ममोद्यमः ॥ २ ॥
इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी ॥
छन्दसां मञ्जरी कान्ता सभ्यकण्ठे लगिष्यति ॥ ३ ॥
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ ४ ॥
सममर्धसमं वृत्तं विषमं चेति तत्त्रिधा ॥
समं समचतुष्पादं भवत्यर्धसमं पुनः ॥ ५ ॥
आदिस्तृतीयवद्यस्य पादस्तुर्यो द्वितीयवत् ॥
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ॥ ६ ॥
म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ॥
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ७ ॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ॥
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥८॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥
क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा ॥ ९ ॥

म.	न.	भ.	य.	ज.	र.	स.	त.	ग.	ल.
SSS,	।।।,	S।।,	।SS,	।S।,	S।S,	।।S,	SS।,	S,	।.

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ॥
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ १० ॥

यथा—

१	२	३	४	५
SS,	।।S,	।S।,	S।।,	।।।।.

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ॥

अत्र पादान्तगो लघुर्गुरुर्भवेद्वा । यथा—

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ॥
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥

सुन्दरीति ग्राम्यशब्दे परे विकल्पेन लघुत्वम् ।

तथा भट्टिः—

अथ लुलितपतत्त्रिमालं रुग्णाशनवाणकेसरतमालम् ॥
स वनं विविक्तमालं सीतां द्रष्टुं जगामालम् (भ०१०-१४) ॥

अत्र प्रथमपादान्तगुरोर्लघुत्वम् ।

तथा मत्पितुः पारिजातहरणनाटके—

सिन्दूरपूरकृतगैरिकरागशोभे
शश्वन्मदस्रवणनिर्झरवारिपूरे ॥
सङ्ग्रामभूमिगतमत्तसुरेभकुम्भ-
कूटे मदीयनखराशनयो विशन्तु ॥

अत्र तृतीयचतुर्थपादान्तलघ्वोर्गुरुत्वम् ।

तथा ममाऽच्युतचरितेऽपि—

रक्तेन केशिदशनक्षतसम्भवेन
रेजे स मण्डिततरो हरिबाहुदण्डः ॥
तद्दन्तसन्दलितभीमभुजप्रताप-
वह्नेरिव स्फुटकणप्रकरेण कीर्णः ॥

अत्र प्रथमतृतीयपादान्तस्यापि लघोर्गुरुत्वम् ।

'प्रहेवा' इति पुनः पिङ्गलमुनेर्विकल्पविधायकं सूत्रम् । ततश्च कुमारे—

सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा ॥
निर्वृत्तपर्जन्यजलाभिषेका
प्रफुल्लकाशा वसुधेव रेजे (कु०७-१२) ॥

अत्र प्रशब्दे परे गुरोर्लघुत्वम् ।

प्राप्य नाभिह्रदमज्जनमाशु
प्रस्थितं निवसनग्रहणाय ॥
औपनीविकमरुन्ध किल स्त्री
वल्लभस्य करमात्मकराभ्याम् ॥ (शि०१०-६०) इति माघे ।

अत्र ह्रशब्दे परे गुरोर्लघुत्वम् ।

तीव्रप्रयत्नोच्चारणेनात्र लघुत्वमिति कण्ठाभरणः तदुक्तम्—

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ॥
न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ॥ (सर०१-१२३)
यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ॥
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥
क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ॥
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्णात्वतुलमहिमा मां करुणया ॥

अयं च श्लोकश्छन्दोगोविन्दे मम गुरोः—

श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ॥
इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥

अत एव मुरारिः—

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
लीलालूनपुनर्विरूढशिरसो वीरस्य लिप्सोर्वरम् ।
यच्चाद्यैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृणिवत्यभितो मुखानि स दशग्रीवः कथं कथ्यताम् ॥ इति ।

जयदेवोऽपि—

साध्वी माध्वीक ! चिन्ता न भवति भवतः शर्करे! कर्कराऽसि
द्राक्षे ! द्रक्ष्यन्ति के त्वाममृत ! मृतमसि क्षीर ! नीरं रसस्ते ॥
माकन्द ! क्रन्द कान्ताधर ! धर न तुलां गच्छ यच्छन्ति यावद्भावं
शृङ्गारसारस्वतमिव जयदेवस्य विष्वग्वचांसि ॥ (गी०१२-१२)

एवमन्येऽपि—

कत्यद्रिप्रतिरोधिताः कति नदीपाथोनिधिप्लाविताः
कत्येवाटवितां गताः कति न वा भूदेवदेवैर्वृताः ॥
भूम्यो भूमिपतीन्द्र ! तावकयशःप्रस्तावनामण्डली
कोष्ठीकृत्य जगद्धनं कति वराटीभिर्मुदं यास्यति ॥ इति ।

आरभ्यकाक्षरात्पादादककाक्षरवर्धितैः ॥
पादैरुक्था दिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम् ॥ १२ ॥
उक्थाऽत्युक्था तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका ॥
गायत्र्युष्णिगनुष्टुप्च बृहति पङ्क्तिरेव च ॥ १३ ॥
त्रिष्टुप्च जगति चैव तथाऽतिजगती मता ॥
शर्करी सातिपूर्वा स्यादष्टयत्यष्टी तथा स्मृते ॥ १४ ॥
धृतिश्चाऽतिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥
विकृतिः संस्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः ॥ १५ ॥
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ १६ ॥

इति छन्दोमञ्जर्यां मुग्धबन्धाख्यः प्रथमः स्तबकः ।

द्वितीयः स्तबकः ।

(१) उक्था । (एकाक्षरा वृत्तिः ।)

गः श्रीः ॥ १ ॥

श्रीस्ते । सास्ताम् ॥

(१) अत्युक्था । (द्व्यक्षरा वृत्तिः ।)

गौ स्त्री ॥ १ ॥

गोपस्त्रीभिः । कृष्णो रेमे ॥

(३) मध्या । (त्र्यक्षरा वृत्तिः ।)

मो नारी ॥ १ ॥

गोपानां नारीभिः । क्रिष्टोऽव्यात्कृष्णो वः ॥

रो मृगी ॥ २ ॥

सा मृगीलोचना । राधिका श्रीपतेः ॥

(४) प्रतिष्ठा । (चतुरक्षरा वृत्तिः ।)

ग्मौ चेत्कन्या ॥ १ ॥

भास्वत्कन्या सैका धन्या । यस्याः कूले कृष्णोऽखेलत् ॥

नागि सती ॥ २ ॥

मुररिपो ! तव पदम् । नमति सा ननु सती ॥

(५) सुप्रतिष्ठा । (पञ्चाक्षरा वृत्तिः ।)

भगौ गिति पाङ्क्तिः ॥ १ ॥

कृष्णसनाथा तर्णकपङ्क्तिः । यामुनकच्छे चारु चचार ॥

सलगैः प्रिया ॥ २ ॥

व्रजसुभ्रुवो विलसत्कलाः । अभवन्प्रिया मुरवैरिणः ॥

(६) गायत्री । (षडक्षरा वृत्तिः ।)

त्यौ चेत्तनुमध्या ॥ १ ॥

मूर्तिर्मुरशत्रोरत्यद्भुतरूपा ।
आस्तां मम चित्ते नित्यं तनुमध्या ॥
नश्यन्ति ददर्श वृन्दानि कपीन्द्रः ।
हारीणयबलानां हारीणयबलानाम् ॥ इति भट्टौ ॥

पादान्तत्वेन 'ददर्श' इत्यत्र गुरुत्वम् ॥

शशिवदना न्यौ ॥ २ ॥

शशिवदनानां व्रजतरुणीनाम् ।
अधरसुधोर्मिं मधुरिपुरच्छत् ॥

द्विया सोमराजी ॥ ३ ॥

हरे ! सोमराजीसमा ते यशःश्रीः ।
जगन्मण्डलस्य च्छिनत्त्यन्धकारम् ॥

(७) उष्णिक् । (सप्ताक्षरा वृत्तिः ।)

ननगि मधुमती ॥ १ ॥

रविदुहितृतटे वनकुसुमततिः ।
व्यधित मधुमती मधुमथनमुदम् ॥

कुमारललिता जस्गाः ॥ २ ॥

मुरारितनुवल्ली कुमारललिता सा ।
व्रजैणनयनानां ततान मुदमुच्चैः ॥

मस्गौ स्यान्मदलेखा ॥ ३ ॥

रङ्गे बाहुधिरुग्णाद्दन्तीन्द्रान्मदलेखा ।
लग्नाभून्मुरशत्रौ कस्तूरीरसचर्चा ॥

(८) अनुष्टुप् । (अष्टाक्षरा वृत्तिः ।)

चित्रपदा यदि भौ गौ ॥ १ ॥

यामुनसैकतदेशे गोपवधूजलकेलौ ।
कंसरिपोर्गतिलीला चित्रपदा जगदव्यात् ॥

भात्तलगा माणवकम् ॥ २ ॥

चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम् ।
ध्याय सखे ! स्मेरमुखं नन्दसुतं माणवकम् ॥

मो मो गो गो विद्युन्माला ॥ ३ ॥

वासोवल्ली विद्युन्माला बर्हश्रेणी शाक्रश्चापः ।
यस्मिन्नास्तां तापोच्छित्यै गोमध्यस्थः कृष्णाम्भोदः ॥

ग्लौ रजौ समानिका तु ॥ ४ ॥

यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म ।
धीः समानिका परेण नोचिताऽत्र मत्सरेण ॥

प्रमाणिका जरौ लगौ ॥ ५ ॥

पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः ।
श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥

'मतल्लिका मचर्चिका' इत्यमरकोषः ।

नभलगा गजगतिः ॥ ६ ॥

रविसुतापरिसरे विहरतो दृशि हरेः ।
व्रजवधूगजगतिर्मुदमलं व्यतनुत ॥
अवतु वो गिरिसुता शशिभृतः प्रियतमा ।
वसतु मे हृदि सदा भगवतः पदयुगम् ॥ इति कस्यापि ।

(९) बृहती । (नवाक्षरा वृत्तिः ।)

भुजगशिभृता नौ मः ॥ १ ॥

ह्रदतटनिकटक्षोणी भुजगशिशुभृता यासीत् ।
मुररिपुदलिते नागे व्रजजनसुखदा साभूत् ॥

'सृता' इत्येवं शम्भुप्रभृतिषु पाठः । 'वृता' इत्येवमाधुनिकाः पठन्ति

स्यान्मणिमध्यं चेद्भसाः ॥ २ ॥

कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।
चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः ॥

सजरैर्भुजङ्गसङ्गता ॥ ३ ॥

तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ॥

(१०) पाङ्क्तिः । (दशाक्षरा वृत्तिः ।)

रुक्मवती सा यत्र भमस्गाः ॥ १ ॥

कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥
रूपवतीयं क्वचित् । क्वचिच्चम्पकमाला च ।

ज्ञेया मत्ता मभसगसृष्टा ॥ २ ॥

पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे ।
उद्दीव्यन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥

त्वरितगतिश्च नजनगैः ॥ ३ ॥

त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता ।
मुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥
क्षितिविजितिस्थितिविहितव्रतरतयः परगतयः ।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥ इति दण्डिनि ।

नरजगैर्भवेन्मनोरमा ॥ ४ ॥

तरणिजातटे विहारिणी व्रजविलासिनीविलासतः ।
मुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥

(११) त्रिष्टुप् । (एकदशाक्षरा वृत्तिः ।)

स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ १ ॥

गोष्ठे गिरिं सव्यकरेण धृत्वा
रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ॥
यो गोकुलं गोपकुलं च सुस्थं
चक्रे स नो रक्षतु चक्रपाणिः ॥

उपेन्द्रवज्रा प्रथमे लघौ सा ॥ २ ॥

उपेन्द्र ! वज्रादिमणिच्छटाभि-
र्विभूषणानां छुरितं वपुस्ते ॥
स्मरामि गोपीभिरुपास्यमानं
सुरद्रुमूले मणिमण्डपस्थम् ॥
अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ॥

इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ॥ ३ ॥

ममैवाऽच्युतचरिते यथा—

काचिन्मुरारेर्वदनारविन्दं
सङ्क्रान्तमालोक्य जले नवोढा ॥
व्यक्तं सलज्जा परिचुम्बितुं त-
त्तदर्थमेवाम्भसि निर्ममज्ज ॥
मुखारविन्दव्रजसुन्दरीणा-
मामोदमत्युत्कटमुद्विरभिः ॥
अहारि चित्तेन समं मुरारे-
र्हेमाम्बुजेभ्योऽपि मधुव्रतौघः ॥
तोयेषु तस्याः प्रतिबिम्बितासु
व्रजाङ्गनानां नयनावलीषु ॥
स्ववन्धुपङ्क्तिभ्रमतोऽतिमुग्धा
गोष्ठी शफर्यो रचयाम्बभूवुः ॥

तथा ममैव गोपालशतके—

वनेषु कृत्वा सुरभिप्रचारं
प्रकाममुग्धो मधुवासरेषु ॥
गायन्कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ ॥

एवमनयोर्नानाविधा अप्युपजातयो बोद्धव्याः ।

तथा वंशस्थविलेन्द्रवंशयोरित्थमुदाहार्यम्—

इत्थं रथाश्वेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहिः ॥
प्रस्थानकालक्षमवेशकल्पना
कृतक्षणस्तेपमुदक्षताच्युतम् ॥ (१२-१) इति माघे

नजजलगैर्गदिता सुमुखी ॥ ४ ॥

तरणिसुतातटकुञ्जगृहे
वदनविधुस्मितदीधितिभिः ॥
तिमिरमुदस्य मुखं सुमुखी
हरिमवलोक्य चुचुम्ब चिरम् ॥

मात्तौ गौ चेच्छालिनी वेदलोकैः ॥ ५ ॥

अंहो हन्ति ज्ञानवृद्धिं विधत्ते
धर्मं दत्ते काममर्थं च सूते ॥
मुक्तिं दत्ते सर्वदोपास्यमाना
पुंसां श्रद्धाशालिनी विष्णुभक्तिः ॥

वातोर्मीयं गदिता म्भौ तगौ गः ॥ ६ ॥

ध्याता मूर्तिः क्षणमप्यच्युतस्य
श्रेणी नाम्नां गदिता हेलयापि ॥
संसारेऽस्मिन्दुरितं हन्ति पुंसां
वातोर्मी पोतमिवाम्भोधिमध्ये ॥

मो गो नौ गो भ्रमरविलसिता ॥ ७ ॥

भ्रमरविलसितं क्वापि ।
मुग्धे ! मानं परिहर न चिरा-
त्तारुण्यं ते सफलयतु हरिः ॥
फुल्ला वल्ली भ्रमरविलसिता-
भावं शोभां कलयति किमु ताम् ॥

स्यादनुकूला भतनगगाश्चेत् ॥ ८ ॥

बल्लववेशा मुररिपुमूर्ति-
र्गोपमृगाक्षीकृतरतिपूर्तिः ॥
वाञ्छितसिद्ध्यै प्रणतिपरस्य
स्यादनुकूला जगति न कस्य ॥

रात्परैर्नरलगै रथोद्धता ॥ ९ ॥

राधिका दधिविलोड़नास्थता
कृष्णवेणुनिनदैरथोद्धता ॥
यामुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात् ॥

स्वागता रनभगैर्गुरुणा च ॥ १० ॥

यस्य चेतसि सदा मुरवैरी
बल्लवीजनविलासविलोलः ॥
तस्य नूनममरालयभाजः
स्वागतादरकरः सुरराजः ॥

दोधकमिच्छति भत्रितयाद्यौ ॥ ११ ॥

देव ! सदोध ! कदम्बतलस्थ !
श्रीधर ! तावकवामपदं मे ॥
कण्ठतलेऽसुविनिर्गमकाले
स्वल्पमपि क्षणमेष्यति योगम् ॥
स्यान्मोटनकं तजजाश्च लगौ ॥ १२ ॥

रङ्गे खलु मल्लकलाकुशल-
श्चाणूरमहाभटमोटनकम् ॥
यः केलिलवेन चकार स मे
संसाररिपुं परिमोटयतु
श्येन्युदीरिता रजौ रलौ गुरुः ॥ १३ ॥

यस्य कीर्तिरिन्दुकुन्दचन्दन-
श्येन्यशेषलोकपावनी सदा ॥
जाह्नवीव विश्ववन्द्यविभ्रमा
तं भजामि भावगम्यमच्युतम् ॥

(१२) जगर्ना । (द्वादशाक्षरा वृत्तिः ।)

चन्द्रवर्त्म निगदन्ति रनभसैः ॥ १ ॥

चन्द्रवर्त्म पिहितं घनतिमिरै-
राजवर्त्म रहितं जनगमनैः ॥
इष्टवर्त्म तदलङ्कुरु सरसे !
कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
वदन्ति वंशस्थविलं जतौ जरौ ॥ २ ॥

विलासवंशस्थविलं मुखानिलैः
प्रपूर्य यः पञ्चमरागमुद्गिरन् ॥
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु नः ॥
वंशस्तनितमिति क्वापि ।
तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ ॥ ३ ॥

दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः
पीताम्बरोऽसौ जगतां तमोपहः ॥
यस्मिन्मम ज्जुः शलभा इव स्वयं
ते कंसचाणूरमुखा मखद्विषः ॥
जसौ जसयुतौ जलोद्धतगतिः ॥ ४ ॥

यदीयहलतो विलोक्य विपदं
कलिन्दतनया जलोद्धतगतिः ॥
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम् ॥
सनाकवनितं नितम्बरुचिरं
चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरा
परास्तवसुधा सुधाधिवसति ॥ इति भारवौ ।

भुजङ्गप्रयातं चतुर्भिर्यकारैः ॥ ५ ॥

सदारात्मजज्ञातिभृत्यो विहाय
स्वमेतं ह्रदं जीवनं लिप्समानः ॥
मया क्लेशितः कालियेत्थं कुरु त्वं
भुजङ्ग ! प्रयातं द्रुतं सागराय ॥

वद तोटकमब्धिसकारयुतम् ॥ ६ ॥

यमुनानटमच्युतकेलिकला-
लसदङ्घ्रिसरोरुहसङ्गरुचिम् ॥
मुदितोऽट कलेरपनेतुमघं
यदि चेच्छसि जन्म निजं सफलम् ॥

कीर्तितैषा चतूरेफिका स्रग्विणी ॥ ७ ॥

इन्द्रनीलोपलेनेव या निर्मिता
शातकुम्भद्रवालङ्कृता शोभते ॥
नव्यमेघच्छविः पीतवासा हरे-
र्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥

बाणाश्वैश्छिन्ना वैश्वदेवी मभौ यौ ॥ ८ ॥

अर्चामन्येषां त्वं विहायामराणा-
मद्धैतेनैकं विष्णुमभ्यर्च्य भक्त्या ॥
तत्राशेषात्मन्यर्चिते भाविनी ते
भ्रातः सम्पन्नाराधना वैश्वदेवी ॥

प्रमिताक्षरा सजससैः कथिता ॥ ९ ॥

अमृतस्य शीकरमिवोद्गिरती
रदमौक्तिकांशुलहरीच्छुरिता ॥

समीरणोल्लसितलतान्तरालगो
यथा मरुत्तरलतमालभूरुहः ॥
अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वयो दशरथ इत्युदाहृतः ॥
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत्स्वयम् ॥ इति भट्टौ ।

वेदै रन्ध्रैर्तौ यसगा मत्तमयूरम् ॥ ३ ॥

लीलानृत्यन्मत्तमयूरध्वनिकान्तं
नृत्यन्नीपामोदिपयोदानिलरम्यम् ॥
रासक्रीडाकृष्टमना गोपवधूभिः
कंसध्वंसी निर्जनवृन्दावनमाप ॥

हा तातेति क्रन्दितमाकर्ण्य विपण्ण-
स्तस्यान्विष्यन्वेतसगूढं प्रभवं सः ॥
शल्यग्रोतं वीक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीन्नितिपोऽपि ॥ इति रघौ ।

नयुगलसयुगलगैरिति चण्डी ॥ ४ ॥

जयति दितिजरिपुताण्डवलीला-
कुपितकवलकरकालियमौलौ ॥
चरणकमलयुगचापलचण्डी
पदनखरुचिजितभोगमणिश्रीः ॥

सजसौ जगौ च यदि मञ्जुभाषिणी ॥ ५ ॥

अमृतोर्मिशीतलकरेण लालयं-
स्तनुकान्तिरोचितविलोचनो हरे ॥
नियतं कलानिधिरसीति वल्लवी
मुदमच्युते व्यधित मञ्जुभाषिणी ॥
सुनन्दिनीति शम्भौ ॥

ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥ ६ ॥

शरदमृतरुचश्चन्द्रिकाक्षालिते
दिनकरतनयातीरदेशे हरिः ॥
विहरति रभसाद्वल्लवीभिः समं
त्रिदिवयुवतिभिः कोऽपि देवो यथा ॥

इह दुरधिगमैः किञ्चिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ॥
अमुमतिविपिनं वेद दिग्व्यापिनं
पुरुषमिव परं पद्मयोनिः परम् ॥ इति भारवौ ।
उत्पलिनीति केचित् ।

सजसा सगौ च कथितः कलहंसः ॥ ७ ॥

यमुनाविहारकुतुके कलहंसौ
व्रजकामिनीकमलिनीकृतकेलिः ॥
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः ॥
सिंहनादः क्वापि ।

सजसौ जगौ च भवति प्रबोधिता ॥ ८ ॥

शयिता मृषा चटुलमाननिद्रया
रतिकेलिकुञ्जनिलये विलासिनी ॥
मुरवैरिणा वदनचुम्बनादिना
स्मितमाततान सपदि प्रबोधिता ॥

भवति मृगेन्द्रमुखं नजौ जरौ गः ॥ ९ ॥

गुरुभुजवीर्यभरं हरिं मदान्धा
युधि समुपेत्य न दानवा जिजीवुः ॥
क्षुधितमृगेन्द्रमुखं मृगा उपेत्य
क्व नु खलु बिभ्रति जीवनस्य योगम् ॥

(१८) शर्करी । (चतुर्दशाक्षरा वृत्तिः ।)

मो गौ नौ मश्चेच्छरनवभिरसम्बाधा ॥ १ ॥

वीर्याग्नौ येन ज्वलति रणवशात्क्षिप्ते
दैत्येन्द्रे जाता धरणिरियमसम्बाधा ॥
धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः
साधूनां बाधां प्रशमयतु स कंसारिः ॥

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ॥ २ ॥

फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमत्र रौति ॥
वात्येष पुष्पसुरभिर्मलयाद्विवातो
यातो हरिः स मधुरां विधिना हताः स्मः ॥

सिंहोद्धता क्वापि ।

ननरसलघुगैः स्वरैपराजिता ॥ ३ ॥

यदनवधिभुजप्रतापकृतास्पदा
यदुनिचयचमूः पररपराजिता ॥
व्यजयत समरे समस्तरिपुव्रजं
स जयति जगतां गतिर्गरुडध्वजः ॥

ननभनलगिति प्रहरणकलिका ॥ ४ ॥

व्यथयति कुसुमप्रहरणकलिका
प्रमदवनभवा तव धनुषि तता ॥
विरहविपदि मे शरणमिह ततो
मधुमथनगुणस्मरणमविरतम् ॥

मात्तो नो मो गौ यदि गदिता वासन्तीयम् ॥ ५ ॥

भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला ॥
लीलालोला पल्लवविलसद्धस्तोल्लासैः
कंसारातौ नृत्यति सदृशी वासन्तीयम् ॥

द्विःसप्तच्छिदि लोला म्सौ म्भौ गौ चरणे चेत् ॥ ६ ॥

मुग्धे ! यौवनलक्ष्मीर्विद्युद्विभ्रमलोला
त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ॥
तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे
श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥

स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ॥ ७ ॥

सरसखगकुलालापनान्दीमुखीयं
लहरिभुजलया चारुफेनस्मितश्रीः ॥
मुरहर ! कलयासक्तिमासाद्य किं ते
प्रमुदितहृदया भानुजा नृत्यतीह ॥

(१५) अतिशर्करी । (पञ्चदशाक्षरा वृत्तिः)

गुरुनिधनमनुलघुरिह शशिकला ॥ १ ॥

मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगगनगता ॥
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम् ॥

स्रगियमपि च रसनवरचितयतिः ॥ २ ॥
अयि ! सहचरि ! रुचिरतरगुणमयी
मदिमवसतिरनपगतपरिमला ॥
स्रगिव निवस विलसदनुपमरसा
सुमुखि ! मुदितदनुजदलनहृदये ॥

वसुमुनियतिरिति मणिगुणनिकरः ॥ ३ ॥
नरकरिपुरवतु निखिलसुरगति-
रमितमहिमभरसहजनिवसतिः ॥
अनवधिमणिगुणनिकरपरिचितः
सरिदधिपतिरिव धृततनुविभवः ॥

ननमययुतेयं मालिनी भोगिलोकैः ॥ ४ ॥
मृगमदकृतचर्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा ।
अनृजु निहितमंसे वंशमुत्काणयन्ती
धृतमधुरिपुलीला मालिनी पातु राधा ॥

एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ॥ ५ ॥
पायाद्वो गोविन्दः कालिन्दीकूलतोणीचक्रे
रासोल्लासक्रीडद्गोपीभिः सार्धं लीलाखेलः ॥
मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लोलो
यद्वद्देवानामीशः स्वर्वेश्यामिः खेलन्तीभिः ॥
मा कान्ते ! पक्षस्यान्ते पर्याकाशे देशे स्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत् ॥
क्षुत्क्षामः प्राटंश्चेतश्चेतो राहुः क्रूरः प्राद्या-
त्तस्माद्वान्ते हर्म्यस्यान्ते शय्यैकान्ते कर्तव्या ॥

इति कण्ठाभरणः ।

विपिनतिलकं नसनरेफयुग्मैर्भवेत् ॥ ६ ॥
विपिनतिलकं विकसितं वसन्तागमे
मधुकृतमदैर्मधुकरैः कणद्भिर्वृतम् ॥
मलयमरुता रचितलास्यमालोकय-
न्व्रजयुवतिभिर्विहरति स्म मुग्धो हरिः ॥

तूणकं समानिकापदद्वयं त्रिनान्तिमम् ॥ ७ ॥

सा सुवर्णकेतकं विकाशि भृङ्गपूरितं
पञ्चबाणबाणजालपूर्णहेमतूणकम् ॥
राधिका वितर्क्य माधवाद्य मासि माधवे
मोहमेति निर्भरं त्वया विना कलानिधे ! ॥

म्रौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥ ८ ॥

विच्छेदे ते मुरारे ! पाण्डुप्रकाशा कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा ॥
राधाम्भोदस्य गर्भे लीना यथा चन्द्रलेखा
किंचार्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥

चित्रा नाम च्छन्दश्चित्रं चेत्रयो मा यकारौ ॥ ९ ॥

गोपालीलीलालोला यद्वत्कलिन्दात्मजान्ते
खेलन्मुक्ताहाराराणत्स्रग्लसन्मूर्धचित्रा ॥
कंसारातेर्मूर्तिस्तद्वन्मे हृदि क्रीडतीयं
कोऽन्यः स्वर्गो मोक्षो वास्माद्विद्यते तन्न जाने ॥

(१६) अष्टिः । (षोडशाक्षरा वृत्तिः ।)

चित्रसंज्ञमीरितं समानिकापदद्वयं तु ॥ १ ॥

विद्रुमारुणाधरौष्ठशोभि वेणुवाद्यहृष्ट-
वल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग ! ॥
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव !
वन्यपुष्पचित्रकेश ! संस्मरामि गोपवेश ! ॥

भ्रत्रिनगैः स्वराङ्कमृषभगजविलसितम् ॥ २ ॥

यो हरिरुच्चखान खरतरनखशिखरै-
र्दुर्जयदैत्यसिंहसुविकटहृदयतटम् ॥
किं न्विह चित्रमेतदखिलमपहृतवतः
कंसनिदेशदूष्यदृषभगजविलसितम् ॥

गजतुरगविलसितमिति शम्भौ ।

भात्समतनगैरष्टच्छेदे स्यादिह चकिता ॥ ३ ॥

दुर्जयदनुजश्रेणी दुश्चेष्टाशतचकिता
यद्भुजपरिघत्राता याता साध्वसविगमम् ॥
दीव्यति दिविषन्माला शश्वन्नन्दनविपिने
गच्छत शरणं कृष्णं तं भीता ! भवरिपुतः ॥

प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥ ४ ॥

सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ॥
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥

म्भौ नौ म्नौ गो मदनललिता वेदैः षड्भुतुभिः ॥ ५ ॥

विभ्रष्टस्रग्गलितचिकुरा धौताधरपुटा
ग्लायत्पत्रावलिकुचतटोच्छ्वासोर्मितरला ॥
राधाऽत्यर्थं मदनललितान्दोलालसवपुः
कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥

नजभजैर्यदा भवति वाणिनी गयुक्तैः ॥ ६ ॥

स्फुरतु ममाननेऽद्य ननु वाणि ! नीतिरम्यं
तव चरणप्रसादपरिपाकतः कवित्वम् ॥
भवजलराशिपारकरणक्षमं मुकुन्दं
सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥

यमौ न स्रौ गश्च प्रवरललितं नाम वृत्तम् ॥ ७ ॥

भुजोत्क्षेपः शून्ये चलवलयझङ्कारयुक्तो
मुधा पादन्यासः प्रकटिततुलाकोटिनादः ॥
स्मितं वक्त्रेऽकस्माद् दृशि पटुकटाक्षोर्मिलीला
हरौ जोयादीदृक्प्रवरललितं वल्लवीनाम् ॥

द्विगुणितवसुलघुभिरचलधृतिरिह ॥ ८ ॥

तरणिदुहितृतटरुचिरतरवसति-
स्मरमुनिमुखजनविहितनुतिरिह ॥
मुररिपुरभिनवजलधररुचितनु-
रचलधृतिरुदयति सुकृतिहृदि खलु ॥

गरुडरुतं नजौ भजतगा यदा स्युस्तदा ॥ ९ ॥

श्रमरमयूरमानसमुदे पयोदध्वनि
र्गरुडरुतं मुरारिभुजगेन्द्रसन्त्रासने ॥
धरणिभरावतारविधिडिण्डिमाडम्बरः
स जयति कंसरङ्गभुवि सिंहनादो हरेः ॥

(१७) अत्यष्टिः । (सप्तदशाक्षरा वृत्तिः ।)

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ ६ ॥

करादस्य भ्रष्टे ननु शिखरिणी दृश्यति शिशो-
र्विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः ॥
इति त्रस्यद्गोपानुचितनिभृतालापजनितं
स्मितं बिभ्रद्देवो जगदवतु गोवर्धनधरः ॥

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ २ ॥

दुरन्तदनुजेश्वरप्रकरदुस्थपृथ्वीभरं
जहार निजलीलया यदुकुलेऽवतीर्याशु यः ॥
स एष जगतां गतिर्दुरितभारमस्मादृशां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ २ ॥

नूतनवंशपत्रपतितं रजनिजललवं
पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ॥
एष च तं चकोरनिकरः प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥
सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ॥
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥ इति भारवौ ।
वंशपत्रपतितेति केचित् ।

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ॥ ४ ॥

प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै-
र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला ॥
एवं शिक्षावचनसुधया राधिकायाः सखीनां
प्रीतः पायान्स्मितसुवदनो देवकीनन्दनो नः ॥

नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ॥ ५ ॥

व्यधित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणा-
ञ्जमृगदृशां सन्दोहस्योल्लसन्नयनश्रियम् ॥
यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे
व्यकिरदधिकं बद्धाकाङ्क्षे विलोलविलोचनम् ॥

यदि भवतो नजौ भजजला गुरु नर्दटकम् ॥ ६ ॥

व्रजवनितावसन्तलतिकाविलसन्मधुपं
मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् ॥
विभुमभिनौति कोपि सुकृती मुदितेन हृदा
रुचिरपदावलीघटितनर्दटकेन कविः ॥
हयऋतुसागरैर्यतियुतं यदि कोकिलकम् ॥ ७ ॥

लसदरुणेक्षणं मधुरभाषणमोदकरं
मधुसमयागमे सरसकेलिभिरुल्लसितम् ॥
अलिललितद्युतिं रविसुतावनकोकिलकं
ननु कलयामि तं सखि ! सदा हृदि नन्दसुतम् ॥
वेदर्त्वश्वैर्मभनमयला गश्चेत्तदा हारिणी ॥ ८ ॥

यस्या नित्यं श्रुतिकुवलये श्रीशालिनी लोचने
रागः स्वीयोऽधरकिसलये लाक्षारसारञ्जनम् ॥
गौरी कान्तिः प्रकटरुचिरा रम्याङ्गरागच्छटा
सा कंसारेरजनि न कथं राधा मनोहारिणी ॥
भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हयैः ॥ ९ ॥

भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणा-
त्कम्पं धत्ते श्रमजलकणं तथा परिमुञ्चति ॥
इत्यावृण्वञ्जयति जलदस्वनाकुलबल्लवी
संश्लेषोत्थं स्मरविलसितं विलोक्य गुरुं हरिः ॥

(१८) धृतिः । (अष्टादशाक्षरा वृत्तिः ।)

स्याद् भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ १ ॥

क्रीडत्कालिन्दीललितलहरीवारिभिर्दीक्षिणात्यै-
र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम् ॥
भृङ्गालीगीतैः किसलयकरोल्लासितैर्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥
ग्राम्याज्जानूपं पिशितलवणं शुष्कशाकं नवान्नं
गौडं पिष्टान्नं दधि सकृशरं निर्जलं मद्यमम्लम् ॥
धाना वल्लूरं समसनमथो गुर्वसात्म्यं विदाहि
स्वप्नं चारात्रौ श्वयथुगदवान्वर्जयेदङ्गनां च ॥ इतिवैद्यके ।
नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ॥ २ ॥

तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् ॥

मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनन्दनं व्रज सखे ! सुखाय वृन्दावनम् ॥
अहत धनेश्वरस्य युधि यः समेतमायोधनं
तदहमिनो विलोक्य विबुधैः कृतोत्तमायोधनम् ॥
विभवमदेन निहतहियातिमात्रसम्पन्नकं
व्यथयति सत्पथादधिगताथवेह सम्पन्न कम् ॥ इतिभट्टौ

इह ननरचतुष्कमृष्टं तु नाराचमाचक्षते ॥ ३ ॥

दिनकरतनयातटीकानने चारुसञ्चारिणी
श्रवणनिकटकृष्टमेणेक्षणा कृष्ण ! राधा त्वयि ॥
ननु विकिरति नेत्रनाराचमेषातिहृच्छेदनं
तदिह मदनविभ्रमोद्भ्रान्तचित्तां विधत्स्व द्रुतम् ॥
रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे सङ्क्रमय्य श्रियं वैरिणः ॥
रविसुतसहितेन तेनाद्भुतात्सस्मौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ इति रघौ ।

मन्दाक्रान्ता नपरलघुयुता कीर्तिता चित्रलेखा ॥ ४ ॥

शङ्केऽमुष्मिन्नगति मृगदृशां सारसूपं यदासी-
दाकृष्यैवं व्रजयुवतिभ्यो वेधसा सा व्यधायि ॥
नैतादृक्चेत्कथमुदधिसुतासक्तचेतास्युतस्य
प्रीतं तस्यां नयनयुगमभूच्चित्रलेखादृशायाम् ॥

मः सोजः सतसा दिनेशऋतुभिः शार्दूललालितम् ॥ ५ ॥

कृत्वा कंसमृगं पराक्रमविधिं शार्दूललालितं
यश्चक्रे क्षितिभारकारिषु दरं चैद्यप्रभृतिषु ॥
सन्तोषं परमं तु देवनिवहे त्रैलोक्यशरणं
श्रेयो नः स तनोत्पराभवहिमा लक्ष्मीप्रियतमः ॥

(१९) अतिधृतिः । (अष्टाविंशत्यक्षरा वृत्तिः ।)

रसर्त्वश्वैर्मौ नसौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ॥ १ ॥

कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका
विनिद्राः कन्दल्यो दिशि दिशि मुदा दर्दुरा द्रुतनादाः ॥
निशा सूच्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चे-
त्प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात्किमन्यत् ॥

उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः
कुहूकण्ठी कण्ठीरवरवलवत्रासितप्रोषितेभाः ॥
अमी चैत्रे मैत्रावरुणितरुणीकेलिकङ्केलिमल्ली-
चलल्लीहल्लीसकसुरभयश्चञ्चि चञ्चन्ति वाताः ॥

इति कस्यचित् ।

भवेत्सैव च्छाया तयुगगयुता स्याद्वादशान्ते यदा ॥ २ ॥

अभीष्टं जुष्टो यो वितरति लसद्दोश्चारुशाखोज्ज्वलः
स्फुरन्नानारत्नस्तवकिततनुश्चित्रांशुकालम्बितः ॥
न यस्याङ्घ्रेश्छायामुपगतवतां संसारतीव्रातप-
स्तनोति प्रोत्तापं जयति जगतां कंसारिकल्पद्रुमः ॥

सूर्याश्वैर्यदि मः सजौ सतनगाः शार्दूलविक्रीडितम् ॥ ३ ॥

गोविन्दं प्रणमोत्तमाङ्ग ! रसने ! तं घोषयाहर्निशं
पाणी ! पूजयतं मनः ! स्मर पदे ! तस्यालयं गच्छतम् ॥
एवं चेन्न कुरुताखिलं मम हितं शीर्षादयस्तद् ध्रुवं
न प्रेत्ते भवतां कृते भवमहाशार्दूलविक्रीडितम् ॥

म्रौ म्रौ यो नो गुरुश्चेत्स्वरमुनिकरणैराह सुरसाम् ॥ ४ ॥

कामक्रीडासतृष्णो मधुसमयसमारम्भरभसा-
त्कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः ॥
गोविन्दो बल्लवीनामधररसमुधां प्राप्य सुरसां
शङ्के पीयूषपानः प्रत्ययकृतमुखं व्यस्मरदसौ ।

मो गौ नौ तौ गौ स्वरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥ ५ ॥

शश्वल्लोकानां प्रकटितकदलं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिस्त्रिदिवसतिभिर्व्योमसंस्थैर्विमुक्तम् ॥
मुग्धामोदेन स्थगितदशदिगाभोगमाहृतभृङ्गं
मौलौ दैत्यारेर्न्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥

(२०) कृतिः । (विंशत्यक्षरा वृत्तिः ।)

ज्ञेया सप्ताश्वपद्भिर्मरभनययुता भ्लौ गः सुवदना ॥ १ ॥

प्रत्याहृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना
त्वां ध्यायन्ती निकुञ्जे परतरपुरुषं हर्षोत्थपुलका ॥
आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका
कामार्तिं त्यक्तुकामा ननु नरकरिपो ! राधा मम सखी ॥

सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ॥ २ ॥

करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा
रसै रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा ॥
बहुलानुरागनिवासरासससमुद्भवा तव रागिणं
विदधौ हरिं खलु वल्लवीजनचारुचामरगीतिका ॥
इति महाकाव्ये ।

वृत्तमीदृशं तु नामतो रजौ रजौ रजौ गुरुर्लघुश्च ॥ ३ ॥
जसौ चित्रवृत्तिलीलया निसर्गरम्यदेहरूपविभ्रमेण
राजमानसद्वयोर्विलाससम्पदा कलाकुतूहलेन ॥
यः समं व्रजाङ्गनाजनैः सुराङ्गनानिभैः सुखं समेत्य
विष्णुरुल्ललास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥

रसाश्वाश्वैः शोभा नयुगगजठरा मेघविस्फूर्जिता चेत् ॥ ४ ॥
दिङ्मु सदा पूषन्मीलत्सरसिजयुगला मध्यनम्रा फलाभ्यां
तयोरूर्ध्वं राजत्तरलकिसलयाश्लिष्टसुस्निग्धशाखा ॥
लसन्मुक्तारक्तोत्पलकुवलयवन्द्रविम्बाञ्चिताग्रा-
महो शोभा मौलौ मिलदलिपटलैः कृष्ण! सा कापि वल्ली ॥

(२१) प्रकृतिः । (एकविंशत्यक्षरा वृत्तिः ।)

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता म्लग्धरा कीर्तितेयम् ॥ १ ॥
व्याकोषेन्दीवराभा कनककपलसत्पीतवासाः सुहासा
बर्हेरुच्चन्द्रकान्तैर्वलयितचिकुरा चारुकर्णावतंसा ॥
न्दाक्र श्रंसव्यासक्तवंशीध्वनिसुखितजगद्वल्लवीभिर्लसन्ती
मूर्तिर्गोपस्य विष्णोरवतु जगति नः म्लग्धरा हारिहारा ॥

नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ॥ २ ॥
चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्मिषु
स्फुटवदनाम्बुजासु विलसद्भुजबालमृणालवल्लिषु ॥
समरर कुचयुगचक्रवाकमिथुनानुगतासु कलाकुतूहली
व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम् ॥
तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ॥
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-
श्चिरगलितश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥
इ भ इति माघे ।

(२२) आकृतिः । (द्वाविंशत्यक्षरा वृत्तिः ।)

मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी ॥ १ ॥

सार्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती
कामक्रीडाकूतस्फीतप्रमदसरसतरमलघु रसन्ती ॥
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसराते ! पश्य स्वच्छं सरभसगतिरिह विलसति हंसी ॥

सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा ॥ २ ॥

माधवमासि विकस्वरकेसरपुष्पलसन्मदिरामुदितै-
र्भृङ्गकुलैरुपगीतवने वनमालिनमालि ! कलानिलयम् ॥
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोज्ञरसं
तं भज माधविकामृदुनर्तनयामुनवातकृतोपगमा ॥

(२३) विकृतिः । (त्रयोविंशत्यक्षरा वृत्तिः ।)

नजभजभा जभौ लघुगुरू बुधैस्तु गदितेयमद्रितनया ॥ १ ॥

खरतरशौर्यपावकशिखापतङ्गनिभभग्नद्रुमदनुजो
जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा ॥
भुवनहितावतारचतुरश्चराचरधरोऽवतीर्ण इह हि
क्षितिवलयेऽस्ति कंस ! शमनस्तवेति तमवोचदद्रितनया ॥
विलुलितपुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमं
कुसुमनिपातचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ॥
शकुननिनादनादितककुब्विलोलविपलायमानहरिणं
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥

इति भट्टौ । अश्वललितमिदमन्यत्र ।

मत्ताक्रीडं वास्विष्वाशायति मयुगगयुगमनुलघुगुरुभिः ॥ २ ॥

मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसुलभमधुरमधुरसा-
द्राने याने किंचित्स्पन्दत्पदमरुणनयनयुगलसरसिजम् ॥
रासोल्लासक्रीडत्कव्रजयुवतिवलयविहितभुजरसं
सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनवचरणपरिचयम् ॥

(२४) संकृतिः । (चतुर्विंशत्यक्षरा वृत्तिः ।)

भूतमुनींनैर्यतिरिह भतनाः
स्मौ भनयाश्च यदि भवति तन्वी ॥ १ ॥

माधव ! मुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः
कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा ॥

पद्मपलाशैर्विरचितशयना देहजसञ्ज्वरभरपरिदूनै-
र्निश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी ॥

(२५) अतिकृतिः । (पञ्चविंशत्यक्षरा वृत्तिः ।)

क्रौञ्चपदा स्याद्धो मसगा-
श्चेदिषुशरवसुमुनियतिमनुलघुगैः ॥ १ ॥

क्रौञ्चपदालीचित्रिततीरा मदकलखगकुलकलरुचिरा
फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपरभसकरी ॥
फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनुः
पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिमकिरणजा॥

(२६) उत्कृतिः । (षड्विंशत्यक्षरा वृत्तिः ।)

वस्वीशाश्वैश्छेदोपेतं ममतनयुग-
लमजजगैर्भुजङ्गविजृम्भितम् ॥१॥

हेलोद्धून्यधूत्पादप्रकटविकटनटनभरो रणत्करतालक-
ध्वारुप्रेङ्खच्चूडावर्हः श्रुतितरलनवकिसलयस्तरङ्गितहारधृक् ॥
त्रस्यन्नागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुगं कृतस्तुतिरच्युतः
पायान्नश्छिन्दन्कालिन्दीहृदकृतनिजवसतिबृहद्भुजङ्गविजृम्भितम्॥

दण्डकः ।

यदिह नयुगलं ततः सप्तरेफास्तदा
चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥ १ ॥

प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं
सपदि समवलोक्य सव्येन हस्तेन गोवर्धनं नाम शैलं दधल्लीलया ॥
कमलनयन ! रक्ष रक्षेति गर्जत्त्रसन्मुग्धगोपाङ्गानन्दितो
गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय नः ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णोऽर्णव-
व्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥ २ ॥

जयजयजगदीशविष्णोहरेरामदामोदरश्रीनिवासाच्युतानन्तनारायण
त्रिदशगणगुरो मुरारे मुकुन्दासुरारे हृषीकेश पीताम्बर श्रीपते माधव ॥
गरुडगमन कृष्ण वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधाधोक्षज श्रीनिधे
बलिदमननृसिंहशौरेभवाम्भोधिघोरार्णसित्वंनिमज्जन्तमभ्युद्धरोपेत्यमाम् ॥
एवमर्णवादीनामप्युदाहरणानि बोध्यानि ।

प्रचितकसमभिधो धीरधीभिः स्मृतो
दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥ ३ ॥

मुरहर यदुकुलाम्भोधिचन्द्र प्रभो देवकीगर्भरत्न त्रिलोकैकनाथ
प्रचितकपटसुरारिव्रजोद्दामदन्तावलस्तोमविद्रावणे केसरीन्द्र ॥
चरणनखरसुधांशुच्छटोन्मेषनिःशेषितध्यायिचेतोनिविष्टान्धकार
प्रणतजनपरितापोग्रदावानलोच्छेदमेघ प्रसीद प्रसीद ॥

यत्र दृश्यते गुरोः परो लघुः
क्रमात्स उच्यते बुधैरशोकपुष्पमञ्जरीति ॥ ४ ॥

मूर्ध्नि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारुचन्द्रिका कचेषु
कर्णयोरशोकपुष्पमञ्जरीवतंसको गले च कान्तकेसरोपकल्पदाम ॥
फुल्लनागकेसरादिपुष्परेणुरूषणं तनौ विचित्रमित्युपात्तवेश एष
केशवः पुनातु नः सुपुष्पभूषितः सुमूर्तिमानिवागतो मधुर्विहर्तुमत्र ॥

सगणः सकलः खलु यत्र भवे-
त्तमिह प्रवदन्ति बुधाः कुसुमस्तवकम् ॥ ५ ॥

विरराज यदीयकरः कनकद्युतिबन्धुरवामदृशः कुचकुड्मलगो
भ्रमरप्रकरेण यथावृतमूर्तिरशोकलताविलसत्कुसुमस्तवकः ॥
स नवीनतमालदलप्रतिमच्छवि बिभ्रदतीव विलोचनहारि वपु-
श्चपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुजमध्यगतः ॥

यत्र रेफः परं स्वेच्छया गुम्भितः
स स्मृतो दण्डको मत्तमातङ्गलीलाकरः ॥ ६ ॥

हेमगौरे वसानोऽशुके शक्रनीलासिते वर्ष्मणि स्पष्टदिव्यानुलेपाङ्किता
तारहारांशुवच्चोनभश्चित्रमालाञ्चितो भव्यभूषोज्ज्वलाङ्गः समं सीरिणा ॥
अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीलापरीहासहासोर्मिकौतूहलैः
कंसरङ्गाद्विगः पातु नश्चक्रपाणिर्गतिक्रीडया मत्तमातङ्गलीलाकरः ॥

लघुर्गुरुर्निजेच्छया यदा निवेश्यते
तदैष दण्डको भवत्यनङ्गशेखरः ॥ ७ ॥

उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके विजृम्भमाणगौरदीधितौ
रतिस्वहस्तनिर्मितः कलाकुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु ॥
इतिप्रमोदकारिणीं प्रियाप्रसादलक्षणां गिरं समुद्गिरन्मुरारिरद्भुतां
प्रदोषकालसङ्गमोल्लसन्मना मनोज्ञकेलिकौतुकी करोतु नः कृतार्थताम् ॥

इति छन्दोमञ्जर्यां समवृत्ताख्यो द्वितीयः स्तबकः ।

तृतीयः स्तबकः ।

विषमे यदि सौ सलगा दले
भौ युजि भाद्गुरुकावुपचित्रम् ॥ १ ॥

द्विरावृत्त्या श्लोकः पूरयितव्यः ॥

मुरवैरिवपुस्तनुतां मुदं हेमनिभांशुकचन्दनलिप्तम् ॥
गगनं चपलामिलितं यथा शारदनीरधरैरुपचित्रम्

विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती स्यात् ॥ २ ॥

स्मरवेगवती व्रजरामा केशववंशरवैरतिमुग्धा ॥
रभसान्न गुरून्गणयन्ती केलिनिकुञ्जगृहाय जगाम ॥

अयुजि प्रथमेन विवर्जिता द्रुतविलम्बितता हरिणप्लुता ॥ ३ ॥

स्फुटफेनचया हरिणप्लुता बलिमनोज्ञतटा तरणेः सुता ॥
कलहंसकुलारवशालिनी विहरतो हरति स्म हरेर्मनः ॥

अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ ॥ ४ ॥

स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम् ॥
मृगयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमा ॥

अयुजि नयुगरेफतो यकारो-
युजि तु नजौ जरगाश्च पुष्पिताग्रा ॥ ५ ॥

वैतालीयं पुष्पिताग्रां चेच्छून्यपरवक्त्रकम् ।

करकिसलयशोभया विभान्ती कुचफलभारविनम्रदेहयष्टिः ॥
स्मितरुचिरविलासपुष्पिताग्रा व्रजयुवतिव्रततिर्हरेर्मुदेऽभूत् ॥

अयुजोर्यदि सौ जगौ युजोः सभरागौ यदि सुन्दरी तथा ॥ ६ ॥

यदवोचदुदीक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा ॥
अपि कंसहरस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥
यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ॥
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥

इति भारवौ ।

इति छन्दोमञ्जर्यामर्धसमाख्यस्तृतीयः स्तबकः ।

चतुर्थः स्तबकः ।

प्रथमे सजौ यदि सलौ च
नसजगुरुकाण्यनन्तरम् ॥
यद्यथ भनभगाः स्युरथो
सजसा जगौ च भवतीयमुद्गता ॥ १ ॥

विललास गोपरमणीषु तरणितनया प्रमोद्गता ॥
कृष्णनयनचकोरयुगे दधती सुधांशुकिरणोर्मिविभ्रमम् ॥

प्रथमे सजौ यदि सलौ च
नसजगुरुकाण्यनन्तरम् ॥
यद्यथ भनजलगाः स्युरथो
सजसा जगौ च भवतीयमुद्गता ॥ २ ॥

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ॥
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥

इति भारवावुद्गताभेदः ॥

त्रयमुद्गतासदृशमेव
पदमिह तृतीयमन्यथा ॥
जायते रनभगैर्ग्रथितं
कथयन्ति सौरभमिदं तदीदृशम् ॥ ३ ॥

परिभूतफुल्लशतपत्रवनविसृतगन्धविभ्रमा ।
कस्य हृन्न हरतीह हरे ! मुखपद्मसौरभकला तवाद्भुता ॥

नयुगं सकारयुगलं च
भवति यदि चेत्तृतीयके ॥
तदुदितमुरुमतिभिर्ललितं
यदि शेषमस्य सकलं यथोद्गता ॥ ४ ॥

व्रजसुन्दरीसमुदयेन मुदितमनसा स्म पीयते ।
हिमकरगलितमिवामृतकं ललितं मुरारिमुखचन्द्रविद्रुतम् ॥

भवत्यर्धसमं वक्त्रं विषमं च कदाचन ॥
तयोर्द्वयोरुपान्तेऽत्र छन्दस्तदधुनोच्यते ॥

वक्त्रं युग्भ्यां मगौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥ ५ ॥

अत्रापि द्विरावृत्त्या श्लोकः पूरयितव्यः ।

वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं फुल्लम् ।
बल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः ॥

युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्तितम् ॥ ६ ॥

रासकेलिसतृष्णस्य कृष्णस्य मधुवासरे ।
आसीद्रोपमृगाक्षीणां पथ्या वक्त्रमधुस्तुतिः ॥

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥
गुरु षष्ठं च पादानां शेषेष्वनियमो मतः ॥ ७ ॥
प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वक्त्रलक्षणम् ॥
लोकेऽनुष्टुबिति ख्यातं तस्याष्टाक्षरता कृता ॥ ८ ॥

इति छन्दोमञ्जर्यां विषमवृत्ताख्यश्चतुर्थः स्तबकः ।

पञ्चमः स्तबकः ।

अथार्या ।

लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः ॥
षष्ठो जश्च नलघु वा प्रथमार्धे नियतमार्यायाः ॥ १ ॥
षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः ॥
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥

कृष्णः शिशुः सुतो मे बल्लवकुलटाभिराहृतो न गृहे ।
क्षणमपि वसत्यसाविति जगाद गोष्ठ्यां यशोदार्या ॥
वृन्दावने सलीलं वल्गुद्रुमकाण्डनिहिततनुयष्टिः ।
स्मेरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः ॥

पथ्या विपुला चपला मुखचपला जघनचपला च ॥
गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधाऽऽर्या ॥ ३ ॥
प्रथमगणत्रयविरतिर्दलयोरुभयोः प्रकीर्तिता पथ्या ।

जय जय जगदीश ! विभो ! केशव ! कंसान्त ! माधवानन्त ! ।
कुरु करुणामिति भणितिः पथ्या भवरोगदुःस्थानाम् ॥

संलक्ष्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ॥४॥

यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥
पुंसां कलिकालव्यालहतानां नास्त्युपहतिरल्पापि ।
वीर्यविपुला मुखे चेत्स्याद्गोविन्दाख्यमन्त्रोक्तिः ॥
दलयोर्द्वितीयतुर्यौ गणौ जकारौ तु यत्र चपला सा ॥ ५ ॥

द्विरावृत्त्या श्लोकः पूरयितव्यः ।

चपला न चेत्कदाचिन्नृणां भवेद्भक्तिभावना कृष्णे ।
धर्मार्थकाममोक्षास्तदा करस्था न सन्देहः ॥

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ॥
शेषः पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

नन्दसुत ! वञ्चकस्त्वं दृढं न ते प्रेम गच्छ तत्रैव ।
यत्र भवति ते रागः कापि जगादेति मुखचपला ॥

प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे च चपलायाः ॥
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥

कृष्णः शृङ्गारपटुर्यौवनमदरागचपललितागः ।
आसीद् व्रजाङ्गनानां मनोहरो जघनचपलानाम् ॥

आर्याप्रथमार्धसमं यस्या अपरार्धमीरिता गीतिः ॥
केशववंशजगीतिर्लोकमनोहरिणहारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाश्चर्या ॥

आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतिम् ॥ ८ ॥

नवगोपसुन्दरीणां रासोल्लासे मुरारातिम् ।
अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतेः ॥

आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः ॥
नारायणस्य सन्ततमुद्गीतिः संस्मृतिर्भक्त्या ।
अर्चायामासक्तिर्दुस्तरसंसारसागरे तरणिः ॥

आर्याप्राग्दलमन्तेऽधिकगुरु तादृक्परार्धमार्यागीतिः ॥ ९ ॥

द्विरावृत्त्या श्लोकः पूरणीयः ।

हर्षाश्रुस्तिमितदृशः प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः ।
आर्यागीतिं भक्ता गायन्ति श्रीपतेश्चरितसम्बद्धाम् ॥
चारुसमीरणविपिने हरिणकलङ्ककिरणावली सविलासा ।
आबद्धरागमोहा वेलामूले विभावरी परिहीना ॥ इति भट्टौ ।

अथ वैतालीयम् ।

षड् विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ॥
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥ १ ॥
घुसृणेन मदेन चर्चितं तव यन्निन्दति राधिके कुचम् ।
मुदमातनुतेऽत्र पाकिमं तद्वैतालीयं फलं हरेः ॥
तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसिकं कवीन्द्रहृद्यम् ॥२॥

द्विरावृत्त्या श्लोकः पूरयितव्यः ।

आतन्वानं सुरारिकान्तास्वौपच्छन्दसिकं हृदो विनोदम् ।
कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम् ॥

अथ पज्झटिका ।

प्रतिपदयमकितषोडशमात्रानवमगुरुत्वविभूषितगात्रा ॥
पज्झटिकाया एष विवेकः क्वापि न मध्यगुरुर्गण एकः ॥१॥
तरलवतंसास्थिरुस्कन्धश्चलतरपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकवृन्दः कालियशिरसि ननर्त मुकुन्दः ॥
नवमगुरुत्वं व्यभिचरति च रणधरणीजितरजनिविहारीति ॥
मात्रात्रयोदशकं यदि पूर्वं लघुकविरामि ॥
पठ पुनरेकादशं दोहडिका द्विगुणेन ॥ २ ॥

प्राकृतभाषायां प्रचारः ।

राई दोहडि पठए सुणि हासिओ करणगोआल ।
विन्दावणघणकुञ्जघरचलिओ कमण रसाल ॥

इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः पञ्चमः स्तबकः ।

षष्ठः स्तबकः ।

गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः ॥
प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते ॥ १ ॥
अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम् ॥
वृत्तकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥ २ ॥
अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम् ॥
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥ १ ॥

भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम् ॥ ४ ॥

वृत्तकं यथा—

स हि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुराङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशेऽवतार । यस्तु प्रसङ्गेनापि स्मृतोऽभ्यर्चितो वा गृहीतनामा पुंसां संसारसागरपारमवलोकयति ।

उत्कलिकाप्रायं यथा—

प्रणिपातप्रवणसप्रधानाशेषसुरासुरादिवृन्दसौन्दर्यप्रकटकिरीटकोटिनिविष्टस्पष्टमणिमयूखच्छटाच्छुरितचरणनखचक्रविक्रमोद्दामवामपादाङ्गुष्ठनखशिखरखण्डितब्रह्माण्डविवरनिःसरच्छरदमृतकरप्रकरभासुरसुरवाहिनीप्रवाहपवित्रीकृतविष्टपत्रितय ! कैटभारे ! क्रूरतरसंसारसागरनानाप्रकारावर्तविवर्तमानविग्रहं मामनुगृहाण ।

वृत्तगन्धि यथा—

जय जय जय जनार्दन सुकृतिमनस्तडागविकस्वरचरणपद्म पद्मपत्रनयन ! पद्मापद्मिनीविनोदराजहंस ! भास्वरयशःपटलपरिपूरितभुवनकुहर ! हरकमलासनादिवृन्दारकवृन्दवन्दनीयपदारविन्दद्वन्द्व ! द्वन्द्वनिर्मुक्त ! योगीन्द्रहृदयमन्दिराविष्कृतनिरञ्जनज्योतिःस्वरूप ! नीरदरूप ! विश्वरूप ! अनाथनाथ ! जगन्नाथ ! मामनवधिभवदुःखव्याकुलं रक्ष रक्ष रक्ष ।

व्यवहारोचितं प्रायो मया च्छन्दोऽत्र कीर्तितम् ॥
प्रस्तारादि पुनर्नोक्तं केवलं कौतुकं हि तत् ॥ ५ ॥
सर्गैः षोडशभिः समुज्ज्वलपदैर्नव्यार्थभव्याशयै-
र्येनाकारि तदच्युतस्य चरितं काव्यं कविप्रीतिदम् ॥
कंसारेः शतकं दिनेशशतकद्वन्द्वं च तस्यास्त्वसौ
गङ्गादासकवेः श्रुतौ कुतुकिनां सच्छन्दसां मञ्जरी ॥ ६ ॥

इति छन्दोमञ्जर्यां गद्यप्रदो नाम षष्ठः स्तबकः ।

समाप्तोऽयं ग्रन्थः ।

महाकविश्रीक्षेमेन्द्रकृतं

सुवृत्ततिलकम् ।

प्रथमो विन्यासः ।

गणपतिगुरोर्वक्रश्चूडाशशाङ्ककलाङ्कुरः
स्फुटफणिफणारत्नच्छायालुटाछुरणारुणः ॥
गिरिपतिसुतासंसक्तेर्ष्याविलासकचग्रह-
च्युतनखशिखालेखाकान्तस्तनोतु सुखानि वः ॥ १ ॥
स्वच्छन्दलघुरूपाय त्रिजगद्गुरवे नमः ॥
स्पष्टवामनवृत्ताय मायावक्राय चक्रिणे ॥ २ ॥
नमश्छन्दोनिधानाय सुवृत्ताचारवेधसे ॥
तपःसत्यनिवासाय व्यासायामिततेजसे ॥ ३ ॥
क्षेमेन्द्रेण सुशिष्याणां सरस्वत्याः प्रसाधनम् ॥
सुवृत्ततिलकं वर्णरुचिरं क्रियते मुखे ॥ ४ ॥
दृष्ट्वा छन्दांसि सौन्दर्यं विचार्यार्यप्रियः कृतः ॥
प्रसिद्धकाव्यकर्मण्यवृत्तानामेष सङ्ग्रहः ॥ ५ ॥
दीर्घे संयोगपूर्वे च गुरुसंज्ञा प्रकीर्तिता ॥
असंयोगग्रहं ह्रस्वं लघुसंज्ञं प्रकीर्तितम् ॥ ६ ॥
त्रिगुरुः प्राग्गुरुर्मध्यगुरुरन्तगुरुस्तथा ॥
त्रिलघुः प्राग्लघुर्मध्यलघुरन्तलघुस्तथा ॥ ७ ॥
मभजाः सनया रेफतकारौ चेति संक्षिताः ॥
ज्ञेयो लघुर्लकारोऽत्र गकारश्च गुरुर्मतः ॥ ८ ॥ (युग्मम्)
क्वचिद्विच्छित्तिसंस्थानैः क्वचिदेकपदस्थितैः ॥
संयोगस्थैः क्वचिद्वृत्तमुदाहरणमक्षरैः ॥ ९ ॥
पूर्वोत्तरद्वयासक्तविरामेण षडक्षरा ॥
तकारेण यकारेण तनुमध्याऽभिधीयते ॥ १० ॥

यथा मम—

तेन प्रविभक्ता कामं वयसा सा ॥
येन प्रविलसं धत्ते तनुमध्या ॥

सप्ताक्षरसमायुक्तं जसाभ्यां गुरुणा तथा ॥
अविरामं विदुर्वृत्तं कुमारललिताभिधम् ॥ ११ ॥

यथा मम—

जनं स्मृतिदशाप्तं गतानुगतिकः किम् ॥
न शोचति जनोऽयं कुमारललितं तत् ॥

मकारयुगपर्यन्ते यत्संयुक्तगुरुद्वयम् ॥
विद्युन्मालाभिधं तद्धि वृत्तमष्टाक्षरं विदुः ॥ १२ ॥

यथा मम—

मौनं ध्यानं भूमौ शय्या गुर्वी तस्याः कामावस्था ॥
मेघोत्सङ्गे वृत्तासक्ता यस्मिन्काले विद्युन्माला ॥

लघोर्गुरोश्च विच्छित्त्या यत्रानन्तर्यसङ्गतिः ॥
वृत्तप्रमाणनिपुणैः सा प्रमाणीति कीर्तिता ॥ १३ ॥

यथा मम—

लघु श्रुतं मदोद्धतं गुरुश्रमाय केवलम् ॥
न यत्परोपकारकृद्वृथैव तत्प्रमाण्यपि ॥

पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः ॥
गुरु षष्ठं च सर्वेषामेतच्छ्लोकस्य लक्षणम् ॥ १४ ॥
असङ्ख्यो भेदसंसर्गादनुष्टुप्छन्दसां गणः ॥
तत्र लक्ष्यानुसारेण श्रव्यतायाः प्रधानता ॥ १५ ॥

यथा भगवतो व्यासस्य—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ॥
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥

नवाक्षराऽपि ननभैरत्तरैरुपलक्षिता ॥
भुजगाग्रा शिशुसुता कथिता वृत्तकोविदैः ॥ १६ ॥

यथा मम—

न नमति चरणौ भक्त्या किमिति जडमतिर्लोकः ॥
भवभयशमनौ शम्भोर्भुजगशिशुसुतावग्रे ॥

संयुक्तं भमसैरन्ते गुरुणा च दशाक्षरम् ॥
वृत्तं रुक्मवती नाम कथितं वृत्तशालिभिः ॥ १७ ॥

यथा मम—

भ्रममसत्यैः कायसहस्रैर्मोहमयी गुर्वी भवमाया ॥
स्वप्नविलासा योगवियोगा रुक्मवती हा कस्य कृते श्रीः ॥

तकाराभ्यां जकारेण युक्तं गुरुयुगेन च ॥
इन्द्रवज्राभिधं प्राहुर्वृत्तमेकादशाक्षरम् ॥ १८ ॥

यथा मम—

तौ जन्मगूढौ चरणेन यस्य कष्टौ निविष्टौ हृदि कामकोपौ ॥
तं दुःसहास्ता ज्वलदिन्द्रवज्रपातोपमाः क्लेशदशा विशन्ति ॥

जतजैर्गुरुयुग्मेन संसक्तैरुपलक्षितम् ॥
वदन्त्युपेन्द्रवज्राख्यं वृत्तमेकादशाक्षरम् ॥ १९ ॥

यथा मम—

जितो जगत्येष भवभ्रमस्तैर्गुरूदितं ये गिरिशं स्मरन्ति ॥
उपास्यमानं कमलासनाद्यैरुपेन्द्रवज्रायुधवारिनाथैः ॥

पदानन्तरविन्यासयोगैर्बहुभिरेतयोः ॥
वैचित्र्यजातिरुचिरा भवन्त्येवोपजातयः ॥ २० ॥
भकारत्रयसंयुक्तमन्ते गुरुयुगान्वितम् ॥
कथितं दोधकं नाम वृत्तमेकादशाक्षरम् ॥ २१ ॥

यथा मम—

भो भवविभ्रमभङ्गुरभोगा गच्छत नास्त्यधुना मम मोहः ॥
तिष्ठति चेतसि चन्द्रकलाभृद्भुक्तजनाभयदोऽथ कपाली ॥

पूर्वाक्षरचतुष्कान्तविरतिर्मततान्विता ॥
गुरुद्वितययुक्ता च शालिन्येकादशाक्षरा ॥ २२ ॥

यथा मम—

मत्ता गोष्ठीगर्भमूढप्रलापा प्रौढा गाढालिङ्गिता यौवनेन ॥
मध्वाताम्रस्वेदमीलत्कपोला लोला लीलाशालिनी कस्य नेष्टा ॥

रनरैरन्वितं युक्तं लघुना गुरुणा तथा ॥
ख्यातं रथोद्धतानाम वृत्तमेकादशाक्षरम् ॥ २३ ॥

यथा मम—

रम्यनर्मकलभोगतर्जनी भ्रूलतेव तरलारियोषिताम् ॥
वैजयन्त्यभिमुखी रणे रणे भाति ते नरपते रथोद्धता ॥

गुरुद्वययुतैरन्तेरनभैरुपलक्षिता ॥
गदिता स्वागतानाम वृत्तमेकादशाक्षरम् ॥ २४ ॥

यथा मम—

रत्नभङ्गविमलैर्गुणतुङ्गैरर्थिनामभिमतार्पणसक्तैः ॥
स्वागताभिमुखनम्रशिरस्कैर्जीव्यते जगति साधुभिरेव ॥

सकारैरन्वितं वृत्तं चतुर्भिर्युगपत्स्थितैः ॥
उदितं तोटकं नाम वृत्तमैर्द्वादशाक्षरम् ॥ २५ ॥

यथा मम--

सरसः स्मरसारतरो वयसः समयः स्मृतिशेषदशापतितः ॥
गलिताखिलरागरुचिर्विजने पीरतोऽट कपालकरः सुमत ! ॥

संल्लक्षितं जतजरैर्द्वादशाक्षरमक्षरैः ॥
छन्दोविचक्षणा वृत्तं वंशस्थाख्यं प्रचक्षते ॥ २६ ॥

यथा मम---

जनस्य तीव्रातपजार्तिवारणा जयन्ति सन्तः सतते समुन्नताः ॥
सितातपत्रप्रतिमा विभान्ति ये विशालवंशस्थतया गुणोचिताः ॥

अभिव्यक्तं नभभरैरक्षरैर्द्वादशाक्षरम् ॥
वदन्ति वृत्तजातिज्ञा वृत्तं द्रुतविलम्बितम् ॥ २७ ॥

यथा मम--

नभसि भर्गगलच्छविभिर्घनैर्द्रुतविलम्बितगैः परिवारितः ॥
सितकरः कलहंस इवाभितस्तरति संवलितो यमुनोर्मिभिः ॥

समन्वितं मनजरैश्छिन्नं पूर्वाक्षरैस्त्रिभिः ॥
त्रयोदशाक्षरं नाम्ना कीर्तयन्ति प्रहर्षिणीम् ॥ २८ ॥

यथा मम—

मानौजःसुरभिगुणैर्यशःसितानां निर्व्याजा निजभुजविक्रमक्रमाप्ता ॥
सर्वाशाप्रणयिजनोपजीव्यमाना भव्यानां भवति परप्रहर्षिणी श्रीः ॥

अभिज्ञातं तभजजैरन्तासक्तगुरुद्वयम् ॥
चतुर्दशाक्षरं वृत्तं वसन्ततिलकं विदुः ॥ २९ ॥

यथा मम—

तद्भाजि जन्मसचिवे भगवत्यनङ्गे
प्राप्ते लसत्कुसुममण्डलपाण्डुरेण ॥
भृङ्गावलीकुटिलकुन्तलसन्निवेशा
कान्ता वसन्ततिलकेन विभूषिता भूः ॥

अष्टाक्षरविरामेण युक्ता ननमयैः सयः ॥
वदन्ति मालिनीनाम वृत्तं पञ्चदशाक्षरम् ॥ ३० ॥

यथा मम—

नननमयवाणी मेखलाकृष्टिकाले
प्रविचलदिव शीलं नोत्सृजन्ती दुकूलम् ॥
तृणलवचलनेऽपि स्वैरिणी शङ्कमाना
दिशि दिशि कृतदृष्टिर्मालिनी कस्य नेष्टा ॥

नजभैर्जलैरन्तगुरुभिर्नर्कुटाभिधम् ॥
वृत्तं चानष्टविच्छेदं विदुः सप्तदशाक्षरम् ॥ ३१ ॥

यथा मम—

निजभुजजैर्विशालगुणविक्रमकीर्तिभरैः
प्रविदधता सुधांशुधवलं भवता भुवनम् ॥
कथय कथं कृतेयमतिरागवती जनता
चरितमपूर्वमेव तव कस्य न नर्कुटकृत् ॥

जसजैः सयलैर्गेन युताध्नवसंहृतिः ।।
दशसमाक्षरा पृथ्वी कथिता वृत्तवेदिभिः ।। ३२ ।।

यथा मम—

जवात्स रजसा युतः श्रमविसंस्थुलाङ्गः पथा
व्रजन्सततसेवकः पिशुनधाम वेश्म प्रभोः ॥
कदाचिदवलोकनैः फलविवर्जितैर्मन्यते
जडः करसमर्पितामिव मदेन पृथ्वीमिमाम् ॥

नसमै रसलैर्गेन युक्ता सप्तदशाक्षरा ।।
विच्छिन्ना हरिणी षड्भिश्चतुर्भिः सप्तभिस्तथा ।। ३३ ।।

यथा मम—

'न समरसनाः काले भोगाश्चलं धनयौवनं
कुरुत सुकृतं यावन्नेयं तनुः प्रविशीयते ॥
किमपि कलना कालस्येयं प्रधावति सत्वरा
तरुणहरिणी सन्त्रस्तेव प्लवप्रविसारिणी ॥

यमनैः सभलैर्गेन युक्ता सप्तदशाक्षरा ॥
षडेकादशविच्छेदवती शिखरिणी मता ॥ ३४ ॥

यथा मम—

यथा मन्युर्लीनः स च विभवमग्नः स्मरमद-
स्तथा जाने जाता शमसमयरम्या परिणतिः ॥
इदानीं संसारव्यतिकरहरा तीव्रतपसे
विविक्ता युक्ता मे गिरिवरमही सा शिखरिणी ॥

चतुःषट्सप्तविरतिर्वृत्तं सप्तदशाक्षरम् ॥
मन्दाक्रान्ता भमनतैस्तगगैश्चाभिधीयते ॥ ३५ ॥

यथा मम—

मध्येभङ्गीवलनावितताप्राङ्गसंसङ्गभाजः
स्मर्यन्ते ते यदि धृतिमुषः पक्ष्मलाक्षीकटाक्षाः ॥
तत्किं मिथ्या नियमनिभृतैः कानने धीयते धी-
र्मन्दाक्रान्ता दशति निशिता पन्नगी पाणिसक्ता ॥

मसजैः सततैर्गेन युक्तमेकोनविंशवत् ॥
शार्दूलक्रीडितं प्राहुश्छिन्नं द्वादशसप्तभिः ॥ ३६ ॥

यथा मम—

माद्यन्सज्जसमाततोग्रमुभटोद्भिन्नभकुम्भस्थल-
श्लिष्यन्मौक्तिकदन्तुरः सरभसोद्वेल्लद्यशःकेसरः ॥
जृम्भारम्भभयङ्करव्यतिकरत्रस्तैः समुद्वीक्षितः
शत्रूणां त्वदसिः करोति समरे शार्दूलविक्रीडितम् ॥

युक्तं मरभनैर्यैश्च त्रिभिः सप्ताक्षरैस्त्रिभिः ॥
छेदैश्च स्रग्धरावृत्तमेकविंशाक्षरं विदुः ॥ ३७ ॥

सारारम्भानुभावप्रियपरिचयया स्वर्गरङ्गाङ्गनानां
लीलाकर्णावतंसश्रियमतनुगुणश्लेषया संश्रयन्त्या ॥
आभाति व्यक्तमुक्ताविचकिललवलीवृन्दकुन्देन्दुकान्त्या
त्वत्कीर्त्या भूषितेयं भुवनपरिवृढ ! स्रग्धरेव त्रिलोकी ॥

इति सरलतरत्वात्सर्वकाव्योचितत्वा-
त्सुकविपरिचितत्वात्कीर्णकर्णामृतत्वात् ॥
परुषविषममात्रादुर्विरामोज्झितेयं
प्रचुररुचिरवृत्तव्यक्तिरुक्ता हिताय ॥ ३८ ॥

इति श्रीप्रकाशेन्द्रात्मजव्यासदासापरनामश्रीक्षेमेन्द्र-विरचिते सुवृत्ततिलके वृत्तावचयो नाम प्रथमो विन्यासः ।

द्वितीयो विन्यासः ।

कृते प्रसिद्धवृत्तानां लक्ष्यलक्षणसङ्ग्रहे ॥
अधुना क्रियते तेषां गुणदोषप्रदर्शनम् ॥ १ ॥
न षट्सप्ताक्षरे वृत्ते विश्राम्यति सरस्वती ॥
भृङ्गीव मल्लिकाबालकलिकाकोटिसङ्कटे ॥ २ ॥
समासैर्लघुवृत्तानामसमासैर्महीयसाम् ॥
शोभा भवति भव्यानामुपयोगवशेन वा ॥ ३ ॥
अनुष्टुप्छन्दसां भेदे कैश्चित्सामान्यलक्षणम् ।
यदुक्तं पञ्चमं कुर्याल्लघु षष्ठं तथा गुरु ॥ ४ ॥
तत्राप्यनियमो दृष्टः प्रबन्धे महतामपि ॥
तस्माद्व्यभिचारेण श्रव्यतैव गरीयसी ॥ ५ ॥

यथा कालिदासस्य—

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ॥
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥

उपजातिविकल्पानां सिद्धो यद्यपि सङ्करः ॥
तथापि प्रथमं कुर्यात्पूर्वपादाक्षरं लघु ॥ ६ ॥

यथा श्रीमदुत्पलराजस्य—

हृताञ्जनस्यामरुचस्तवैते
स्थूलाः किमित्यश्रुकणाः पतन्ति ॥
भग्ना इव व्यायतपङ्क्तयो ये
तनीयसीं रोमलतां श्रयन्ति ॥

सूत्रस्येवात्र तीक्ष्णाग्रं श्लोकस्य लघुना मुखम् ॥
कर्णं विशति निर्विघ्नं सरलत्वं च नोज्झति ॥ ८ ॥
गुर्वक्षरेण संरुद्धं ग्रन्थियुक्तमिवाऽग्रतः ॥
करोति प्रथमं स्थूलं किंचित्कर्णकदर्थनाम् ॥ ८ ॥

यथा कालिदासस्य—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ॥
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥

ऽयक्षरैस्त्र्यक्षरैरेव च्छेदैराभाति दोधकम् ॥
अतोऽल्पैरधिकैर्वापि यतिं तालमिवोज्झति ॥ ९ ॥

यथा मम—

सज्जनपूजनशीलनशोभा-
मर्जय वर्जय दुर्जनसङ्गम् ॥
दुस्तरसंसृतिसागरवेगे
मज्जनकारणवारणमेतत् ॥

अतोऽल्पाधिकैर्यथा तुङ्गीरस्य—

त्वन्मुखचन्द्रनिरीक्षणवर्त्यो
यः सुतरामिह निर्मलनेत्रः ॥
सर्वजनस्य पुरः स्थितमेत-
त्सोऽन्तकवर्त्म न पश्यति चित्रम् ॥

शालिनी श्लथबन्धैव स्वभावेन विभाव्यते ॥
उत्तेजयेत्तां यत्नेन मन्ददीपशिखामिव ॥ १० ॥

श्लथा यथा मम—

प्रोषक्लेशं प्रोषितानां दिशन्ती
मानम्लानिं मानिनीनां दधाना ॥
गाढं सक्ता सद्गुणग्लानिदाने
चन्द्रस्य श्रीर्दुर्जनस्येव जाता ॥

शत्रन्ताद्यरसंयोगैः किञ्चित्कार्कश्यकारिभिः ॥
अन्ते विसर्जनीयैश्च शालिनी याति दीप्तताम् ॥ ११ ॥

यथा मम—

लज्जामज्जल्लोलतारान्तकान्ता-
स्तिर्यङ्नियत्केतकीपत्रतीक्ष्णाः ॥
मन्माश्चित्ते कस्य निर्यान्ति भूयः
प्रेमोन्मीलत्पक्ष्मलाक्षीकटाक्षाः ॥

श्लथस्वभावान्माधुर्यं शालिन्याः परिवर्ज्यते ॥
रुचिः प्रयाति मन्दाग्नेः क्षीरेणात्यन्तमन्दताम् ॥ १२ ॥
विसर्गयुक्तैः पादान्तैर्विराजति रथोद्धता ॥
कलापरिचयैर्याता लटभेव प्रगल्भताम् ॥ १३ ॥

यथा मम—

अत्र चैत्रसमये निरन्तराः
प्रोषिताहृदयकीर्णपावकाः ॥
वान्ति कामुकमनोविमोहना
व्याललोलमलयाचलानिलाः ॥

अविसर्गैस्तु पादान्तैर्निष्प्रभैव रथोद्धता ॥
अप्रार्थनाप्रणयिनी म्लानमानेव मानिनी ॥ १४ ॥

यथा कलशकस्य—

अञ्जलौ जलमधीरलोचना
लोचनप्रतिशरीरशारितम् ।
आत्तमात्तमपि कान्तमुक्षितुं
कातरा शफरशङ्किनी जहौ ॥

साकाराद्यैर्विसर्गान्तैः सर्वपादैः सविभ्रमा ॥
स्वागता स्वागता भाति कविकर्मविलासिनी ॥ १५ ॥

व्यावलन्ति तरला जलधाराः
पान्थसङ्गमधृतेः परिहाराः ॥
प्रान्तरत्ननिभविद्युदुदाराः
प्रावृषः पृथुपयोधरहाराः ॥

न तु यथा ममैव--

अम्बरेऽम्बुभरलम्बिपयोदे
मत्तबर्हिरुचिरेऽद्रिनितम्बे ॥
पुष्पधामनि कदम्बकदम्बे
का गतिः पथिक कालविलम्बे ॥

द्रुततालललयैरेव व्यक्तं रूक्षाक्षरैः पदैः ॥
प्रनर्तयति यच्चित्तं तत्तोटकमभीप्सितम् ॥ १६ ॥

यथा मम--

मदघूर्णितलोचनषट्चरणं
घनरागमनङ्गकराभरणम् ॥
कमलद्युति मुग्धवधूवदनं
सुकृती पिबतीह सुधासदनम् ॥

असमस्तपदैः पादसन्धिविच्छेदसुन्दरम् ॥
सर्वपादैर्विसर्गान्तैर्वंशस्थं यात्यनर्घताम् ॥ १७ ॥

यथा भट्टबाणस्य--

जयन्ति बाणासुरमौलिलालिता
दशास्यचूडामणिचक्रचुम्बिनः ॥
सुरासुराधीशशिखान्तशायिन-
स्तमश्छिदस्त्र्यम्बकपादपांसवः ॥

विपरीतं यथास्यैव--

नमामि भवोश्चरणाम्बुजद्वयं
सशेखरैर्मौखरिभिः कृतार्चनम् ॥
समस्तसामन्तकिरीटवेदिका-
विटङ्कपीठोल्लुठितारुणाङ्गुलि ॥

प्रारम्भे द्रुतविन्यासं पर्यन्तेषु विलम्बितम् ॥
विच्छित्त्या सर्वपादानां भाति द्रुतविलम्बितम् ॥ १८ ॥

यथा मम--

कमलपल्लववारिकणोपमं
किमिव पासि सदा निधनं धनम् ॥
कलभकर्णचलाञ्चलचञ्चलं
स्थितराणि यशांसि न जीवितम् ॥

द्रुतहीनं विलम्बितं यथा मम--

निपततां भ्रमतां विनिमज्जतां
प्रविशतां परिवारशतैरधः ॥

तनुभृतां भव एव भवार्णवे
भयमये भगवानवलम्बनम् ॥
आकारमन्यरैः प्रायः पादे पादेऽक्षरैस्त्रिभिः ॥
शेषाक्षरैर्द्युततरैः प्रहर्षाय प्रहर्षिणी ॥ १९ ॥

यथा श्रीहर्षदेवस्य—

दुर्वारां कुसुमशरव्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम् ॥
तद् भूयः शिशुशुकसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥

विपरीतं यथा मम—

सङ्कोचव्यतिकरबद्धभीतिलोलै-
र्निर्यद्भिर्भ्रमरभरैः सरोरुहेभ्यः ॥
आरब्धः क्षणमिव सन्ध्यया जगत्या-
मुत्पत्त्यै घनतिमिरस्य बीजवापः ॥
वसन्ततिलकस्याग्रे साकारे प्रथमाक्षरे ॥
ओजसा जायते कान्तिः सविकासविलासिनी ॥ २० ॥

यथा विद्याधिपत्यपरनाम्नो रत्नाकरस्य—

कण्ठश्रियं कुवलयस्तबकाभिराम-
दामानुकारिविकटच्छविकालकूटाम् ॥
बिभ्रत्सुखानि दिशतादुपहारपीत-
धूपोत्थधूममलिनामिव धूर्जटिर्वः ॥
आकारेऽपि कृते पूर्वं बन्धेऽल्पपदपेशले ॥
वसन्ततिलकं धत्ते निर्ग्रन्थि रमणीयताम् ॥ २१ ॥

यथा परिमलस्य—

अच्छासु हंस इव बालमृणालिकासु
भृङ्गो नवास्विव मधुद्रुममञ्जरीषु ॥
कोऽवन्तिभर्तुरपरो रसनिर्भरासु
पृथ्वीपतिः सुकविसूक्तिषु बद्धभावः ॥
विसर्गहीनपर्यन्ता मालिनी न विराजते ॥
चमरी छिन्नपुच्छेव वल्लीवालूनपल्लवा ॥ २२ ॥

यथा भट्टवल्लटस्य—

वरमिह रवितापैः किं न शीर्णासि गुल्मे
किमु दवदहनैर्वा सर्वदाहं न दग्धा ॥

यदहृदयजनौघैर्बृन्तपर्णानभिज्ञै-
रितरकुसुममध्ये मालति ! प्रोम्भितासि ॥

सम्पूर्णा सा यथा कालिदासस्य—

अथ स ललितयोषिद्भ्रूलताचारुभृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ॥
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पकेतुः ॥

द्वितीयार्धे समस्ताभ्यां पादाभ्यां मालिनी वरा ॥
प्रथमार्धे समस्ताभ्यां पादाभ्यामवरा मता ॥ २३ ॥

द्वितीयार्धे समस्तपादा यथा गन्दिनकस्य—

करतरलितबन्धं कञ्चुकं कुर्वतीनां
प्रतिफलितमिदानीं दैपमाताम्रमर्चिः ॥
स्तननटपरिणाहे भामिनीनां भविष्य-
न्नखपदलिपिलीलासूत्रपातं करोति ॥

प्रथमार्धे समस्तपादा यथा राजशेखरस्य—

इह हि नववसन्ते मञ्जरीपुञ्जरेणु-
च्छुरणधवलदेहा वद्धहेलं सरन्ति ॥
तरलमलिसमूहा हारिहुङ्कारकण्ठा
बहुलपरिमलालीसुन्दरं सिन्दुवारम् ॥

अज्ञोऽप्यलक्ष्यं मालिन्यां वीणायामिव विस्वरम् ॥
श्रुत्वैवोद्वेगमायाति वाचा वक्तुं न वेत्ति तम् ॥ २४ ॥

यथा भट्टेन्दुराजस्य—

रहसि हृतदुकूला शीलिता तैलदीपे
त्वदुपगतसमृद्धेः प्रेयसी श्रोत्रियस्य ॥
विकिरति पटवासैर्हन्ति कर्णावतंसैः
शमयति मणिदीपं पाणिफूत्कानिलेन ॥

गुरुलघ्वादिनियमादविभ्रष्टेऽपि लक्षणात् ॥
दोषस्त्वदुपगेत्यत्र श्रोत्रग्राह्योऽस्ति विस्वरः ॥ २५ ॥
प्रथमं द्यक्षरैश्छेदैस्ततस्त्रिचतुरक्षरैः ॥
पश्चादक्षरैश्च पर्यन्ते नर्कुटं याति चारुताम् ॥ २६ ॥

यथा वीरदेवस्य—

तव शतपत्रपत्रमृदुताम्रतलश्चरण-
श्चलकलहंसनूपुररवच्चनिना मुखरः ॥

महिषमहासुरस्य शिरसि प्रसभं निहितः
सकलमहीधरेन्द्रगुरुतां कथमम्ब ! गतः ॥

विपरीतं यथास्यैव—

सशिखिशिखेव धूमनिचिताञ्जनशैलगुहा
सकपिशपन्नगेव यमुनोन्नतनीलशिला ॥
महिषमहासुरोपहितभासुरशूलकरा
बहुलनिशेव भासि सतडिद्गुणमेघयुता ॥

असमासः पदभाति पृथ्वी पृथ्वी पृथक्स्थितैः ॥
समासग्रन्थिभिः सैव याति सङ्कोचखर्वताम् ॥ २७ ॥

पृथक्पदा यथा साहित्यस्य—

कचग्रहमनुग्रहं दशनखण्डनं मण्डनं
दृगञ्जनमवञ्चनं मुखरसार्पणं तर्पणम् ॥
नखार्दनमतर्दनं दृढमपीडनं पीडनं
करोति रतिसङ्गरे मकरकेतनः कामिनाम् ॥

समासवती यथा मम—

कचग्रहसमुल्लसत्कमलकोषपाडाजड-
द्विरेफकलकूजितानुकृतसीत्कृतालङ्कृताः ॥
जयन्ति सुरतोत्सवव्यतिकरे कुरङ्गीदृशां
प्रमोदमदनिर्भरप्रणयचुम्बिनो विभ्रमाः ॥

पृथ्वी साकारगम्भीरैरोजःसर्जिभिरक्षरैः ॥
समासग्रन्थियुक्तापि याति प्रत्युत दीर्घताम् ॥ २८ ॥

यथा भट्टनारायणस्य—

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ॥
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः श्रुतः ॥

त्वरातरलविच्छेदैर्विभाति हरिणी पदैः ॥
मन्थरैर्ग्रन्थिबद्धेव याति निःस्पन्दसङ्गताम् ॥ २९ ॥

तरलपदा यथा दीपकस्य—

तनुधनहरक्रूरस्तेनोत्कटां विकटाटवीं
तरति तरसा शौर्योत्सेकात्स्वसार्थवशाज्जनः ॥
पुरवरवधूलीलावल्गत्कटाक्षबलाकुले
नगरनिकटे पन्थाः पान्थ ! स्फुटं दुरतिक्रमः ॥

मन्थरैर्यथा भट्टेन्दुराजस्य--

गुणपरिचयस्तीर्थे वासः स्थिरोभयपक्षता
वपुरतिदृढं वृत्तं सम्यक्सखे ! तव किं पुनः ॥
सरति सुमतं यस्त्वां पातुं दृशा विनिमेषया
चडिश विषमं तस्याक्षेपं करोषि सहासुभिः ॥
त्रिषु पादेषु विश्रान्तविलासैर्ललिता पदैः ॥
अन्ते तरङ्गितगतिर्हरिणी हारिणी तराम् ॥ ३० ॥

यथास्यैव--

उपपरिसरं गोदावर्याः परित्यजताध्वगाः !
सरणिमपरो मार्गस्तावद्भवद्भिरवेक्ष्यताम् ॥
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥
शिखरिण्याः समारोहात्सहजैवौजसः स्थितिः ॥
सैव लुप्तविसर्गान्तैः प्रयात्यत्यन्तमुन्नतिम् ॥ ३१ ॥

यथा मुक्ताकणस्य--

यथा रन्ध्रं व्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ॥
यथा विद्युज्ज्वालोल्लसनपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः ॥

विपरीता यथा भट्टश्यामलस्य--

धृतो गण्डाभोगे मधुप इव बद्धोऽब्जविवरे
विलासिन्या मुक्तो बकुलतरुमापुष्पयति यः ॥
विलासो नेत्राणां तरुणसहकारप्रियसखः
स गण्डूषः सीधोः कथमिव शिरः प्राप्स्यति मधोः
शिखरिण्याः पदैश्छिन्नैः स्वरूपं परिहायते ॥
मुक्तालताया निःसूत्रमुक्तैर्मुक्ताफलैरिव ॥ ३२ ॥

यथा भट्टभवभूतेः—

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ॥
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥
श्लोकेऽस्मिन्सचमत्कारसरसास्वादशालिनि ॥
केवलं शिखरिण्यैव स्वरूपमपहारितम् ॥ ३३ ॥

मन्थराक्रान्तविस्रब्धैश्चतुर्भिः प्रथमाक्षरैः ॥
मध्यपट्केऽतिचतुरे मन्दाक्रान्ता विराजते ॥ ३४ ॥

यथा कालिदासस्य—

ब्रह्मावर्तं जनपदमधश्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ॥
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारासारैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥

आदिमध्ये तुल्या यथास्यैव—

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ॥
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

साकाराद्यक्षरैः पादपर्यन्तैः सविसर्गकैः ॥
शार्दूलक्रीडितं धत्ते तेजोजीवितमूर्जितम् ॥ ३५ ॥

यथा भट्टश्यामलस्य—

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ॥
सङ्ग्रामामृतसागरप्रमथनक्रीडाकृतौ मन्दरो
राजन्राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥

विपरीतं यथा लाटडिण्डीरस्य—

चित्रं तावददं सुरेन्द्रभवनान्मन्दाकिनीपाथसा
केनाप्युत्तमतेजसा नृपतिना क्ष्मामण्डलं मण्डितम् ॥
नाताश्चित्रतरं निशाकरकलालावण्यदुग्धोदधे !
भूमेर्यद्भवता विरिञ्चिनगरी कीर्तिप्लवैः प्लाव्यते ॥

विसर्जनीयस्योत्वेन पदैर्निम्नोन्नतैरिव ॥
शार्दूलक्रीडितं याति पाठे सायासतामिव ॥ ३६ ॥

यथा मुक्ताकणस्य—

लीलाचामरडम्बरो रतिपतेर्वालम्बुदश्रेणयो
रागोद्दण्डशिखाण्डिनो मुखविधूद्धूतास्तमोविभ्रमाः ॥
सौगन्ध्योद्धतधावदाकुलवलन्मत्तालिमालाकुलो
धम्मिल्लो हरिणीदृशो विजयते स्रस्तो रतिव्यत्यये ॥

विच्छिन्नपादं पूर्वार्धे द्वितीयार्धे समासवत् ॥
शार्दूलक्रीडितं भाति विपरीतमतोऽधमम् ॥ ३७ ॥

पूर्वार्धं यथा भट्टभवभूतेः—

अज्ञानाद्यदि वाधिपत्यरभसादस्मत्परोक्षं हृता
सीतेयं प्रविमुच्यतां शठ ! मरुत्पुत्रस्य हस्तेऽधुना ॥
नो चेल्लक्ष्मणमुक्तमार्गणगणच्छेदोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥

विपरीतं यथा रिस्सोः—

स्नातुं वाञ्छसि किं मुधैव धवलक्षीरोदफेनच्छटा-
छायाहारिणि वारिणि द्युसरितो डिण्डीरविस्तारिणि ॥
आस्ते ते कलिकालकल्मषमषीप्रक्षालनैकक्षमा
कीर्तिः सन्निहितैव सप्तभुवनस्वच्छन्दमन्दाकिनी ॥

आद्यन्तयोर्गुणोत्कर्षकान्त्या सर्वातिशायिनोः ॥
शार्दूलक्रीडितं धत्ते मध्ये तद्गौरवोन्नतिम् ॥३८॥

यथा कालिदासस्य—

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ॥
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥

आद्यन्ताकारविरहात्पर्यन्ते चाविसर्गतः ॥
शार्दूलक्रीडितं स्वस्य रूपं नैवोपलभ्यते ॥ ३९ ॥

यथा श्रीयशोवर्मणः—

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मध्यैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ॥
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

सुकुमाररसस्यात्र रक्षायै वृत्तमुद्धतम् ॥
वाक्पाकेनैव गलितं कविना नीतमल्पताम् ॥ ४० ॥
आकारगुरुयुक्तादिपर्यन्तान्तविसर्गिणी ॥
असंस्पृतविरामा च स्रग्धरा राजते तराम् ॥ ४१ ॥

यथा राजशेखरस्य—

ताम्बूलीनद्धमुग्धक्रमुकतरुतलप्रस्तरे सानुगाभिः
पार्थं पार्थं कलायीकृतकदलिदलं नारिकेलीफलाम्भः ॥
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि-
र्दीर्घापूढव्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः ॥

विपरीतं यथा चक्रस्य–

सत्यं पातालकुक्षिम्भरि चिरविलसद्दिक्करि प्रीणिताभ्रं
श्रीगर्भस्वभ्रमभ्रंलिहलहरि हरिस्थानमप्येव किंचित् ॥
कल्पान्ते व्यासविश्वं परिरटति सरिन्नाथ ! पाथस्त्वदीयं
किं त्वेतत्कुम्भयोनेः करकुहरदरीपूरमाचामतोऽभूत् ॥

आद्यन्ताकारविरहाद्बन्धदोषः स्फुटोऽपि यः ।।
अविलुप्तैर्विसर्गान्तैः स्रग्धरायां समीहते ।। ४२ ।।

यथा मम––

शौर्यश्रीकेशपाशः करिदलनमिलन्मौक्तिकव्यक्तपुष्पः
क्षोणीरक्षाभुजङ्गः कुलशिखरिलुठत्कीर्तिनिर्मोकपट्टः ॥
शत्रुव्रातप्रतापप्रलयजलधरस्फारधाराकरालः
प्रीत्यै लक्ष्मीकटाक्षः कुवलयविजयी यस्य पाणौ कृपाणः ॥

एवमुद्देशलेशेन वृत्तानां दर्शितः क्रमः ॥
अनयैव दिशा सर्वं ज्ञेयं तज्ज्ञैर्यथोचितम् ॥ ४३ ॥
मन्दाक्रान्ता भवेन्मध्ये शालिनी पूरितात्तरा ॥
उपेन्द्रवज्रा वंशस्थं पर्यन्तैकाक्षराधिकम् ॥ ४४ ॥
इत्यादि दर्शितं नेह स्वतः सिद्धो ह्ययं क्रमः ॥
न वेत्ति तद्वृत्तज्ञस्तज्ज्ञस्य क्वोपयुज्यते ॥ ४५ ॥
इति परिचितनानारूपवाणीगुणानां
विदितविविधदोषोद्देशलेशान्तराणाम् ॥
इदमतिशयसूक्ष्मैर्वृत्तचर्चाविचारै-
रभिहितमभिगम्यं योगितुल्याशयानाम् ॥ ४६ ॥

इति श्रीप्रकाशेन्द्रात्मजव्यासदासापरनामश्रीक्षेमेन्द्र-विरचिते सुवृत्ततिलके गुणदोषदर्शनं नाम द्वितीयो विन्यासः ।

तृतीयो विन्यासः ।

प्रबन्धः सुतरां भाति यथास्थानं विवेचकः (निवेशितैः) ॥
निर्दोषैर्गुणसंयुक्तैः सुवृत्तैर्मौक्तिकैरिव ॥ १ ॥
शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः ॥

चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ॥ २ ॥
शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् ॥
काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृति ॥ ३ ॥
शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत् ॥
भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते ॥ ४ ॥
तत्र केवलशास्त्रेऽपि केचित्काव्यं प्रयुञ्जते ॥
तिक्तौषधरसोद्वेगे गुडलेशमिवोपरि ॥ ५ ॥

यथा वैद्यके वाग्भटस्य—

मधु मुखमिव सोत्पलं प्रियायाः कलरणना परिवादिनी प्रियेव ॥
कुसुमचयमनोहरा च शय्या किसलयिनी लतिकेव पुष्पिताग्रा ॥

शास्त्रं कुर्यात्प्रयत्नेन प्रसन्नार्थमनुष्टुभा ॥
येन सर्वोपकाराय याति सुस्पष्टसेतुताम् ॥ ६ ॥
काव्ये रसानुसारेण वर्णनानुगुणेन च ॥
कुर्वीत सर्ववृत्तानां विनियोगं विभागवित् ॥ ७ ॥
शास्त्रकाव्येऽतिदीर्घाणां वृत्तानां न प्रयोजनम् ॥
काव्यशास्त्रेऽपि वृत्तानि रसायत्तानि काव्यवित् ॥ ८ ॥
पुराणप्रतिबिम्बेषु प्रसन्नोपायवर्त्मसु ॥
उपदेशप्रधानेषु कुर्यात्सर्वेष्वनुष्टुभम् ॥ ९ ॥
नानावृत्तविशेषास्तु कवेः शस्तस्य शासनात् ॥
यान्ति प्रभोरिवात्यन्तमयोग्या अपि योग्यताम् ॥ १० ॥
उग्रगोग्रहसङ्ग्रामे तत्कालसदृशोपमाः ॥
दृष्टास्त एव वैराटेस्त एवाश्वाः किरीटिनः ॥ ११ ॥
तथाप्यवस्थासदृशैः साधुशब्दपदस्थिताः ॥
सुवृत्तैरेव शोभन्ते प्रबन्धाः सज्जना इव ॥ १२ ॥
वृत्तरत्नावली कामादस्थाने विनिवेशिता ॥
कथयत्यज्ञतामेव मेखलेव गले कृता ॥ १३ ॥
नहि नाम नवोन्मेषिकुचायाश्चारुचक्षुषः ॥
चिरत्यक्तस्मराचारे जराजीर्णकचे रुचिः ॥ १४ ॥
तस्मादत्र यथास्थाने विनियोगाय सङ्गतिः ॥
उदाहरणदिङ्मात्रैर्दर्शिताभिमता सताम् ॥ १५ ॥
आरम्भे सर्गबन्धस्य कथाविस्तरसङ्ग्रहे ॥
शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् ॥ १६ ॥

आरम्भे यथा भर्तृमेण्ठस्य—

आसीद्दैत्यो हयग्रीवः सुहृद्वेदमसु यस्य ताः ॥
प्रथयन्ति बलं बाह्वोः सितच्छत्रस्मिताः श्रियः ॥

कथाप्रसङ्गे यथाभिनन्दस्य—

तस्यां निजभुजोद्योगविजितारातिमण्डलः ॥
आखण्डल इव श्रीमान्राजा शूद्रक इत्यभूत् ॥

शमोपदेशे यथा मम—

पृथुशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ॥
अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञज्योतिरान्तरम् ॥

शृङ्गारालम्बनोदारनायिकारूपवर्णनम् ॥

वसन्तादि तदङ्गं च सच्छायमुपजातिभिः ॥ १७ ॥

रूपवर्णनं यथा कालिदासस्य—

मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ॥
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम् ॥

वसन्तवर्णनं यथास्यैव—

बालेन्दुवक्राण्यविकासभावा
द्रुमुः पलाशान्यतिलोहितानि ॥
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥

रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु ॥
पाण्डुरप्यगुणा नीतिर्वंशस्थेन विराजते ॥ १८ ॥

चन्द्रोदये यथास्यैव—

अङ्गुलीभिरिव केशसञ्चय
सन्नियम्य तिमिरं मरीचिभिः ॥
कुड्मलीकृतसरोजलोचन
चुम्बतीव रजनीमुखं शशी ॥

नीतिर्यथा भारवेः—

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ॥
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥

वसन्ततिलकं भाति सङ्करे वीररौद्रयोः ॥
कुर्यात्सर्गस्य पर्यन्ते मालिनीं द्रुततालवत् ॥ १९ ॥

वीररौद्रयोर्यथा रत्नाकरस्य—

जृम्भाविकासितमुखं नखदर्पणान्त-
राविष्कृतप्रतिमुखं गुरुरोषगर्भम् ॥
रूपं पुनातु जनितारिचमूविमर्श-
मुद्वृत्तदैत्यवधनिर्वहणं हरेर्वः ॥

सर्गान्ते यथा कालिदासस्य—

अर्चितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां बर्हिषां चोपनेत्री ॥
गिरिशमुपचचार प्रत्यहं सा सुकेशी
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ॥

उपपन्नपरिच्छेदकाले शिखरिणी मता ॥
औदार्यरुचिरौचित्यविचारे हरिणी वरा ॥ २० ॥

उपपन्नपरिच्छेदे यथा भर्तृहरेः—

भवन्तो वेदान्तप्रणिहितधियामत्र गुरवो
विचित्रालापानां वयमपि कवीनामनुचराः ॥
तथाप्येवं ब्रूमो न हि परहितात्पुण्यमपरं
न चास्मिन्संसारे कुवलयदृशो रम्यमपरम् ॥

औदार्येऽप्यस्यैव—

विपुलहृदयैरन्यैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ॥
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ।

साक्षेपकोधधिक्कारे परं पृथ्वी भरक्षमा ॥
प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते ॥ २१ ॥

साक्षेपे यथा यशोवर्मणः—

स यस्य दशकन्धरं कृतवतोऽपि कक्षान्तरे
गतः स्फुटमवन्ध्यतामधिपयोधि सान्ध्यो विधिः ॥
तदात्मज इहाङ्गदः प्रहित एष सौमित्रिणा
क्व स क्व स दशाननो ननु निवेद्यतां राक्षसः ॥

प्रावृट्प्रवासे यथा कालिदासस्य—

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ॥

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

शौर्यस्तवे नृपादानां शार्दूलक्रीडितं मतम् ॥
सावेगपवनादीनां वर्णने स्रग्धरा मता ॥ २२ ॥

शौर्यस्तवे यथा श्रीचक्रस्य—

नेतुं नौभिरिभा न यान्ति दृतिभिस्तार्याः कियन्तो हया-
स्तज्जानुद्वयसेन देव ! पयसा सैन्यं समुत्तार्यताम् ॥
नो चेद्भङ्गभयद्रुतारिवनितानेत्रप्रणालीलुठ-
द्बाष्पाम्भःप्लवपूरितोभयतटा द्राग्वर्त्स्यतीरावती ॥

सावेगपवने यथा मम पवनपञ्चाशिकायाम्—

प्रेङ्खच्छङ्खाभिघातस्फुटदखिलचलच्चुक्तिनिर्मुक्तमुक्ता-
मुक्तव्यक्ताट्टहासाः स्मरनृपसकलद्वीपसञ्चारचाराः ॥
सर्पत्कर्पूरपूरप्रवणकरचिता दिग्वधूकर्णपूरा
धावन्त्याभातविश्वा रतविधुतवधूबन्धवो गन्धवाहाः ॥

दोधकतोटकनर्कुटयुक्तं
मुक्तकमेव विराजति सूक्तम् ॥
निर्विषयस्तु रसादिषु तेषां
निर्नियमश्च सदा विनियोगः ॥ २३ ॥

शेषाणामप्यनुक्तानां वृत्तानां विषयं विना ॥
वैचित्र्यमात्रपात्राणां विनियोगो न दर्शितः ॥ २४ ॥
इत्येष वश्यवचसां सर्ववृत्तप्रसङ्गिनाम् ॥
उक्तो विभागः सद्वृत्तविनिवेशे विशेषवान् ॥ २५ ॥
एकस्मिन्नेव यैर्वृत्ते कृतो द्वित्रेषु वा श्रमः ॥
न नाम विनियोगार्हास्ते दरिद्रा इवोत्सवे ॥ २६ ॥
वृत्ते यस्य भवेद्यस्मिन्नभ्यासेन प्रगल्भता ॥
स तेनैव विशेषेण स्वसन्दर्भं प्रदर्शयेत् ॥ २७ ॥
एकवृत्तादरः प्रायः पूर्वेषामपि दृश्यते ॥
तत्रैवातिचमत्कारादन्यत्रारब्धपूरणात् ॥ २८ ॥
अनुष्टुप्सततासक्ता साभिनन्दस्य नन्दिनी ॥
विद्याधरस्य वदने गुलिकेव प्रभावभूः ॥ २९ ॥
स्पृहणीयत्वचरितं पाणिनेरुपजातिभिः ॥
चमत्कारैकसाराभिरुद्यानस्येव जातिभिः ॥ ३० ॥
वृत्तच्छत्रस्य सा कापि वंशस्थस्य विचित्रता ॥

प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता ॥ ३१ ॥
वसन्ततिलकारूढा वाग्वल्ली गाढसङ्गिनी ॥
रत्नाकरस्योत्कलिका चकास्त्याननकानने ॥ ३२ ॥
भवभूतेः शिखरिणी निरर्गलतरङ्गिणी ॥
रुचिरा घनसन्दर्भे या मयूरीव नृत्यति ॥ ३३ ॥
सुवशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति ॥
सदश्वदमकस्येव काम्बोजतुरगाङ्गना ॥ ३४ ॥
शार्दूलक्रीडितैरेव प्रख्यातो राजशेखरः ॥
शिखरीव परं वक्रैः सोल्लेखैरुच्चशेखरः ॥ ३५ ॥
इत्येवं पूर्वकवयः सर्ववृत्तकरा अपि ॥
अस्मिन्हार इवैकस्मिन्प्रायेणाभ्यधिकादराः ॥ ३६ ॥
सुवर्णार्हप्रबन्धेषु यथास्थाननिवेशिनाम् ॥
रत्नानामिव वृत्तानां भवत्यभ्यधिका रुचिः ॥ ३७ ॥
तस्माद्यथायं विनियोगमार्गः
प्रदर्शितो वृत्तनिवेशनेषु ॥
तथैव कार्यः कविभिः कृतज्ञै-
रवश्यवाचां नियमस्तु नायम् ॥ ३८ ॥
इत्यारुरुक्षोः प्रथमोपयुक्तं
प्रवृत्तवाचश्च विवेककारि ॥
महाकवेरप्यतिसूक्ष्मतत्त्व
विचारहर्षप्रदमेतदुक्तम् ॥ ३९ ॥
इत्यौचित्यप्रचुररचनाविश्रुतश्रव्यवृत्त-
व्यक्तिः शक्तिप्रसृतवचसां दर्शिता सङ्ग्रहेण ॥
क्षेमेन्द्रेण प्रणयिविपदां हर्तुराश्चर्यकर्तु-
र्भूभृद्भर्तुर्भुवनजयिनोऽनन्तराजस्य राज्ये ॥ ४० ॥

इति श्रीप्रकाशेन्द्रात्मजव्यासदासापरनामश्रीक्षेमेन्द्रविरचिते सुवृत्ततिलके वृत्तविनियोगो नाम तृतीयो विन्यासः ।

शुद्धिपत्रम्।

अशुद्धम्	शुद्धम्	पृ०	पं०
सायू	साय्	३	३०.
लोक	श्लोक	८	२२.
विमक्ति	विभक्ति	१४	१५.
समासन्त	समासान्त	१६	६.
पद्वं	पदं	२४	१८.
खोवा	खोवा	,,	२३.
पूर्घार्धे	पूर्वार्धे	२५	२३.
जन्लयोरेव	जन्लयोरेव	,,	२४.
अष्ठमे	अष्टमे	,,	३०.
आदिभूतण	आदिभूतगण	२७	२८.
योरेव	योरेव	२८	११.
स्यितम्।	स्थितम्।	,,	१५.
द्वयमिति	द्वयमिति	,,	१६.
द्वितीय	द्वितीय	,,	१६.
ज्ञेयो	ज्ञेयो	,,	२५.
सङ्ख्यया	सङ्ख्यया	,,	२६.
व। ला	वाला	३०	२२.
न.	य.		
परीता	परीता	४५	२२.
तत्पूर्वा	तपूर्वा	४६	२३.
ज्जातु	जातु	५०	२४.
मात्रपद	मात्रपाद	५३	२१.
मात्रासमब	मात्रासमक	५४	३०.
तादृक्ु	तादृक्	५७	४.
शिवेतेऽयं	शिवेऽ-। यं ते	६५	२७.
न.	स.		
यसह	यसह	६६	१८.

अशुद्धम	शुद्धम्	पृ०	पं०
भ.	म.		
पीत्वाम	पीत्वाम	,,	२३.
वहुत्र	वहुत्र	७१	२३.
इन्द्रवज्रोपेन्द्रवज्रयोः	इन्द्रवज्रावंशस्थयोः	७२	३०.
षड्विंशति	षड्विंशति	७३	१६.
कपुस्तके	पुस्तकान्तरे	८८	२६.
गुञ्चद्	गुञ्जद्	९२	२७.
भर्यितावि ति	भिर्यतावि ति	९४	१.
मिन्दुमत्या	मिन्दुमत्या	९६	२७.
आनन्द्रा	आनन्दा	१००	२४.
हारधृत्	हारधृक्	१०४	१९.
भांशुक ऽ।।।,	भांशुक ऽ।।,	१०८	१४,
द्रुतमध्या	द्रुतमध्या	१०८	२३.
गुरुन्गण	गुरून्गण	१०९	१०.
रक्त	रक्त्र	१११	२२.
द्वितयो	द्वितीयो	११४	१३.
कोष्टक	कोष्ठक	११५	१.
प्रथमाङ्घ्रि	प्रथमाङ्घ्रि	१२०	५.
पृथक्कथना	पृथक्कथना	१२१	६.
वर्द्धमाने	वर्धमाने	१२२	८.
न.	ज.		
नितम्व	नितम्व	१२२	२१.
व्याख्याने	व्याख्याने	१२३	२६.
नीलुप्पल	णीलुप्पल	१२६	१६.
आअं	पाअं	१३०	१०.
त्यधिकानी	त्यधिकानि	१३२	४.
मसर	मत्सर	१३५	१६.
गुरश्चैको	गुरुश्चैको	१४०	१८.
यावद्भवमिति	यावद्भवति	१४२	८.

अशुद्धम्	शुद्धम्	पृ०	पं०
पलक्षरण	पलक्षण	१४४	३.
यथा	यथा	,,	१३.
त्सकार्ध	त्समार्ध	१४७	६.
अर्याया	आर्याया	१४६	७.
समोष्टिम्	समोद्दिष्टम्	१५०	१.
तदधोऽङ्क	तदधोङ्क	१५२	१५.
कृत्वा	कृत्वा	१५८	१.
वर्धयित्या	वर्धयित्वा	१६०	६.
गुरूवर्ण	गुरूवर्ण	१६३	१४.
पातयंतू	पातयंत्	१६६	१२.
चतुःषष्टिश्चेति	चतुःषष्टिश्चेति	,,	२६.
रभिधानात्	रभिधानात्	१६८	८.
११६	२१६		२१६.
दोदैक	दादेकै	२१६	१.
बृहति	बृहती	२१६	४.
जगति	जगती	२१६	५.
व्यक्तं	व्यक्तं	२२०	६.
रुचिराङ्गना	रुचिराङ्गणा	२२५	३१.
कालिन्दिी	कालिन्दी	२३३	२२.
भाद्गुरूका	भाद्गुरुका	२४०	३.
सुमेत	सुमते	२४६	३.
वारीकणो	वारिकणो	२५४	२८.
स्थितराणि	स्थिरतराणि	२५४	३१.

१०२ पृष्ठे टिप्पणे पतितः "दिक्षु...प्रसिद्धम्" पर्यन्तं ग्रन्थः टीकायां "तथा" इत्यस्य पूर्वं पठनीयः ।

अत्र मुद्रणयन्त्रजाता अशुद्धीर्विहाय विहितं शुद्धिपत्रम् । वर्जिता अशुद्धीः पाठकैः संशोध्य ग्रन्थः पठनीयः ।

काशासंस्कृतसीराज़-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

	तत्र मुद्रितग्रन्थनामानि ।	मूल्यम् ।
१	नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १)	रु० १—८
२	संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १)	रु० ८—०
३	वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं१)	रु०२—८
४	श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १)	रु० ०—६
५	लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावः ।	रु० ५—०
५	लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग (व्याकरणं १)	रु० ८—०
६	कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १)	रु० ६—०
७	पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)	रु० ०—८
८	अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः ।	रु० ०—८
९	अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं१)	रु० ०—१२
१०	जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १)	रु० २—०
११	पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १)	रु० ०—८
१२	पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २)	रु० १—४
१३	श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३)	रु० १—४
१४	कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं२)	रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकाण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिर्निर्मितिः । (व्याकरणं २) रु० ०—८
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्य-विरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०
२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८
२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०
२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—५
२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ३—
२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२
२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलीः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। महामहोपाध्यायरुचिदत्तकृतमकरन्दोल्लासितमहामहोपाध्याय वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः (न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपारव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षिभारद्वाजोद्द्योतकरविरचितम्। महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम्। (न्यायं वि० ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ५) रु० २—०

४० श्रीनारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः-मेदिनीकारविरचितः। (कोशं १) रु० १—८

४२ मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम्। टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं१) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं२) रु० १—८

१७ पारस्करगृह्यसूत्रम्। काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम्। हरिहरभाष्यसहितस्नानग्निकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च। (कर्मकाण्ड २) रु० ३—०

१८ संक्षेपशारीरकम्। मधुसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि श्रीशिवमहिम्नस्तोत्रम्। श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः। भाषाटीकासहितः। (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः। (व्याकरणं ३)रु०४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका। श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः। (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः। (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः। म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ४—८

२८ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् पञ्चसर्गात्मकम्। म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं०श्रीकनकलाल ठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्य३) रु० ०-१२

२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णयाजयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। (काम०२) यन्त्रस्थ

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
Lal Bahadur Shastri National Academy of Administration Library
मसूरी
MUSSOORIE

अवाप्ति सं०
Acc. No.....

कृपया इस पुस्तक को निम्नलिखित दिनांक या उससे पहले वापस कर दें।

Please return this book on or before the date last stamped below.

दिनांक Date	उधारकर्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्ता की संख्या Borrower's No.

(मीमांसा ३) रु० १०—०
४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीत-
भाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचि-
तन्यायसूत्रवृत्त्यनुगतम् GL SANS 891.25 BHA ायं ६) रु० ३—०
४४ दामयूखः। विद्वद्वरश्रीनी 126626 LBSNAA ाखं१) रु० १—८
४५ कालमाधवः। विद्वद्वरश्रीम ाखं२) रु० १—८

४६ भास्वती। श्रीमच्छतानन्दविरचिता। श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता। (ज्योतिषं ३) रु० २—०

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीबिरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः। पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ८) रु० १—४

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या—श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०७) रु० १—४

४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरी[illegible] (साहित्य०४) रु० ४—०

५० [illegible] ४) रु० १—०

५१ [illegible] मल्लिनाथ-[illegible]रेण कृता [illegible] ५) रु० १-४

५२ [illegible] गतः। रु०—८

५३ [illegible] ६) रु०१—०

५४ अल [illegible] -१२-०

५५ वृ [illegible]

५६ [illegible] —८

५७ श [illegible] १-४

Sans
891.25
भट्ट
अवाप्ति सं० 14220
ACC. No.....
पुस्तक सं.
Book No.....
वर्ग सं.
Class No.....
लेखक भट्टकेदार
Sans
14220
891.25
LIBRARY
भट्ट
LAL BAHADUR SHASTRI
National Academy of Administration
MUSSOORIE
Accession No. 125625
1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.
Help to keep this book fresh, clean & moving

५८ प्र [illegible] २-०

५९ [illegible] —०

[illegible] —०